# श्री निःश्रेयसम्

संस्कृत-पत्रम्

४



# श्री नि:श्रेयसम्

संस्कृत–पत्रम्

४

संपादकः
गणिसम्यग्दर्शनविजयः

प्रकाशनप्रतिष्ठानम् :
जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
ला फ्लेट के सामने, भठ्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409



।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।
।। ॐ ह्रीँ श्री शंखेश्वरपार्श्वनाथाय नमः ।।
।। पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ।।
।।पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः।।

# श्री निःश्रेयसम्

## संस्कृत-पत्रम्

## ४

निमित्तम्

**जैनशासनज्योतिर्धर पू.आ.श्री**

**विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दी**

: आशीर्वाद प्रदानम् :

सुविशालगच्छनायक पूज्यपादाचार्यप्रवरश्रीमद्**विजयपुण्यपालसूरीश्वराणाम्**

प्रवचनप्रभावक-पूज्यपादाचार्यप्रवरश्रीमद्**विजयमुक्तिप्रभसूरीश्वराणाम्**

वात्सल्यवारिधि-पूज्यपादपंन्यासप्रवर**श्रीमद्वज्रसेनविजयगणिवराणाम्**

: प्रेरणादानम् :

प्रसिद्ध प्रवचनकार-गुरुदेव-पूज्यपादाचार्यप्रवरश्रीमद्**विजयश्रेयांसप्रभसूरीश्वराणाम्**

प्रवचनकुशल-पूज्यपादाचार्यप्रवर श्रीमद्**विजयहेमप्रभसूरीश्वराणाम्**

: संपादनम् :

**मुनिप्रवरश्रीसम्यग्दर्शनविजयगणिवरा**

: संशोधनम्-क्षति संमार्जनञ्च :

**पू.साध्वीवर्याश्री प्रशमनिधिश्रीयः**

**पं.श्री अमृतभाई पटेलः**

: प्रकाशनम् :

वैक्रमीय २०७०, आषाढकृष्णाचतुर्दशी,

शुक्रवार, दि.२५-७-२०१४

प्रतयः ७५०     मूल्यम् : १७५

# प्रकाशकस्य हृदयोद्गारः

**प्रवाहः प्रवाहयन्ताम्**

ऐन्द्रीयैश्वर्यतां दददृभिः तीर्थकरगणधरभगवद्भिः प्रथितः प्रस्थापितश्च सुदुस्तरो वचनप्रवाहः।

पङ्गुवत् प्रयतामहे तमवगाहनाय वयम्। भगवद्वचनप्रवाहः प्रभूततमप्रभाववान्नस्ति।

भगवद्वचनं हि हेय–ज्ञेयोपादेयविवेकभावं प्रददाति।

उक्तम् हि –विरागभावं व्यक्तीक्रियते अनेन इति वचनम्।

विनीयते अष्टप्रकारं कर्म अनेन इति वचनम्।

विरक्तदशां चिनोति इति वचनम्।

विशिष्टात्महितं निश्चिनोति यद् इति वचनम्।

तद् भगवद्वचने प्रकृष्टः परः, प्रशस्यः भावः वहतीति प्रवाहः।

येन जीवः क्षमाभावमावहति सः प्रवाहः।

येन जीवः सदाचारेऽवहितो भवति सः प्रवाहः।

येन जीवः शुभभावनामावहति सः प्रवाहः।

ईदृशो भगवद्वचनप्रवाहः प्रवाहयितुं प्रारब्धोऽस्मामिः परमगुरु–**रामचन्द्रसूरि**–दीक्षाशताब्द्यवसरे **''श्रीनिःश्रेयसम्''** इति संस्कृत–पत्रमाध्यमेन।

तदस्मद्–हृदयेन संस्थया च प्रोह्यतेतराम् सदैव सुखं–सुखेनेति आशास्महे।

**सं.: २०७०**
**आषाढ कृष्णा चतुर्दशी,**
**शुक्रवार, दि.२५-७-२०१४**

**-श्रीविजयहीरसूरीश्वरश्रुतज्ञानभवनम्**
**मुख्यसञ्चालकः दिनेश जैनः**
**अहमदाबाद (गूर्जरदेशः)**

# -संपादकीयम्

## सङ्कल्पात् सिद्धिः

ऐन्द्रार्चित-परमात्मप्ररुपित-धर्मसंस्कृते मूलं भारतवर्षे गीर्वाणभाषा। साम्प्रतं तु तस्याः प्रभावो भारते लुप्तप्रायो दृश्यते। आङ्ग्लादिभाषाणां स्व-परदेशेषु प्रभाव-प्रचार-प्रसार-कारकाणां बहुलत्वात्।

सर्वेषां चेतसि संस्कृतभाषा निरर्थका प्रतिभासते तयाऽर्थकामाऽसिद्धेः। ततस्तत्र प्रयासो निष्फलः। या भाषा सर्वेषां सदुपयोगिनी भवेत् तत्र प्रयासः सुष्ठु-सफलता-सम्पादकत्वात्।

पुनश्च संस्कृतभाषा कठिना, नियमबद्धा, परिश्रमसाध्या न तु आङ्ग्लादिभाषावत् स्वल्पपरिश्रम-साध्या । इति मन्यन्ते जनाः। किन्तु न जानन्ति ते यदध्यात्मभाव एव सर्वावस्थासु प्रबल-तमोपयोगवान्, भौतिकवादो न सौख्यतामापादनायाऽलम्।

यदि आत्मा संकल्पयति मम केनाऽपि उपायेन संस्कृतभाषा शिक्षणीया तर्हि अवश्यं सिद्धिः स्याद् । यतो मानुषी शक्तिः अलौकिका एव तत्र अर्वाचीनैका घटना मानुषशक्ति-प्रदर्शिका प्रस्तूयते। कस्मिंश्चित् देशे एका कन्या प्रौढबुद्धिशालिनी आसीत्। विद्याऽध्ययने विशिष्ट-सिद्धिं प्राप्तुमनाः सा कदाचित् नगरान्नगरं ट्रेन्यानेन गतवती।

ट्रेन्याने चलति सति (देहधर्म-निवर्त्तनार्थं) एक बोग्याः
अन्यद्बोग्यन्तरं गच्छन्ती मध्यमार्गेण साऽधस्तात् पतिता। ट्रेन्यानेन
द्वौ पादौ कर्तितौ। मरणमुखं प्राप्य सा पुनरागता ।
किन्तु हस्तपादं विनाऽपि तस्याः मनसि या सिद्धिः विद्या-
ऽध्ययने प्राप्तव्याऽऽसीत्। तत्र सा कर्मठाऽभवत्। प्रबल-पुरुषार्थेन च कलासिद्धिं संप्राप्यैव सुखेन स्थिता ।

तदपेक्षया तु संस्कृताऽध्ययने न कश्चित् महान् प्रयासः कर्तव्यः अस्ति। एतज्ज्ञात्वा संस्कृतभाषायां जनाः प्रबलादरवन्तो भवेयुः।

तयैव श्रीनिःश्रेयसपदाप्तिः भविष्यतीति निश्चिनुताम् सहृदयाः ।

एतद् ''श्रीनिःश्रेयसम्'' पत्रं निःश्रेयसप्रीतेः-संस्कृतभाषारुचेश्च च प्रवर्धनाय क्षमं भवतु इति शम्

**वि.सं.२०७०,आषाढ कृष्णापञ्चमी** **सद्गुरुचरणचञ्चरीकायमाणः**

**पूना नगरम् ता.१६-७-२०१४** **सम्यग्दर्शनविजयो गणी**

## आभार:....

## अनुमोदनम्....

प्रसिद्धप्रवचनकार-

पूज्यपादाचार्यप्रवर-

श्रीमद्विजय-श्रेयांसप्रभसूरीश्वराणा-

मुपकारस्मृत्यर्थम् एकेन गुरुभक्तपरिवारेण

अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतः

तमनुमोदयति...

जगद्गुरु पू.आ.श्री

विजय हीरसूरीश्वरजी श्रुतज्ञानभवन-

मुख्यसञ्चालकगणः

अहमदाबादः

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| * श्री निःश्रेयसम् प्रति प्रतिघोषः | | १ |
| **खण्ड-१ प्राचीनकृतयः** | | |
| * सम्यक्त्वदीपिका-स्नात्रपञ्चाशिका | साध्वीवर्याश्री चिन्तनप्रियाश्रीयः | ७ |
| **खण्ड-२ अर्वाचीन कृतयः** | | |
| * कमलनिर्लेपमुनिवराः जयन्तु | पू.आ.श्री विजयश्रेयांसप्रभसूरीश्वराः | ३५ |
| * रामवचनमौक्तिकानि | पं.श्री मोक्षरतिविजयः | ३७ |
| * पुस्तक समीक्षा | देवर्षिकलानाथशास्त्री | ३९ |
| * गीत-वीतराग प्रबन्ध | डॉ. एच. वि. नागराजराव् | ४२ |
| * वैश्विकः सखा | प्रा.चन्दुलाल व. ठकराल | ४७ |
| * वद्धः मुक्तः | डॉ. वासुदेव पाठक 'वागर्थ' | ४९ |
| * आगमस्यामृतम् | आ.श्री कल्याणबोधिसूरिश्वराः | ५० |
| * अनर्थपञ्चकम् | आ.श्री कल्याणबोधिसूरिश्वराः | ५१ |
| * सद्गुरु-माहात्म्यम् | पं.चन्द्रकान्त एस्. संघवी | ५२ |
| * प्रवचनमातुः संदेशः | मुनिश्री दर्शनरक्षितविजयाः | ५४ |
| * श्री रामचन्द्रीयं महाकाव्यम् | पं.श्री मोक्षरतिविजयगणिवराः | ७० |
| * श्री आदिजिन अष्टकम् | पं.श्री अजितयशसूरीश्वराः | ७८ |
| * श्री चारित्रसप्तविंशिका | गणिवर्याः सम्यग्दर्शनविजयाः | ८४ |
| * श्री वासुपूज्य स्तुत्यष्टकम् | मुनिश्री प्रशमरक्षितविजयाः | ८८ |
| * श्रेयस्करीजिनस्तुतिचतुर्विंशी | सा.श्री प्रशमनिधिश्रीयः | ९० |
| * श्रीमदृषभदेवस्तवः | डॉ. राम किशोर मिश्रा | ९८ |
| * प्रार्थना | शान्तप्रकाशः सत्यदासः | १०० |
| * गुर्जरस्तवनानुवादः | मुनि.श्री धुरंधरविजयाः | १०२ |
| * नर्मकथा | मुनिन्यायरत्नविजयाः | १०५ |
| * सिरिमंतो अद्दयकुमारसमणो | पं.अमृतभाई पटेल | १०६ |
| **खण्ड-३ यशोदर्शनम्** | | |
| * भावभक्त्या प्रणमामि सादरम्... | गणिवराःश्री सम्यग्दर्शनविजयाः | ११७ |
| * लक्षणस्य निरुपणम् | गणिवराःश्री सम्यग्दर्शनविजयाः | ११८ |
| * विद्वत्सङ्गोष्ठिवर्णनम् | | १२६ |

# ।। श्री नि:श्रेयसम् प्रति प्रतिघोष: ।।

**ऐं नम:** - नि:श्रेयसम् - ३ प्राप्तकर प्रसन्नता है । पू. श्री हीरसूरीश्वरजी श्रुतज्ञानभवनम् अहमदाबाद के सत्प्रयत्नो तथा संपादक मुनि **सम्यग्दर्शनजी** महाराज की पवित्र श्रुतभक्ति समन्वित **'नि:श्रेयसम्'** सुश्रावकों की प्रथम पसन्द हो यह जिनेन्द्र देव से विनय है । सादर...प्रस्तुत त्रुटिरहित प्रकाशन प्रशंसनीय है ।

**- मोतीलाल जैन - ''विजय''**

ए. (हिन्दी+संस्कृत साहित्य) बी.एड. साहित्यरत्न,
रिटायर्ड लेक्चरर, कटनी - म.प्र.

---

श्रीमान् दिनेशजैन महोदय!

नमो नम:।

तत्रभवता प्रेषिते 'नि:श्रेयसम्' संस्कृतपत्रस्य द्वे पुस्तके (२,३) सम्प्राप्ते मया। उपकृतोऽहम्। शोधसामयिकस्य भाषा संस्कृतभाषा अस्ति इति ज्ञात्वा मे मनसि मोदो जायते। 'नि:श्रेयसम्' इति पत्रे प्राचीनकृतीनां टीकासहितविवरणमर्वाचीनकृतिषु शोधनिबन्धा: जैन साहित्य-शास्त्रविषयानधिकृत्य लेखा: सन्ति। भवत्कार्यं साधुवादार्हं ज्ञानदायकत्वात्। अहमाचार्यप्रवरान् सूरीश्वरान् गणिवरान् प्रणमामि। भवत: कुशलं प्रार्थये।

भवदीय-

**- शाहोपाह्व: गोविंदलाल:**

७, मुकुन्द अेपार्ट., मनोरमा कोम्पलेक्ष, हिम्मतलाल पार्क के पास,
१३२ फीट रोड, आंबावाडी, अहमदाबाद-३८०० ०१५



गौरवं गुजरातस्य भारतस्य, च गौरवम् ।
यदत्र संस्कृता सेवा, संस्कृतस्य विधीयते ॥
जागृतास्साधवश्चात्र, सुज्ञास्संस्कृतसंस्कृताः ।
संस्कृताधृतधर्मस्य, राधने सन्ति तत्पराः ॥
पठने पाठने व्यस्ताः, वार्तालापे च लेखने ।
संस्कृतं ते प्रयुञ्जन्ति, संस्कृतिं रक्षयन्त्यहो ॥
निःश्रेयस्करं मन्ये, नूनं **निःश्रेयसं** वरम् ।
तदर्थं प्रेरकाश्चैव, प्रेरिताश्चाभिनन्दिताः ॥
सर्वार्थं सर्वकारार्थं, समाजार्थं च सर्वथा ।
सद्विचारैस्सदाचारैः, करोति मार्गदर्शनम् ॥
एषा सरस्वतीसेवा, सरस्वत्याः प्रसादतः ।
उत्थानं साधयत्वस्मात्, इत्येव प्रार्थ्यते परम् ॥
संस्कृतं ये प्रशंसन्ति, ये प्रशंसन्ति संस्कृतिम् ।
भारतं ये प्रशंसन्ति, धन्यं जीवन्ति सर्वथा ॥ इति
विदुषां वशंवदत्वेन भावत्क :

* * *



निःश्रेयसायास्तु ॥

भारतीयपरम्परायां यत् 'परमपदप्रदायकं' तदेव ज्ञानम् इति स्पष्टमस्ति। **'ज्ञानं निःश्रेयसं परम्'** इत्यादिकं अत एव उच्यते।

सर्वाणि शास्त्राणि, जीवनस्य लक्ष्यत्वेन भौतिकं न, किन्तु मोक्षमेवोपदिशन्ति।

क्षणभङ्गुरं भौतिकं सुखम्, अत एव विनश्यति परन्तु मोक्षस्तु परमानन्दप्रदः, यत्र दुःखस्यात्यन्ताभावः। केवलानन्दमयत्वमेव तत्र। **'निःश्रेयसम्'** इति पदस्य एष एव भावः।

कलिकालसर्वज्ञेन आचार्येण हेमचन्द्रेण **'अभिधानचिन्तामणिः'** इति कोशे, **निःश्रेयसम्** इति पदस्य 'मोक्ष' एव अर्थः निदर्शितः। (श्लोक-७४)

शब्दकोशेषु नि (निर्-निस्) इत्यस्य अष्टादश-अर्थसंदर्भाः यथा 'निःश्रेयस्' इति पदे अर्थः अपेक्षितः तथा, आधिक्ये स्वीकृत्यै च। निश्चयात्मकतार्थं अस्ति सङ्केतः।

एवं जाते, **'निःश्रेयसम्'** इति संज्ञायाः अर्थः निश्चयेन मोक्षः निश्चयेन कल्याणम्, निश्चयेन दुःखाभावः, आत्यन्तिकं कल्याणम् इति वा प्रतिफलति।

श्रेयः इति पदस्य कल्याणं, मोक्षः उत्तमम् शान्तिः, इत्यादयः अर्थसंदर्भाः आत्यन्तिककल्याणस्यार्थं सूचयन्ति। 'निः' इति अस्य संगत्या, तत्र निश्चयः दृढत्वं वा सूच्यते।

अस्य सामयिकस्य **'निःश्रेयसम्'** इति नामाभिधानं विचारयद्भिः आचार्यवर्यैः,

आत्यन्तिकमोक्षप्राप्ति- पर्यन्ता भावना विचारिता, प्रेरिता, निजाशीर्वादैश्च दृढीकृता इति मन्ये। प्रार्थ्यते गुरुचरणानाम् आशीर्वादानां सार्थक्यम् अस्मज्जीवनेऽपि इति शम्।।

**डॉ. वासुदेव पाठक : 'वागर्थः'**
३५४, सरस्वतीनगर, आंबावाडी, अहमदाबाद-१५.
टेलीफोन : ०७९-२६७४५७५४

---

परमादरणीयाः श्रीमुनि**सम्यग्दर्शनविजय**महोदयाः !

जयतु भारती ।

भवद्भिः प्रेषितं निःश्रेयसं संस्कृतपत्रम्-३ प्राप्तम् । तदर्थं धन्यवादः। भवद्भिर्मया विरचितं श्रीवर्धमानमहावीरस्तवन-पञ्चकं, श्रीसरस्वत्या वन्दनञ्च निःश्रेयसे प्रकाशितम्, तदर्थमहमाभारं मन्ये । भवदीय-सम्पादकीयम्-अमूल्यं संस्कृतं धनं सारगर्भितममूल्यञ्च लेखजातं वर्तते । अस्मिन् सम्पादकीये भवद्भिः श्रुत-ज्ञान-चिन्ताज्ञान-भावनाज्ञानस्वरुपाणि सम्यगवबोधितानि सन्ति । अत्र प्रकाशिता लेखाः स्वस्वविषयान् सम्यक् प्रस्तुवन्तीति शम् ।

भवदीयः

**(डॉ. रामकिशोर मिश्र)**
खेकडा (बागवत) उ.प्र.

---

सम्भाषणसन्देशोक्त-प्रथमाङ्कस्य समालोचना...

**निःश्रेयसम्**

**सम्पादकः - मुनिः सम्यग्दर्शनविजयः**

**प्रकाशनम् - श्री विजयहीरसूरीश्वरजी श्रुतज्ञानभवनम्**

ए-१, घनश्यामपार्क फ्लेट्, १७, आनन्दनगर सोसायटी
त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद (गुज.)
आकार: - १/८ डेम्मी, पुटा: - १३३
(शुल्कविवरणादिकं न प्रकाशितम्)

**'निःश्रेयसम्'** इत्येतत् नूतनं संस्कृतपत्रम्। षाण्मासिकी पत्रिका एषा। पौषशुक्लत्रयोदश्यां आषाढकृष्णचतुर्दश्यां चेति वर्षे द्विः एतस्याः अङ्कौ प्रकाशयिष्येते। श्रीमद्विजयरामचन्द्रसूरीश्वराणां दीक्षाशताब्दीं निमित्तीकृत्य एतस्याः षाण्मासिक्याः प्रकाशनम् आरब्धमस्ति इति वदति सम्पादकीयभणितिः। यः प्रथमः अङ्कः प्रकाशितः तत्र खण्डद्वयं प्राचीनाः कृतयः, अर्वाचीनाः कृतयः चेति। प्राचीनकृतिविभागे विविधिस्तुतिचतुष्किकाः, भक्तामरस्तोत्रम्, अर्हन्नाम-सहस्रसमुच्चयः, नेमिजिनस्तुतिः च सन्ति। अर्वाचीनकृतिविभागे श्री

शारदाद्वात्रिंशिका इत्यादय: **उपविंश्य:** कृतय: सन्ति। 'नि:श्रेयसम्' इत्यस्य अर्थविवरणं कृतमस्ति अर्वाचीनकृतिविभागे कस्मिंश्चित् लघुलेखे। पत्रिकाया: प्रथम: अङ्क: कदाचित् कष्टेन सम्पादित: सन् सामान्य: भवति, कदाचिच्च सुप्रयत्ननिरुढ: सन् प्रभावोत्पादक: अपि भवति। नि:श्रेयसस्य प्रथम: अङ्क: तु निश्चयेनास्ति प्रभावोत्पादक:। शुल्कादिविवरणं प्रथमे अङ्के न दृश्यते। अग्रिमे अङ्के तादृशं विवरणं प्रकाश्येत इति भावयाम: वयम्।

**- जनार्दन हेगडे...**

---

मान्यवरेषु विद्वद्वरेण्येषु मुनिवरेषु **सम्यग्दर्शनविजय-**
महोदयेषु सविनय-प्रणामाञ्जलय:।
महानुभाव!

भवद्भि: सम्प्रेषितं **'नि:श्रेयसम्'**-इति संस्कृत-पत्रिकाया: तृतीयाङ्कम् सम्प्राप्य भृशमनुगृहीतोऽस्मि। अनेके धन्यवादा: स्वीकुर्वन्तु महामान्या: प्रकाशन-प्रतिष्ठानश्चेति।

भारतीयसंस्कृतौ **'नि:श्रेयसम्'** इति पदं सर्वोच्चकल्याणस्य निदर्शकम्। तदनुसारिणी पत्रिकेयं **'नि:श्रेयसम्'** इति नाम्न: सार्थक्यं प्रद्योतयन्ती प्रभूत-चिन्तन-सम्पुष्टा निर्दोषमुद्रणयुता सम्यक्-सम्पादिता शोधसंदृष्ट्या महदुपयोगशालिनी सर्वगुणसम्पन्ना च वरीवर्तते।

पत्रिकायामस्यां प्राचीनानामर्वाचीनानाञ्च सुकृतीनां युगपत्प्रकाशित-समवायो भृशं प्रमोदावह:। एवञ्च वैज्ञानिकविद्यान्वित-सुसम्पादितानां दर्शन-धर्म-संस्कृति-साहित्येतिहासकलाप्रभृति-विषयेषु रचनानां विन्यासमत्र दृष्ट्वा मोमुद्यन्ते नश्चेतांसि।

उदात्तादर्शानां जीवनमूल्यानाञ्च सम्वर्द्धनाय प्रचाराय प्रसाराय च सततोद्यमशीला पत्रिकेयं सुरभारत्या: महत्प्रचारं विधास्यति इत्याशास्महे।

अस्या: संस्कृतपत्रिकाया: भूरिप्रसार: प्रचारश्च भूयादिति कामयामहे।

**'नि:श्रेयसं'** पत्रिकाया: सम्पादकवर्य्या: प्रकाशकश्चाऽनेकशो धन्यवादार्हा:।

शुभाकाङ्क्षी

**प्रो.डॉ.भागचन्द्रो जैनो 'भागेन्दु'**
संस्कृत-प्राकृत तथा जैन विद्या अनुसंधान केन्द्र
२६, सरस्वती कोलोनी, दमोह-४७० ६६१ (म.प्र.)
मो.: ०९४२५४-५५३३८

---

अंक बरोबर जोइ लीधो छे । गाडी बरोबर - मक्कमतापूर्वक पाटा उपर आगळ वधी रही छे । अे जोइने जाणीने खूब आनंद थयो छे । आ ज रीते तमो आगळ वधतां रहो । पूज्योनी कृपाथी-आशीर्वादथी अने सहायथी तमोने खूब खूब सफळता मळो अे ज अंतरना आशीर्वाद । आनी पाछळ एकरुप बनीने करोडरज्जुनी जेम कार्य करनार मुनिराज श्री **सम्यग्दर्शन**विजयजी म.सा.ने खूब खूब धन्यवाद ।

**- रत्नभूषणसूरि**

# श्री निःश्रेयसम्

संस्कृत-पत्रम्

४

## खण्ड-१

## प्राचीन कृतयः

## ।। सम्यक्त्वदीपिका स्नात्रपञ्चाशिका ।।

**साध्वीवर्याश्रीचिन्तनप्रियाश्रियः**

(इयं कृतिः सम्यक्त्वदीपिका-स्नात्रपञ्चाशिका-नाम-कथावल्लीसमन्विता-सम्यक्त्व-भाववर्धिनी समस्ति। यद्यपि स्नात्रपञ्चाशिकाः प्रभूततराः सन्ति तत्रेयं सम्यक्त्वदीपिका भवानन्तदुर्लभ-सम्यक्त्व-प्रदात्री। श्रमणभगवन्महावीरशासने सूरिश्रेष्ठश्रीउदयोदधिप्रवरैः वैक्रमीय १८५४ तमे समे संरचिता। वैक्रमीय१९५७ तमे समे कल्लारामनाथलिखिता लब्धा च बडौदानगरस्थितजैनज्ञानमंदिरे ६३ तमेऽङ्के संस्थिता । कथाग्रंथोऽयं सत्यतत्त्वप्रदायको भविष्यतीति शम् एतद्-बृहत्तरग्रन्थः, तेन चतुर्धा विभक्तः आद्यः प्रस्तूयते। **संपादिका**)

**पूर्णानन्दमयं महोदयमयं, कैवल्यचिद्दृङ्मयं,**

**रूपातीतमयं स्वरूपरमणं, स्वाभाविकीश्रीमयम् ।**

**ज्ञानोद्योतमयं कृपारसमयं, स्याद्वादविद्यालयं;**

**श्री सिद्धाचलतीर्थराजमनिशं, वन्देहमादीश्वरम् ।।१।।**

**श्रीमद् युगादीश्वरमात्मरूपं, योगीन्द्रगम्यं विमलाऽद्रिसंस्थं,**

**सज्ज्ञान सद्दृष्टि - सुदृष्टतत्त्वं, श्री नाभिसुनुं प्रणमामि नित्यं ।।२।।**

**श्री शत्रुञ्जयशैले, तिलकोपमादिदेवं नत्वा,**

**श्रीश्रुतदेवीचरणं, गुरूपादाम्भोजमपि सम्यक् ।।३।।**

**प्रणम्य श्रीजिनान् सार्वान्, चर्तुविंशति - संमितान्**

**स्नात्रपञ्चाशिकां वक्ष्ये, भव्यानां बोधिहेतवे ।।४।।**

**व्याख्या।** प्रणम्य इति मनोवाक्कायै र्नत्वा, सार्वान् सर्वज्ञान् केवलज्ञान - केवलदर्शन धारकान्, जिनान् चर्तुविंशति -सङ्ख्यकान् श्री शत्रुञ्जयतीर्थालङ्कृत -

ऋषभादि - वर्धमान - पर्यवसानान्, नमस्कारं कृत्वा, **स्नात्रपञ्चाशिकाभिधं** प्रकरणं अहमिति ग्रन्थकर्ता वक्ष्ये, अभिधास्ये कथयिष्यामि, कस्मै? भव्यजीवानां धर्माभिलाषूणां सम्यक्त्वप्राप्तुं(तु)कामानां प्राणिनां बोधिः- सम्यक्त्वं, तत्प्राप्तिहेतवे, सम्यक्त्वप्राप्तिकारणाय, ततोऽर्हत्पूजा स्नात्र- गुणग्रामगान-स्तुति-स्तवनादिकरणात् अप्राप्त-सम्यक्त्वसत्वानां भव्यजीवानां सम्यक्त्व प्राप्तिः स्यात्। ये तु प्राप्तदर्शन-गुणा-स्तेषामपि क्षायिक-भावोत्पन्नरत्नत्रय-कारणं जिनपूजा भवेत्, यदुक्त-मुत्तराध्ययने '**थय-थुई-मंगलेणं भंते! जीवे किं जणइ? गोयमा! थय-थुई मंगलेणं जीवा नाणदंसणचरित्तलाभं जणइ...**' इत्यादि वचन-प्रामाण्यात्, सदैव सद्विधिना भव्यप्राणिभिः श्रीजिनपूजा कर्तव्या, तथा परमात्मदर्शनात् दुरितपुञ्जध्वंसो भवेत्, त्रैलोक्यभूषणवीतरागवन्दनतः मनोभीष्टार्थं- सिद्धिं लभेत् (त)। श्रीजगत्-परमेश्वरपूजाकरणात् पौद्गलिकसंपत्तिः- सार्वभौमेन्द्रपदवी-राज्यऋद्धिधन-धान्यादिरुपा। तथा चिदानन्दलक्ष्मीः-केवलज्ञान-केवलदर्शनयुक्ता सिद्धिसुखरूपा, एतदुभयलक्ष्मी-प्रापकहेतुका श्रीजिनसेवा स्यात्। परमात्मभक्तितोऽयं जीवः पूज्यरूपो भवेत्, श्रीवीतरागः साक्षात् सुरद्रुकल्पो विद्यते, अतः कारणात् सदा प्रत्यहं भावतोऽर्हत्स्नात्रपूजाकरणादिह भवे सुखसंपद् - राज्यर्द्धि - धन - धान्यादि प्राप्यते। भवान्तरे स्वर्गापवर्गप्राप्तिः स्यात् धनसारवत्। यदुक्तं -

**पापं लुम्पति दुर्गतिं दलयति व्यापादयत्यापदं,**
**पुण्यं संचिनुते श्रियं वितनुते पुष्णाति - निरोगताम्**
**सौभाग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः,**
**स्वर्गं यच्छति निर्वृत्तिं च रचयत्यर्चाऽर्हतां निर्मिता ।।१।।**

**सिन्दूरप्रकर ।**

अत्र श्री जिनपूजा विषये **धनसार - वणिक्** कथा लिख्यते लेशतः।

इहैव जंबूद्वीपे भरतक्षेत्रे दक्षिणभरतार्धे - मध्यखण्डे श्रीमत्पुरूषादानीयश्री अन्तरिक्षपार्श्व-बिम्बालङ्कृतं श्रीपुरनगरमस्ति, तत्र विजितारिपक्षो जितशत्रु र्नामा भूपो विद्यते स्म, तस्य शीलालङ्कार - धारिणी धारिणीत्यभिधा पट्टराज्ञ्यस्ति। तत्र

नगरे न्यायविशारदः शान्तो दान्तो धनसारनामा वणिक् परिवसति स्म, स गृहस्थो दरिद्री सदैव दुःखितो निरादरोक्तिः कुत्राप्यादरं सन्मानं च नो लभते, परं स गृही प्रकृत्या सरलस्वभावो धर्मक्रियोद्यमी, तत्वप्रसङ्गी गुणीसङ्गी, (गुणीरागी), धर्माभिलाषी, मोक्षेच्छुकः, संसारत्यागाभिलाषुक, उत्तमजीवः। सदैव सद्गुरूसमीपे भावतः श्री जैनागमं स्याद्वाद - सुधानन्दं प्रतिदिनं श्रुणोति स्म अन्यदावसरे गुरुणा ईदृशो धर्मोपदेशो दत्तः। यतः-

**-सुलहो विमाणवासो, एगछत्ताइ मेइणी सुलहा ।**

**दुलहो पुण जीवाणं जिणं-(णिं)दवरसासणे बोही ।।१।।**

सुलभः सुप्रापो विमानवासो देवलोके निवासः, एतावता देवपदवीत्वं सुलभं वर्त्तते, पुनरेकच्छत्री मेदिनीपतित्वं राजपदवीत्वमपि सुलभं - सुप्रापं विद्यते, एतावता चक्रवर्ति - वासुदेवादिपदवीसुखमपि सुलभं, परं जीवानां जिनेन्द्रशासने - वरः प्रधानो बोधिः सम्यक्त्वं तस्य प्राप्ति दुर्लभा, ईदृश्यौ गुरूमुखपद्मह्रदात् सर्वविरति - देशविरतिधर्मरूपे गङ्गा - सिन्धुनद्यौ विनिर्गते। तत् श्रुत्वा सर्वे भव्यसत्वा हृष्टा - स्तुष्टा धर्मधनं प्राप्ताः प्रमुदिताः, केचित् सम्यक्त्वं प्राप्ताः। अन्ये देशविरतिं प्राप्ताः अपरे सर्वविरतिं प्राप्ताः। तदवसरे लब्धावसरो - धनसारो वणिग् करकमलं संयोज्य विनय-युक्तो दीनवाण्या एवं वदति स्म -

अहो गुरो! पूज्य! करूणासागर! सर्वसत्त्वहितवत्सल! जगद्गुरो! अहं दुक्खि-(दुःखि)तो दरिद्री निर्धनी कथमभवं ?

तदा गुरुणा प्रोक्तं, त्वया पूर्वभवे श्रीजिनेश्वरस्य पूजाभक्तिर्न कृता, सुपात्रे दानमपि न दत्तं, जीवयतना नो विहिता, **यदुक्तं-**

**नो दानं विहितं तपो न चरितं, शीलं च नो पालितं,**

**तत्त्वातत्त्वविचारणाऽपि न कृता, नो भावना भाविता;**

**सेवा साधुजनस्य भक्तिरमला, नोऽकारि तीर्थं शुभं,**

**हा! कष्टं विफलं गतो नरभवोऽरण्ये यथा मालती ।।......।।**

तेन कारणेन त्वं दुःखितोऽभूः। अधुना श्री जगन्नाथस्य पूजाऽधिकभावतोऽ

हर्निशं त्वं कुरू, यथा तव दु:खावस्था क्षपयति, सर्वसंपत्तिर्मिलति, तदा धनसारेण श्री गुरूं प्रति प्रणिगदितम् -

अहो! स्वामिन् ! अद्यप्रभृति श्रीअर्हत्पूजाक्रियां विना मुखे पानीयं नो प्रक्षेपणीयम् इत्यभिग्रहं गृहीतवान्, तद्दिनमारभ्य श्रेष्ठी नित्यमेव श्री जिनेश्वरमूर्तीनां केशर-चन्दन-कर्पूरादिभि: प्रत्यग्रसुरभि-जाति - पद्म - चम्पक-केतक - मालती - मचकुन्द - शतपत्र - कुसुमादिभिश्च पूजां करोति स्म। त्रिकरणशुद्ध्या अनया रीत्या निरन्तरं बहुमानत: प्रभो: प्रभुतां ज्ञानदृग्पथमवतार्य, पूजां कुर्वता धनसारेण पुण्योपार्जना बह्वी कृता । तत: पुण्योदयादनेकप्रकारेण लक्ष्मीर्गृहे प्रकटीबभूव । ततो विशेषेण जिनभक्तिं विदधान: श्रेष्ठी सप्तक्षेत्रे द्रव्यं वपति स्म -**यत: प्रोक्तम्**

**जिनभुवण - बिंबपुत्थयसङ्घसरूवाई सत्तखित्ताइं ।।**

इति एवमहर्निशं द्रव्यपूजां भावपूजां च कुर्वाणो धनसार: श्रेष्ठी सम्यग्दर्शनं लब्ध्वा स्वर्गायुर्बध्वा नरभवायु: संपूर्णीकृत्य, प्रथमस्वर्गे सुरोऽभूत्, ततश्च्युत्वा महाविदेहक्षेत्रे उत्तमार्यकुलेऽवतीर्य, सद्गुरूसमीपे चारित्रं गृहीत्वा, क्षपकश्रेण्या सर्वकर्म क्षपयित्वा, मोक्षं गमिष्यति।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां धनसारकथा प्रथमा समाप्ता ।।१।।**

* * * * *

**राजादनाऽधस्तनभूमिमागे, युगादिदेवांह्रिसरोजपीठम्,**
**देवेन्द्रवन्द्यं नरराजपूज्यं, सिद्धाचलाग्रस्थितमर्चयामि ।।१।।**
**पूजां कुर्वन् जिनेन्द्रस्य, जनोऽभिग्रहपूर्वकम्।**
**लभते शिवशर्माणि, वीरनैगमवत् ध्रुवम् ।।२।।**

अस्यार्थ: - यो जीवोऽभिग्रहपूर्वकं जिनेश्वरस्य पूजां कुरूते, स भव्यजीव: शिवशर्माणि - मोक्षसौख्यानि अव्याबाधलक्षणानि, लभते प्राप्नोति इत्यर्थ:, क इव

वीरवणिक्वत्, अत्र कथा-अस्मिन् जंबूद्वीपे दक्षिणभरते श्रीपुरं नाम नगरं, अनेकार्हच्चैत्यमण्डितं तत्र जितारिराजा राज्यं चकार। प्रियदर्शना पट्टराज्ञी समभूत्। तत्पुरे निर्धनो वीरनामा वणिक् परिवसति स्म। तत्पत्नी वीरमति (ती) नामाऽस्ति परमयमगारी, परमनिःस्वः, संपत्तिरहितो वर्तते, तृणगृहं कृत्वा सुखेनोपतिष्ठते स्म। वीरगृहे एका जरद्गवी, क्षीणदुग्धाऽभवत्, अन्यत् किमपि संपन्नाऽस्ति। यतः

**अन्नं नास्त्युदकं नास्ति, नास्ति मुद्ग - जुगंधरी।**

**धान्याय लवणं नास्ति, तन्नास्ति यद् विभुज्यते ।।१।। इति**

अथैकदा प्रस्तावे स वीरवणिक् अरण्ये काष्ठानि छेदनाय गतोऽभूत्, तत्र वृक्षविलोकनार्थं इतस्ततः परिभ्रमन्, चम्पकतरूलताधःस्थितं साधुवृन्द-सेविताङ्घ्रिपद्मं परमशान्तरसमग्नचित्तं संवेगरङ्गरङ्गितगात्रयष्टिं, महामुनिराजं षट्त्रिंशत्सूरिगुणशोभायमानं धर्मघोषसूरिसंज्ञं समालुलोक (लुके) तस्मिन् समये स आचार्यः भव्यजीवाग्रे धर्मदेशनां ददाति, तत्श्रवणार्थं वीरवणिक् अपि गुरूभ्यो नमस्कृत्य समीपे उपविष्टः, मुनीश्वरेणोपदेशमध्ये एवं प्रतिपादितम् यतः-

**वरपूजया जिनानां, धर्मश्रवणेन सुगुरूसेवनया।**

**शासनभासनयोगैः, सृजन्ति सफलं निजं जन्म ।।**

अस्यार्थः-जिनानां वीतरागाणां, वरा प्रधाना पूजना द्रव्यस्तव-भावस्तवरूपा परमात्मसेवना, तया कृत्वा भव्यजीवा निजं स्वीयं जन्माऽवतारं सफलं कृतकृत्यं सृजन्ति समामनन्ति इत्यर्थः । तथैवाऽसङ्ख्यातप्रदेशात्मद्रव्ये क्षायिकभावोत्पन्न-रत्नत्रयवासनार्थं सकलकर्मक्षपणार्थं वासक्षेपपूजा (१) अम्बर - कृष्णाऽगुरूप्रमुखैः सकलकर्मक्षपणार्थं धूपपूजा (२) वरसुरभियुक्ताऽक्षतेन कृत्वाऽक्षयपदप्राप्त्यर्थमक्षत पूजा (३) नवीनसुगन्धयुक्ताऽन्तरात्मविस्मेरकरणार्थं कुसुमपूजा (४) सुस्निग्धतूल-सुगन्ध्यादिसमेतो घृतस्तद्दीपकरणेन केवलज्ञानप्रदीपप्रकटनार्थं च दीपपूजा (५) अनाहारीगुणोत्पादनार्थं नैवेद्यपूजा (६) अजरामरपदफलप्राप्त्यर्थं श्रीफल-पूगीफलादिकैः फलपूजा (७) असङ्ख्यातप्रदेशे कर्माष्टप्रक्षालनार्थं तीर्थोदकैर्जलपूजा

१.अत्र कथातन्तुर्विघटितः मूलहस्तप्रतावेव।



(८) एवमष्टप्रकारेण श्रीजगत्-परमेश्वरस्य पूजां कुर्वन्तो भव्यजीवा अष्टसिद्धिं स्वर्गापवर्गसुखं च स्पृष्टम्[१], परं पुण्यप्रकृतिजनितं नरभवायुर्बबन्ध, (न्धिरे) वर्तमानं मनुष्यायुषं समाप्तीकृत्य तत्रैव नगरे जितारिराज्ञ: प्रियदर्शनाराज्ञीकुक्षौ अवततार। नवमासे सुतोऽजनि मातृपितृभ्यां स्वजनान् संतोष्य भीमकुंवर इति नाम दत्तम्, पञ्चधात्रीभि: लाल्यमान: पाल्यमानोऽनुक्रमेण पित्रा सकलकलामध्यापयित्वा (अध्यापय्य?) राज्ययोग्यं ज्ञात्वा राज्याभिषेकं चकार जितारिराजा दीक्षां ललौ । यदुक्तम्-

**शैशवेभ्यस्तविद्यानां, यौवने विषयैषिणां ।**
**वार्धके मुनिवृत्तीनां, योगेनान्ते तनुत्यजाम् (रघुवंश१)**

इति नीतिशास्त्रवाक्यं हृदये अवधार्य, जैनी दीक्षा गृहीता। भीमराजा राज्यं करोति स्म, न्यायेन प्रजां पालयति स्म-**यत:-**

**भीमकान्तै र्नृपगुणै: स बभूवोपजीविनाम् ।**
**अधृष्यश्चाभिगम्यश्च, यादोरत्नैरिवार्णव: (रघुवंश-२)**



अथ भीमभूपो महाबलवान् महाऋद्धिवान् प्रजां पालयति स्म। एकस्मिन् प्रस्तावे राजा (राज्ञि) सप्तभूमिकमन्दिरस्थे गवाक्षे उपविष्टे सति, निजनगरे विलोकमाने, अनेकप्रासादान् देवालयान् चतुरशीतिहट्टश्रेणीन् व्यवहारिमन्दिराणि चालोक्यमानेषु भूपेन निजपूर्वभवसंबन्धिनी तृणकुटी दृष्टा, उहापोहं च कुर्वाणस्य पुन: पुनरवलोकमानस्य तृणमंदिरस्य मन्दिरं, भीमभूपालस्य संज्ञापूर्वकं जातिस्मरणं समुत्पन्नम् यत: उक्तम् -

**रत्नसञ्चयग्रन्थे -**

**पूव्वभवा सो पिच्छइ, इक्कं दो तिन्नि जाव नव य भवा।**
**उवरि तस्स अपस्सओ, सुहभावो जाइसरणस्स १ (  )इत्यादि वचनात् ।**

जातिस्मरणेन कृत्वा भीमनृपस्य पूर्वभववृत्तान्त:
सर्वोऽपि संस्मृत:, तत् क्षणेन एकं काव्यं कथितं, यत:-

**तद्गेहं नतभित्ति, मन्दिरमिदं, लब्धावकाशं दिवः,**

**सा धेनुर्जरती नदन्ति, करिणामेता घनाभा घटाः।**

**स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषिता -**

**माश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं परां, प्रापितः ।। ।।**

अस्य भावार्थः कथ्यते, राजा एवं चिन्तयति मम पूर्वभवे तृणगृहं अपि अखण्डितं नाभूत्, अधुना इहभवे उच्चै र्देवभुवनसदृशाः प्रासादा लब्धाः, तत् श्री जिनेश्वरस्य पूजाफलमाहात्म्यं ज्ञायते, तथा पूर्वभवे गृहमध्ये एका जरती गवी समभवत्, संप्रतीह जन्मनि मदोन्मत्ताः श्यामवर्णाः घनघटासदृशाः गर्जारवं कुर्वाणा अनेकहस्तिघटा लब्धाः, तदपि जगत्परमेश्वरस्य सेवाप्रभावो विद्यते, तथा पूर्वभवे मम गृहमध्ये धान्यखण्डन-पेषणकरणार्थं मुशलानां शब्दम् अश्रौषं, सांप्रतमस्मिन् भवे मनोहरस्त्रीणां गीतगायनादि - धवलमङ्गलानि श्रूयन्ते तत् श्री जगन्नाथस्य पूजाफलमहिमा वर्त्तते, तथा इहभवे एकातपत्रं समस्तपृथ्व्या अधिपतित्वं मम वर्तते तद् जिनार्चाफलं विद्यते, इत्यमुना प्रकारेण काव्यस्य भावार्थः। पर्षज्जनाग्रेऽकथयत्, अहो सभ्या जना पश्यत पश्यत जिनपूजाफलमहात्म्यं, तदा सर्वेऽपि लोकाश्चमत्कृताः पुनः प्रधानादिसेवकपुरूषेण पृष्टं, हे स्वामिन्! एतत्काव्ये किं कथितं, तदा भूपेन स्वकीया - पूर्वभववार्ता समस्ता कथिता, मया श्रीजिनेन्द्रस्य पूजाप्रभावाद् एषा राज्य - संपत्तिः प्राप्ता, एवं श्रुत्वा तन्नगरनिवासिनो भव्यजीवाः मोक्षाभिलाषुकाः श्री जिनपूजायां द्रव्य-भावभेदभिन्नायां विशेषतः प्रवर्तनं चक्रिरे, अथ भीमभूपेन राजदूवार-भागे मध्यभागे नवीनमर्हच्चैत्यं कारापितं, ध्वजदण्डकलशशोभितं शाश्वतप्रासाद- सन्निभं चैत्यं कारयित्वा, पुनः श्री ऋषभदेवमूर्तिं सुन्दराकारां स्वर्णमयीं कारयित्वा सुगुरूसमीपे प्रतिष्ठां विधाय, चैत्यगर्भागारे सह महोत्सवेन संस्थापिता, ततो राजा नागरिकाश्च परमात्मभक्तिं कुर्वते स्म। एवं प्रत्यहं जिनपूजां कुर्वाणः भूपोऽन्यदा द्रव्यपूजां कृत्वा भावपूजायां प्रवर्तमानो अन्तरङ्गभावशुभपरिणाम-प्रवर्धमान - शुद्धात्मभावनां भावयन् क्षपकश्रेण्या घनघातिकर्माणि क्षपयित्वा केवलज्ञानं प्राप्तः तत्समये शासनदेव्या साधुवेषो दत्तः, बहुवर्षाणि पृथिव्यां विहारं कृत्वा अनेकान् भव्यजीवान् प्रतिबोध्य भीमकेवली मोक्षसौख्यं लेभे।

**इति स्नात्रपञ्चाशिकायां श्री जिनपूजायां वीरवणिक् कथा द्वितीया समाप्ता**

* * * * *

**आदिप्रभोर्दक्षिणदिग्विभागे, सहस्रकूटे जिनराजमूर्तीः,**

**सौम्याकृतीः सिद्धततीनिभाश्च, शत्रुञ्जयस्थाः परिपूजयन्ति ।।१।।**

**अर्हत्पूजाप्रभावेण, चन्द्रगोप इवाऽचिरात्**

**लभते भूमिभुक् मुक्तिं, सुखसन्ततिसङ्गवान् ।।२।।**

**अस्यार्थः** अर्हत्पूजाप्रभावेण चन्द्रगोप इव शीघ्रं राज्यपदवीं भुक्त्वा मुक्तिसुखं च लभते जीवः, अत्र चन्द्रगोपनृपकथा कथ्यते-

जंबूद्वीपे भरतक्षेत्रे कुसुमार्कपुरनगरे पुष्पध्वजनामा भूपो रराज, तत्पट्टराज्ञी सुशीला गुणवती चतुःषष्टिमहिलाकलासु प्रवीणा, पतिव्रता धर्मप्रतिपालिका सौम्यवदना पुष्पवती नाम्ना महिषी बभूव। तत्रैव नगरे चन्द्र इत्यऽभिधया गोपालदारको वसति स्म। स निरन्तरं वत्सरूकान् चारणार्थं अरण्ये प्रयाति, गोधनं इतस्ततश्चारयति, एकदा प्रस्तावे नदीतीरे चन्द्रगोपेन श्री जिनेश्वरस्य बिम्बं प्रकटितं दृष्टं तद् बिम्बं दृष्ट्वा -स गोपालको हृष्टः, अत्यानन्दितः परमां प्रीतिं प्राप्तः, ततो वनमध्ये सुगन्धिनि पुष्पाणि आनीय, स्वयं नदीतीरे स्नात्वा, परमात्मपूजां करोति स्म.

सन्ध्यासमये गृहेऽगच्छत्, परं कस्याऽग्रे तद्बिम्बवार्तां नो समाचख्यौ, एवं निरन्तरं जिनराजपूजां कुर्वन्, कियता कालेन चन्द्रगोपः प्रकृतिभद्रकतया मन्दकषायतया च द्रव्यतः श्री जिनेश्वरसेवनातः पुण्यप्रकृतिजनितं मनुष्यायुषं बद्ध्वा व्यापन्नः, मृत्वा च तत्रैव नगरे पुष्पध्वजभूपस्य पत्नीपुष्पवतीकुक्षौ पुत्रत्वेनोत्पन्नः, नवमासे सुतः प्रसूतः, अशन-वसनादिभिः स्वजनान् सन्मान्य **धनकुंवर** इति नाम दत्तम्, स चाऽनुक्रमेण प्रवर्धमानो द्वितीयाचन्द्र इव सकलकलासंपूर्णः षोडशवर्षीयो जातः सोऽन्यदा समयेऽश्वक्रीडाकरणार्थं बहुसुभटवृन्दैः परिवृतोऽरण्ये गतः, तत्र इतस्ततः परिभ्रमता राजकुमारेण नदीतटे तृणमन्दिरमध्ये तत्पूर्वभवपूजिता जिनमुद्रा दृष्टा, दृष्ट्वा च उहापोहं कुर्वाणस्य, पुनः पुनः श्री जिनेश्वरस्य बिम्बं अवलोकमानस्य

धनकुमारस्य जातिस्मरणं समुत्पन्नम्, तदा स्वकीयपूर्वभववृत्तान्तः विज्ञातः चन्द्रगोपभवे पूजा कृता, तस्य फलं ज्ञात्वा, लोकाग्रे पूजाफलमाहात्म्यं वर्णयति स्म, यतः-

**पापं लुम्पति, दुर्गतिं दलयति, व्यापादयत्यापदं,**
**पुण्यं सञ्चिनुते, श्रियं वितनुते, पुष्णाति नीरोगताम् ।**
**वैराग्यं विदधाति, पल्लवयति, प्रीतिं प्रसूते यशः ।**
**स्वर्गं यच्छति, निर्वृतिं च रचयत्यर्चार्हतां निर्मिता ।।सिंदुर प्रकर।।**
**।।९।।**

**अस्यार्थः-** अर्हतां भगवतां परमात्मनां अर्चा पूजा निर्मिता विरचिता सती पापं कल्मषं लुम्पति छिनत्ति, पुनदुर्गतिं नरक-तिर्यग्गतिरूपां दलयति मर्दयति, पुन-र्भगवत्पूजा कृता सती आपदं कष्टं जन्म-जरा-मरणलक्षणां व्यापादयति निवारयति, पुनः वीतरागसेवा रचिता सती पुण्यं सातावेदनीयरूपं द्विचत्वारिंशत्भेदभिन्नं संचिनुते पुष्टिं करोति, पुनः श्रियं लक्ष्मीं धन-धान्यादिरूपां वितनुते विस्तारयति, पुनः नीरोगतां शरीरनिराबाधतां पुष्णाति पुष्टिं विदधाति, पुनः परमात्मपूजा विहिता सती वैराग्यं संसारविरक्ततां पुद्गलसुखासारतां वा विदधाति करोति, पुनः प्रीतिं-, देवगुरूधर्मेषु स्नेहं पल्लवयति, पुनः यशः कीर्तिलक्षणं प्रसूते, पुनः स्वर्गं देवलोक- सौख्यं यच्छति ददाति, पुनः वीतरागसेवा विधिना विहिता सती निर्वृतिं मोक्षसौख्यं अव्याबाधै-कान्तिकाऽऽत्यन्तिकाऽनायासं चिदानन्दरूपम्, अपौद्गलिकं, स्वरूपानन्दानन्द-संदोहसंभवं, शाश्वतं, अविनश्वरं, अक्षयं, अतीन्द्रियं, केवलज्ञानं - केवलदर्शनसमुद्भूतं शुद्धात्मपरिणतिमिश्रितं ईदृशं सिद्धिसुखं परमानन्दरूपं निर्विकारं निरामयं रचयति, जिनपूजाप्रभावात् सिद्धिसुखं लभ्यते । इति काव्यार्थः। इति अमुना प्रकारेण धनकुमारेण पूजामाहात्म्यं वर्णितं, तत्श्रुत्वा भव्यजीवा जिनपूजापरायणा जाताः, धनकुमारोऽपि निजगृहमागत्य मातृपित्रोरग्रे निजपूर्वभवव्यतिकरं कथयित्वा निजनगरे नवीनं जिनप्रासादं कारयित्वा, तत् सरित्तटस्थ श्री - आदीश्वरबिंबं गर्भागारे

स्थापयित्वा, महामहेन प्रतिदिनं पूजयामास।

ततो भूपो राज्ययोग्यं कुमारं मत्वा, राज्याभिषेकं कारयामास। धनभूपालो वसुधां शास्ति स्म, पित्रा दीक्षा गृहीता, संयमं प्रतिपाल्य, स्वर्गं जगाम । अथ धनभूपोऽपि बहु संवत्सरं यावत् राज्यसुखं भुक्त्वा प्रभूतधर्मकृत्यानि विधाय,

निजदेशमध्ये प्रति नगरं नवीनसिद्धालयानि कारयित्वा, सप्तक्षेत्र्यां बहुधनव्ययं कृत्वा, प्रान्ते जैनीं दीक्षां गृहीत्वा, शुद्धचारित्रं समाचर्य, केवलज्ञानं प्राप्य, शिवसौधं अलञ्चकार इति

**स्नात्रपञ्चाशिकायां चन्द्रगोपनकथा तृतीया समाप्ता...**

* * * * *

**आदिप्रभोर्वक्त्रसरोरूहाच्च, विनिर्गतां श्रीत्रिपदीमवाप्य,**

**यो द्वादशांङ्गीं विदधे गणेशः, स पुण्डरीको जयतात् शिवाद्रौ।।१।।**

**भावेन वारिणा चारुं, पूजां तन्वन् जनः सदा ।**

**सुखानि लभते हीर-कर्बाटक इवाचिरात् ।।२।।**

**अस्यार्थ :** यो भव्यजीवो भावेन शुद्धान्तः करणेन वारिणा गंङ्गा-सिन्धु-सीता -शीतोदादिनदी-पद्महृदादितीर्थजलसमूहेन कृत्वा, चारुं मनोहरां, सदा निरन्तरं श्री जिनेश्वरपूजां तन्वन् कुर्वन्, अचिरात् सर्वसुखानि लभते - हीरकर्बाटक इव हीरककाष्ठभारवाहकवत् इत्यर्थः । अत्र तस्य कथा लिख्यते ।

वसन्तपुरे नगरे चन्द्रभूपतिः भूमिं पालयति स्म। तत्पुरे हीरनामा कर्बाटकः परिवसति स्म, स निरन्तरं काष्ठवने गत्वा, उद्यानात् काष्ठानि छित्त्वा, नगरे विक्रीणीते स्म, एकस्मिन् दिवसे महाऽटव्यां काष्ठग्रहणार्थं गतः तत्र एका महानदी वहति, तन्नदीकूले श्री जिनेश्वरस्य प्रतिमा निभालिता, निरीक्ष्य च मनस्यऽत्यन्तहर्षोत्पन्नः (हर्ष उत्पन्नः) परमप्रमुदितः तदा हीरकर्बाटकः स्वकीयभावभक्त्या कस्यचित् वृक्षस्य पत्रमध्ये पवित्रं पानीयं लात्वा, जिनेश्वरस्य प्रतिमां स्नपयामास, एवं निरन्तरं

पवित्रजलेन श्री जिनेश्वरबिम्बस्य स्नात्रं चकार, पश्चात् काष्ठान्यादाय, नगरे समागत्य, काष्ठभारं विक्रीय, स्वकीयाजीविकां कुरूते स्म। अनया रीत्या भावभक्तियुक्त्या श्रीजिनपूजां विदधन्, हीरकर्बाटकः पुण्य-प्रकृतिरूपं मनुष्यायुषं बद्ध्वाः, मृत्वा तत्रैव नगरे चन्द्रभूपपत्नीकुक्षौ सुतत्वेन समुत्पन्नः संपूर्णमासे जन्म जातम्, मदनकुमार इति नाम दत्तम्, अनुक्रमेण सोऽष्टवर्षीयो जातः, सर्वकलाकुशलोऽभूत्, एकस्मिन् काले क्रीडां कर्तुं, अश्वोपरि चटित्वा, बहुपरिवारपरिवृतो, राजकुमारो वने गतः, अग्रे गच्छता नदीतटे तत् श्रीजिनबिम्बं विलोकितं, विलोक्य च तत् क्षणेनैव राजकुमारस्य जातिस्मरणं समुत्पन्नम्, प्राग्भवा अनुभूताः, समस्तस्वकीय-वृत्तान्तवार्त्तासर्वजनाऽग्रे कथिता, मया पूर्वभवे नदीतटस्थजिनबिम्बस्य जलपूजा कृताऽभूत्, तेन पुण्यप्रभावेण अहं राजकुमारोऽभवम्, एवंविधानि सुखानि प्राप्तानि, एवं कुमारमुखात् श्रुत्वा पूजाफलमाहात्म्यं, बहवो लोका राजामात्यप्रमुखाः श्री जिनपूजासु विशेषेण प्रवर्तनं चक्रुः। अथ मदनसुन्दरकुमारोऽपि, बहुभावेन श्रीजिनेश्वरस्य भक्तिमनेकभेदभिन्नां कृत्वा, देशविरतिधर्मं समाराध्य, स्वर्गलोकं प्राप्तः। अनुक्रमेण मोक्षं प्राप्स्यति।।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपश्चाशिकायां जलपूजायां प्रति हीरकर्बाटककथा चतुर्थी समाप्ता ।४।**

* * * * *

**चउदसाणं सयसंखगाणं, बावण्णसहिआण गणाहिवाणं।**
**सुपाउआ विराजमाणा, सत्तुंजयं तं पणमामि निच्चं ।।१।।**
**गन्धपूजां जिनेन्द्रस्य, कुर्वन् भव्यः सदादरात् ।**
**मान्यत्वं सर्वलोकानां, देवानां भूभुजामपि ।।२।।**

**अस्यार्थ :** - यो भव्यजीवः, श्री जिनेन्द्रस्य जगत्परमेश्वरस्य, सुगन्धः कर्पूर-कस्तुरिकाऽम्बर - बरास-कुङ्कुम श्री चन्दनादिसुगन्धद्रव्यैः पूजां कुर्वन्, सदा निरन्तरं आदरात् भक्तिबहुमानतो वा जिनार्चां विदधते स्म। स पुरूषः सर्वलोकानां

देवानां तथा भूभुजामपि राज्ञामपि मान्यत्वं (मान्यः) स्यात्, सुन्दरश्रेष्ठिवत्, अत्र तत्कथा लिख्यते निगद्यते।

अमरपुरनगरे सुन्दरश्रेष्ठी परिवसति, महाधनवान् महाधर्मवान् बहुसम्पत्तिस्वामी विद्यते। स श्रेष्ठी गुरूमुखाद् जैनागमं श्रुण्वन्, सप्तक्षेत्र्यां निजद्रव्यव्ययं कुर्वन्, सम्यग्दर्शनशुद्ध्यर्थं निरन्तरं कर्पूर-बरास-कस्तुरीप्रमुखसुगन्धद्रव्यैः सार्धं जिनेश्वरस्य पूजां करोति, तद् अनन्तरमन्यगृहकार्याणि कुरूते स्म, तत्पूजाप्रभावेण कालमासे कालं कृत्वा, स्वर्गलोके देवोऽभूत्, तत्र सुरसुखं भुक्त्वा, ततश्च्युत्वा, अमरपुरनगरे श्रीदत्तस्य भूपस्य राज्ञी (राज्ञ्याः) उदरे पुत्रत्वेनोत्पन्नः, समये जन्म जातम्, सुन्दरकुमार इति नाम दत्तम्, महारूपस्वी दर्शनार्हो जातः, परं सुगन्धपूजाप्रभावात् कुमारशरीरे महासुगन्धता प्रादुर्भूता, कर्पूरवत् श्वासेश्वासे प्रस्वेदे च परिमलः स्यात्, तदा सर्वलोकानां राजादीनां च माननीयो जातः, राज्ययोग्यं मत्वा, भूपो निजपदं ददौ, सुन्दरो राजा जातः, बहुवर्षं यावत् राज्यसुखं भुक्त्वा, साधुसमीपे चारित्रं गृहीत्वा, कर्मक्षयं कृत्वा, केवलज्ञानं प्राप्य, सुन्दरराजर्षि मोक्षं अगमत्

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां गन्धपूजायां सुन्दरश्रेष्ठि कथा पंञ्चमी समाप्ता ।५।**

* * * * *

**चत्तऽट्ठकम्मा परिणामरम्मा, लद्धऽप्पधम्मा सुगुणेहिं पुन्ना ।**

**चत्तारि-अट्ठा-दस-दुन्निदेवा, अट्ठावए ताइं जिणाइं वंदे ।।१।।**

**चन्द्रोदयध्वजादानं, कुर्वन् वसनपूजनं ।**

**भविको भजते मुक्तिं, चन्दनश्रेष्ठिवदद्भुतम् (ताम्) ।।२।।**

**अस्यार्थः**- यो भव्यजीवः उत्तमवस्त्राणां चन्द्रोदयान् कृत्वा तथा उत्तमवस्त्रस्य ध्वजं-निर्माय, परमात्मचैत्ये बध्नाति, एवं वस्त्रपूजां यो भविकः (करोति, स मनुष्यो) मोक्षसुखं द्रुतं शीघ्रं लभते, चन्दनश्रेष्ठिवत् । अत्र तत्कथा कथ्यते .....

अत्रैव जंबूद्वीपे भरतक्षेत्रे मगधदेशे अयोध्या नाम नगरी विद्यते, तत्र चन्दनश्रेष्ठी

वसति स्म, स जैनधर्मरागी, पात्रे त्यागी, गुणे रागी, परिजनैः सह भोगी, शास्त्रे बोद्धा प्रतिदिनं गुरूसमीपे, श्राद्धसामाचारीप्रतिपादकानि शास्त्राणि स्याद्वादरूपाणि शुश्राव ।

स चन्दनश्रेष्ठी परमेश्वरस्य पूजां करोति, सुपात्रे दानं ददाति, यथाशक्त्या तपस्यां विदधाति, गुरुपर्युपासनां करोति नमस्कारस्य जापं जपति, इत्यादि श्रावकधर्माणां षट्कर्माणि कुर्वता चन्दनश्रेष्ठिनाऽन्यदा श्री जिनेश्वरस्य प्रासादे भव्य-वस्त्रोद्भूतान् चन्द्रोदयान् कृत्वा बन्धिताः, तथा शुभवस्त्रस्य ध्वजं विधाय परमात्मचैत्ये चटापितः, एवं प्रतिवत्सरं श्रीगुरूपदेशात् चन्दनश्रेष्ठी वस्त्रपूजां चकार। तत्प्रभावात् गृहे धनधान्यादि ववर्ध, यदुक्तम्-

**वस्त्रैर्वस्त्रविभूतयः, शुचितराऽलङ्कारतोऽलङ्कृतिः,**

**पुष्पैः पूज्यपदं सुगन्धितनुता, गन्धैर्जिने पूजिते ।।**

**दीपैर्ज्ञानमनावृतं निरूपमा, भोगर्द्धी रत्नादिभिः;**

**सन्त्येतानि किमद्भुतं शिवपदप्राप्तिस्ततो देहिनां ।।१।।**

**अस्यार्थः-** वस्त्रपूजाकरणात् वस्त्रप्राप्तिः लभ्यते, अलङ्कारार्चातः मुगट - कुण्डल - हार-केयूर-कटक-कटिसूत्रादिभिः श्री जिनेश्वरस्य अर्चां करोति, सः पुरूषो नानाविधानि आभरणानि प्राप्नोति। यः पुरुष पुष्पैः जिनमर्चति, सः पूज्यपदं इन्द्र - चक्रवर्ति-तीर्थेश्वरपदादिकं लभ्यते। पुनः सुगन्धपूजातः सुगन्धत्वं शरीरे प्राप्यते, पुन र्घृतदीपैर्जिने पूजिते निरावरणं ज्ञानं केवलज्ञानं केवलदर्शनरूपं संपद्यते, पूजा रत्नादिभिः परमात्मनि महिते, ऋद्धिः स्वर्गापवर्गादिसंपत्तिः प्राप्यते, एवं वस्त्रपूजा-प्रभावेण चन्दनश्रेष्ठी विपद्य, देवलोके प्रियङ्करनामा देवोऽभूत्, ततश्च्युत्वा धारानगर्यां जयशेखरनामा राजा जातः, महाप्रतापवान् सर्वारातिं विजित्य दासीकृता, अथाऽन्यदा जयशेखरभूपे निजावासे सुप्ते सति मध्यरात्रिसमये कश्चिद् देवः समागत्य एवं कथयति स्म- अहो नरराजन्! अहं तव पुण्यप्रभावेणाऽगतोस्मि, त्वया प्राग्भवे श्रीजिनेश्वरस्य वस्त्रपूजा कृता, तेनाहं नित्यं तुभ्यं दिव्यवस्त्राणि समर्पयिष्यामि, त्वं तद्देववस्त्रं परिधेहि, नात्र काचिद् विचारणा कार्या, एवम् उदित्वा देवस्तिरोदधे, निरन्तरं भूपाय दिव्यवस्त्राण्यर्पयति, ईदृशं वस्त्रपूजामहात्म्यं वीक्ष्य, तन्नगरनिवासिनो बहवो लोकाः वस्त्रपूजां वितेनिरे, जयशेखरनृपोऽपि वसनार्चाप्रभावाच्च्युत्वा सुरगतिं



प्राप्य, पुनर्नरभवं लब्ध्वा, संयमं प्रतिपाल्य, अनुक्रमेण मोक्षं गमिष्यति ।

**इति श्री सम्यक्त्वदीपिकास्नात्रपञ्चाशिकायां वस्त्रपूजायां चन्दनश्रेष्ठि-कथा षष्ठी समाप्ता। ६**

* * * * *

**जत्थेव सिद्धो, पढमं(मो) मुणिंदो, गणाहिवो पुंडरीओ विसिट्ठो।**
**अणेगसाहुपरिवारसंजुओ, तं पुंडरीयायलमच्चयामि ।।१।।**

**नृत्यपूजां जनः कुर्वन्, जिनाग्रे शुभभावतः।**
**लभते भीमरजक, इव श्रेयःसुखं द्रुतम् ।।२।।**



**अस्यार्थः**- यो भव्यजीवः श्री जिनप्रतिमाग्रे नृत्यपूजां कुरूते शुभभावतः, स भविकः द्रुतं शीघ्रं भीमरजक इव श्रेयःसुखं मोक्षसुखं लभते, अत्र भीमरजककथा - जम्बूद्वीपे भरतक्षेत्रे श्रीपुरनगरे एको भीमनामा रजकः समवतस्थे, अन्यदा प्रस्तावे पर्युषणापर्वणि समागते सति श्रावकजनः समुदायीभूय श्रीतीर्थङ्करप्रतिमायाः सप्तदशभेदभिन्नां पूजां विधाय, परमात्मबिम्बाग्रे नृत्यपूजां कुर्वन्ति स्म, तदवसरे भीमरजकोऽपि कुतुहलात् नृत्यविलोकनार्थं जिनभुवने समागतः, तत्र श्रावकलोकाः परमात्माग्रे नृत्यं कुर्वन्तो दृष्टाः। भीमरजकस्य चित्ते नृत्यकरणार्थं परिणाम उत्थितः ततः मनुष्यवृन्दमध्ये भीमरजकोऽपि परमात्माग्रे नरीनर्तते स्म, तत्र जिनबिम्बाग्रे हर्ष-संभृतेन सता नृत्यता भीमेन मनुष्यायुर्बद्धं, प्रान्ते भीमो मृत्वा, कलापुरीनगर्यां विजयसेनभूपस्य राज्ञ्या उदरे पुत्रत्वेनावतीर्णः, समये जन्म जातम्, विजयकुमार इति नाम स्थापितम्, सकलकलासंपन्नः जातः। भूपेन राज्यपदवी दत्ता, पूजाप्रभावात् महातेजस्वी महापराक्रमी न्यायवान् जातः यतः -

**सयं पमज्जणे पुन्नं, सहस्सं च विलेवणे।**
**सयसाहस्सिया माला, अणंतं गीय - वाईयं ।।**

**अस्यार्थः**- शतोपवासस्य पुण्यं श्रीजिनप्रतिमाशरीरं (रे) मयूरपिच्छिकया यतनया च प्रमार्जनात् संपद्यते, तथा परमात्माबिम्बस्य केशर-चन्दन-कर्पूर-

बरासमिश्रितेन विलेपनं कुर्वता भव्यजीवेन सहस्रोपवासस्य पुण्यं समुपार्ज्यते । अथ श्री जिनबिम्बस्य कण्ठे पुष्पमाला(लया) ध्रियमाणा(णया) लक्षोपवासस्य पुण्यं लभ्यते। अथ परमात्मबिम्बाग्रे गीत-नृत्य -वाजिंत्रादि -भावपूजा क्रियमाणा(णया)-ऽनन्तोपवासस्य पुण्यं प्राप्यते, अत्र विजयभूपेन प्राग्भवे नृत्यपूजा कृता, तेन राज्यपदवी लब्धा, अथान्यदा विजयभूपो अश्वोपरि चटित्वा बलेन संयुतो राजमार्गे गच्छन्, नगरमध्यभागे जिनप्रासादे श्रावकलोका: नृत्यन्तो दृष्टा:, तत् दृष्ट्वा जातिस्मरणं उत्पन्नम् प्राग्भव: स्मृत:, तदा पुन: विशेषत: नृत्यपूजा भूपेन नगरे विस्तारिता, प्रतिदिनं भूपश्चैत्ये समागच्छति पूजां कृत्वा स्वयं ननर्त्त एवं बहुवत्सरं यावत् परमात्मबिम्बं प्रपूज्य, नृत्यपूजां विधाय, प्रान्ते निरारम्भ-धर्मं समादृत्य शुद्धचारित्रं प्रपाल्य, घनघातिकर्मक्षयं कृत्वा केवलज्ञानं प्राप्य, मुक्तिनगरे गतो राजर्षि:।

**इतिश्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां भीमराजककथा सप्तमी समाप्ता ।**

* * * * *

**अणंतणाणीण अणंतदंसिणो, अणंतसुक्खाण अणंतवीरिणो,**
**वीसं जिणा जत्थ सिवं पवन्ना, संमेयसेलं तमहं थुणामि ।।१।।**

**नतिपूजां सदा कुर्वन्नादरात् श्री जिनेशितुः ।**
**लभते सिवशं हंस-कुम्भकार इवादरात्- ।।२।।**

**अस्यार्थ :** यो भव्यजीव: श्री जिनेशितु: श्री जिनेश्वरस्य नतिपूजां प्रणामपूजां आदरात् बहुमानत: कुर्वन्, स भव्य: हंसकुम्भकार इव अङ्गवान् शरीरवान् शिवशं मोक्षसुखं लभते प्राप्नोति इत्यर्थ:, अत्र हंसकुम्भकारकथा निगद्यते।

अत्रैव जम्बूद्वीपे भरतक्षेत्रे आर्यखण्डे चन्द्राननापुरी विद्यते, तत्र रणाङ्गणसूरो राजा, धारिणी प्रिया विद्यते, तत्रैव नगरे हंसकुम्भकारोऽध्युवास, निरन्तरं कुम्भान् कृत्वा विक्रीणाति स्म, अन्यदा समये हंसकुम्भकारशालायां श्रुतशीलमुनि: समवसृत:,

तत्समीपे हंसेन ईदृशी धर्मदेशना श्रुता, यतः-

**यास्यामीति जिनालये प्रतिदिनं ध्यायंश्चतुर्थं फलं,**

**षष्ठं चोत्थितुमुद्यतोष्टमतपो, गन्तुं प्रवृत्तोऽध्वनि ।**

**श्रद्धालुर्दशमं बहिर्जिनगृहात्, प्राप्तस्ततो द्वादशं,**

**मध्ये पाक्षिकमीक्षिते जिनपतौ, मासोपवासं फलम् ।। ।।**

**अस्यार्थ :** यो भव्यजीवः मनसि एवं चिन्तयति 'अहं जिनालये श्री तीर्थङ्करप्रासादे प्रतिदिनं निरन्तरं यास्यामि, इति ध्यायन् एवं चिन्तयन्, चतुर्थभक्तं तपःफलं लभते, पुनः श्री अर्हच्चैत्ये यात्रार्थं निजगृहात् उत्थितुमुद्यते सति षष्टभक्तं तपः फलं लभते, पुनः श्री जिनेश्वरदर्शनार्थं मार्गे गन्तुं प्रवृतः अष्टमतपः फलं लभते, पुनः श्री जिनेश्वरगृहात् बहिःस्थितः श्रद्धालुः श्रद्धावान् गृहस्थो दशमभक्ततपःफलं लभते, एतावता जिनालये दृष्टे सति दशमभक्ततपःफलं लभते, पुनःश्री जिनगृहसमीपे प्राप्तः समागतस्तदा द्वादशभक्तोपवासफलं प्रपद्यते, पुनः सिद्धालयमध्ये प्रविष्टो नैषेधिकीं कथयित्वा चैत्यान्तर्गतः तर्हि पक्षोपवासफलं संपद्यते, यदा तीथङ्करमुद्रा नयनाभ्यां दृष्टा, शुभाध्यवसायेन निभालिता, तदा मासोपवासफलं लभते भव्यजीवः।

एतादृशीं देशनां श्रुत्वा, हंसकुम्भकार एवमभिग्रहं जग्राह अहो स्वामिन्! श्रीतीर्थङ्करचैत्यं नित्यं अहं गत्वा प्रणामं करिष्ये, एवमहर्निशं प्रणामं कुर्वता हंसकुम्भकारेण सम्यग्दर्शनं स्पृष्टम्, ततः कालमासे कालं कृत्वा सुरायुष्कं बद्ध्वा स्वर्गे देवलोके सुरोऽजनि, स्वर्गे सुखं भुक्त्वा, स्वर्गात् च्युत्वा, तुलापुरीनगर्यां जितशत्रुराज्ञः पट्टराज्ञीकुक्षौ पुत्रत्वेनावतीर्णः समये जन्म जातम्, कुन्तलकुमार नाम दत्तम् अभ्यस्तसमस्तकलः, राज्ययोग्यं मत्वा, पित्रा निजपदं दत्तं, महान् प्रतापी राजा जातः, निर्जितसमस्तशत्रुगणा एकस्मिन् समये कुन्तलभूपः निजनगरविलोकनार्थं इतस्ततः परिभ्रमन्, धर्मशाला मध्ये साधवः स्वाध्यायं कुर्वन्तो दृष्टाः, निरीक्ष्य चोपाश्रयमध्ये गतो भूपः, चर्तुज्ञानिना गुरूणा राज्ञः पूर्वभववृत्तान्तः कथितः, श्रुत्वा च जातिस्मरणं प्राप, संसारमसारं मत्वा, राज्यं त्यक्त्वा, गुरूसमीपे दीक्षां गृहीत्वा, शुद्ध-चारित्रं प्रपाल्यं, कर्मक्षयं कृत्वा, केवलज्ञानं प्राप्य, प्रणतिपूजाप्रभावात् मुक्तिं ययौ कुन्तलराजर्षिः ।

**इति श्री सम्यक्त्वदीपिकायां प्रणामपूजायां हंसकुम्भकार कथा अष्टमी समाप्ता ८**

* * * * *

**श्रीणां प्रीणातु दानैः प्रथमजिनपति, र्नाभिभूः भू-र्भुवः-स्वः-**
**सेवाहेवाकिनाकिप्रभुमुकुटतटस्पृष्टपादारविन्दः ।।**
**भूतो भावी भवत्योनणुरणुरपि वा, भावराशिः समस्तो,**
**यद्ज्ञाने(नं) तुल्यकालं प्रतिफलति यथा, स्वस्वरूपव्यवस्थं ।।१।।**
**अक्षतैः पूजनं कुर्वन्, जिनेन्द्रस्य पुरो जनः ।।**
**वर्धमानश्रियं कीर, इवाप्नोति लसन्मतिः ।।२।।**

**अस्यार्थ :** यो भव्यजीवोऽक्षतैः श्री जिनस्याग्रे स्वस्तिकं करोति, स मनुष्यः वर्धमानामत्युकृष्टां लक्ष्मीं प्राप्नोति, शुकशुकीवत्। अत्र तत्कथा निगद्यते - राजगृहनगरपरिसरे गुणशिलोद्याने क्षेमङ्करसूरिः, पञ्चशतसाधुपरिवारसंयुतः, अशोकवृक्षस्य अधस्तन-भूमिप्रदेशे निरवद्यपृथ्वीशिलापट्टके समवसृतः, नागर-नागर्यः वन्दितुमागताः - मुनीश्वरेण धर्मदेशना प्रतिपादिता, तद्देशनामध्ये ईदृक्षोऽधिकारः कथितः, यो भव्यः श्री तीर्थंकरबिम्बाग्रे प्रधानानि अत्यन्तनिर्मलानि उत्तमानि अक्षतानि ढोकयति, स प्राणी देवर्द्धिं मनुष्यसंपत्तिं च भुक्त्वा, मोक्षं प्राप्नोति, ईदृशो धर्मोपदेशो वृक्षोपरिस्थिताभ्यां शुक-शुकीभ्यां श्रुतः सन् तत् शुभध्यानवशात् कीरयुगलयोः जातिस्मरणं समुत्पन्नम् ।

ततो जिनस्याग्रेऽक्षतकुञ्(पुञ्)जस्य ढौकनमवश्यं कर्तव्यं इति अभिग्रहो मनसि सम्प्रधारितः। ततो निरन्तरं कीरयुगलं शालिक्षेत्रात् शालिकणान् चञ्चुपुटे समादाय, तद् वनस्थे श्री शान्तिनाथचैत्ये गत्वा, भगवत् पुरतः तान् शालिकणान् ढौकयति। कदा स्वस्तिकं करोति च, कदाचिदष्टमाङ्गलिकानालेखयति स्म, पश्चात् चुणकरणार्थं कीरयुगलं गच्छेत्, एवं सप्तदिवसं यावत् भगवतोऽग्रेऽञक्षतपूजां कृत्वा, तिर्यगायुःक्षये मृत्वा, देवलोके देवदेवीत्वेनोत्पन्नम्, ततः प्रथमतश्च्युत्वा

सिंहपुरीनगर्यां शुकजीवो मङ्गलापूर्यां जितशत्रुभूपस्य पट्टराज्ञीकुक्षौ सुतत्वेन समुत्पन्नः, समये जन्म जातम्, अरिमर्दन इति नाम कृतम्। सकलकलामभ्यस्य भूपपदयोग्यं मत्वा पित्रा पदाभिषिक्तः, अरिमर्दननामा राजा जातः। अथ शुकीजीवोऽपि स्वर्गाच्च्युत्वा क्षितिप्रतिष्ठितपुरे जितारिः राजा, तत्पत्नी प्रियदर्शना, तस्यां कुक्षौ पुत्रीत्वेनावतीर्णा, समये प्रसूता, चन्द्रावती इति नाम दत्तम्, पाणिग्रहणावसरे अरिमर्दनभूपाय पित्रा दत्ता, महामहोत्सवेन पाणिग्रहणं जातम्, दंपत्यौ संसारिकसुखं भुक्त्वा, राज्यपदवीं परिभुज्य च प्रान्ते जैनीं दीक्षां लात्वा, राजा राज्ञी द्वावपि दीक्षां निरतिचारां प्रपाल्य, कर्मक्षयं कृत्वा, मोक्षं जग्मतुः।।

**इति श्री सम्यकत्वदीपिकायां स्नात्रपञ्चाशिकायां अक्षतपूजायां शुकशुकी- कथा नवमी समाप्ता ९**

* * * * *

**जेणं भारहखित्ति झत्ति ववि‍अं, सद्धम्मबीअं तथा,**

**एगेणाऽवि तहा पसंतहिअओ, सो पुंडरीओ कओ।**

**'जो अट्ठावयपिट्ठिसंठिअतणू, पत्तो परं णिव्वुइं,**

**देवाणं पढमं अपुव्ववसहं, भत्तीइ वंदामि तं ।।१।।**

**कोशवृद्धिं जिनेन्द्रस्य, कुर्वन् भावाद् भवी जनः।**

**लभते नृपति-स्वर्ग-मुक्तिशर्माणि भीमवत् ।।२।।**

यः संसारीजीवः श्रीजिनेन्द्रस्य कोशवृद्धिं भाण्डागारवृद्धिं कुरूते एतावद्देवद्रव्यं समेधते, स भव्यो भवान्तरे नृपतिसुखं देवलोकसुखं चानुभूय मुक्तिशर्माणि लभते भीमवणिक्वत्। अत्र तत्कथा कथ्यते।

वर्धमानग्रामे बहवो धनाढ्या इभ्या श्राद्धाः जैनदर्शनरागिणः सम्यक्त्व-मूलद्वादशव्रतधारिणः मोक्षमार्गाभिलाषुका : स्याद्वादवाणीरसिकाः, देशतो - रत्नत्रयाराधकाः परिवसन्ति। ते सर्वेऽपि एकत्र संमील्य श्रीपर्वदिने श्रीपार्श्वचैत्ये सप्तदशप्रकारां महापूजां विधाय, मूलगर्भगृहात् बहिर्निसृत्य, देवद्रव्यवृद्धिकरणार्थं

टिप्पणिकां (टीप) कुर्वन्ति स्म। तदा स्वकीय-स्वकीय-द्रव्यानुमानेन देवद्रव्यं भाण्डागारे रूप्यमुद्रां सुवर्णमुद्रां वा सर्वे श्राद्धाः मुमुचुः। तदवसरे एको दुर्बलः निर्धनो भीमनामा वणिक् चैत्ये देवदर्शनार्थं तत्रागतः आगत्य स्वशरीरशुद्धिं कृत्वा, परमात्मबिम्बं प्रपूज्य, पुष्पमालां प्रभुग्रीवायां समारोप्य, धूपं विधाय, तृतीयां नैषेधिकीं कथयित्वा, गर्भगृहात् सप्ताष्टपदानि पश्चात् निर्वर्त्य, उत्कटिकासने उपविश्य, चैत्यवन्दनमेवं करोति भीमः यथा।

**श्रेयः संकेतशाला, सुगुणपरिमलै, र्जेयमन्दारमाला,**

**छिन्नव्यामोहजाला प्रमदभर-सरित्पूरणे मेघमाला।**

**नम्रश्रीमन्मरालावितरणकलया, निर्जितस्वर्गिशाला,**

**त्वन्मूर्तिः श्रीविशाला, विदलतु दुरितं, नन्दितक्षोणिपाला ।।१।।**

**अद्याभवत्सफलता नयनद्वयस्य, देव! त्वदीयचरणाम्बुजवीक्षणेन,**

**अद्य त्रिलोकतिलक! प्रतिभासते मे, संसारवारिधिरयं चुलुकप्रमाणः।।२।।**

एवं स्तुत्वा यत्र महाजनः देवद्रव्यवृद्ध्यर्थं टिप्पणिकां विदधते, तत्रैत्योपविष्टो भीमः, किमर्थं धनसञ्चयः क्रियते? एवं भीमेन पृष्टं, तदा महाजनेन गदितं, 'अहो भीमवणिक्! जीर्णचैत्यादि सम्यग्करणार्थ देवद्रव्यसञ्चयो विधीयतेऽस्माभिः, तदा भीमश्चित्ते चिन्तयति स्म, 'अहो धन्या एते इभ्या व्यवहारिणः, यैः परमात्मचैत्योद्धारादि कार्यार्थं भाण्डागारः क्रियते, 'अहं निर्भाग्यो निर्धनोऽधन्योऽकृतपुण्योऽशुभकर्मणा सृष्टः, भुवि भारभूतः समुत्पन्नः, आजीविकाऽपि दुर्लभा, एवं चिन्तयतश्चक्षुः सजलं कृत्वा, पश्चातापं विधाय, स्वयं स्वस्य जीर्णवस्त्रप्रान्ते एको ढब्बुकः ताम्रमुद्रा दृष्टा, तदा लज्जता भीमेन ढब्बुको भाण्डागारे मुक्तः परमप्रमुदितः, 'अहो मम अद्यापि सद्भाग्यं वर्त्तते, यतः एकापि ताम्रमुद्रा निःसृता, 'एवं शुभभावनां भावयता भीमेन पुण्यप्रकृति र्बद्धा, ततो व्याघुट्य निजगृहे गतः, तदनन्तरं कालमासे कालं कृत्वा, तत्रैव पुरे जितारि- भूपस्य राज्ञीकुक्षौ पुत्रत्वेनावतीर्णः भीमः, अवसरे जन्मजातम् द्वादशमदिने अरिमर्दनकुमार नाम दत्तम्, सकलकलामभ्यस्य, राज्ययोग्यं मत्वा, जितारिनृपेण राज्याभिषेकः कृतः ।

अरिमर्दननामा राजा जातः महाप्रतापी भूपोऽभूत्, पुनरन्यदा भूपेन नगरं निरीक्ष्यमाणेन, तदेव देवालयं निरीक्ष्य जातिस्मृतिज्ञानं प्राप्य, प्राग्भववृत्तान्तं स्मृत्वा, अरिमर्दनराजा विशेषेण जिनद्रव्यं वर्धापयामास ।

प्रान्ते तत्पुण्यं अनुमोदयन्, कालं कृत्वा, स्वर्गलोके सुरोऽजनि, अनुक्रमेण शिवं प्राप्स्यति, जिनकोशे द्रव्यवृद्धि कारणात्।

**इति श्री स्नात्र पञ्चाशिकायां कोशवर्धिनीविषये भीमवणिक्कथा दशमी समाप्ता १०**

* * * * *

**प्राचीमेकां पुनानामिह सुरसरितं, वीक्ष्य कारूण्यधाम्ना,**
**धृत्वा मूर्तीश्चतस्रः परमहितवता, येन गङ्गाचतुष्कम् ।**
**आवीश्चक्रे चतुर्दिक्समुदितजनता,-शुद्धये शुद्ध वर्ण-**
**व्याख्यावाणीविलासैः, स दिशतु कुशलं, श्री युगादीशदेवः ।।१।।**
**कुसुमैः सततं वर्यैः, भव्यपूजां जिनेशितुः ।**
**कुर्वन् जनश्चिरात् सौख्यं, लभतेऽर्जुनभिल्लवत् ।।२।।**

**अस्यार्थ :** वर्यैरूत्तमैः कुसुमैः पुष्पैः सततं निरन्तरं श्री जिनेश्वरस्य द्रव्यपूजां कुर्यात्, स जीवोऽचिरात् शीघ्रकालेन सौख्यं लभते। अर्जुनभील्लवत्। अत्र तत्कथा व्याख्यायते।

चन्द्रपुरनगरे वीरनामा भूपो वर्त्तते स्म, स न्यायवान् महाबलवान् राजा, अन्यदा शत्रुगणं विजित्य, लक्ष्मीपुरस्वामिनं भीमसेनाभिधं भूपं दुर्जयं मत्वा, तद् राज्यार्थं वीरराजा, स्वसैन्यं गृहीत्वा प्रस्थितः। व्रजन् मार्गे महारण्यं समागतम्, तत्र शिबिरं रचयित्वा, वनविलोकनार्थं इतस्ततः परिभ्रमता वीरभूपेन श्रीआदीश्वरप्रासादो विलोकितः। मध्ये गत्वा, परमात्मानं वीक्ष्य, पुनः पुनः वारंवारं प्रभुमुद्रां निरीक्ष्यमाणस्य वीरभूपस्य जातिस्मरणं समुत्पन्नम्। मूर्च्छितः भूमौ पतितः, पुनः

सैवकैः सचेतनीकृतः अमात्यादयः मूर्च्छाकारणं प्रपच्छ। तदा राज्ञा प्रोक्तम् 'अहं प्राग्भवे अत्र कानने अर्जुननामा भील्लो बभूव। एकदाऽस्य जिनेश्वरस्य भक्तितो मया पुष्पपूजा कृता। तत्पुण्यप्राग्भारात् अहम् इह भवे राजा जातः, ईदृशी राज्यदर्धिः प्राप्ता। तत् श्री परमात्मपूजाफलं ज्ञायते, तत् श्रुत्वाऽमात्यादयः सर्वे जनास्तीर्थङ्करस्य पुष्पपूजाकरणार्थं विशेषतः उद्यताः। तदनन्तरं वीरराजा तद्वनाच्चलितः। अविच्छिन्न-प्रयाणेन स्तोकदिनेन लक्ष्मीपुरे गत्वा, भीमराजानं निर्जित्य, स्वपुरे समागतः। निजनगरे श्रीजिनप्रासादं कृत्वा, महामहेन नित्यं आनर्च परमात्मबिम्बं प्रान्ते दीक्षां लात्वा, निरतिचारं चारित्रं प्रपाल्य, प्रथमस्वर्गे स्वर्गी अभूत्, ततश्च्युत्वा महाविदेहेऽवतीर्य, शिवं यास्यति।

**इतिश्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां पुष्पविषये अर्जुनभीलस्य कथा एकादशमी समाप्ता ११**

* * * * *

**स्याद्वादवाचामृतकुंडतुल्यौ, सच्छास्त्र(सु)स्वादुसुखासिकाभौ ।**

**श्रीशान्तिनाथाजितनाथदेवौ, विराजतः श्री विमलाचलस्थौ ।।१।।**

**नतिं कुर्वन् जिनेन्द्रस्यैकदा भावात् भवी जनः।**

**केशवद्विजवत् सौख्यं, लभते मानसेप्सितं ।।२।।**

**अस्यार्थ :** यः प्राणी एकदा एकवारमपि, जिनेन्द्रस्य नमस्कारं भावात् कुर्वन्, स भवी प्राणी मानसेप्सितं सौख्यं लभते, केशवविप्रवत्। अत्र तत्कथा निगद्यते - स्वर्णपुरे हेमरथराजा राज्यं चक्रे, नीतितः स्वीयं राज्यं पालयामास, निजदोर्दण्डबलेन दुर्दान्तवैरिगणा जिताः। अथान्यदासमये गज-हय-रथ-पादातिकं सैन्यं गृहीत्वा, हेमरथभूपो वीरपुरस्य भूपस्य हीरनाम्नः, तद्(राज्यं) ज्जेतुं प्रचलितः। तत्र गत्वा, युद्धं कृत्वा, हीरभूपस्य (भूपं) स्ववशीकृत्य निजनगरे समागतः, ततः प्रथमं श्रीजिनेश्वरस्य प्रासादमध्ये भगवन्मूर्तीः निरीक्ष्य, प्राग्भवजातिं स्मृत्वा, मूर्च्छां प्राप्तः। किंकरैः शीतलोपचारेण सचेतनीकृतः, पश्चात् स्वकीयसेवकाग्रे भूपेन प्रोक्तम् अस्मिन् नगरे



दुर्बलो निर्धनो केशवनामा द्विजोऽहमभवम् शीलादिगुणै र्विराजिता प्रीतिमती नाम्नी मम पत्नी आसीत्। एकदा प्रस्तावे केशवविप्रेण राजमार्गे गच्छता नगरमध्यभागे श्री पार्श्वप्रासादो दृष्टः। तत्राद्भूतां पार्श्वमूर्त्तिं दृष्ट्वा, चित्ते चमत्कृतः बहुमानतो नमस्करोति। नत्वा चेत्थं स्तौति। यदुक्तम् **'नेत्रानन्दकरी भवोदधितरी...'** ।। ।।

एवं स्तुत्वा प्रभुगुणगणरञ्जितचित्तः केशवविप्रः स्वगृहे गतः । ततो जिननमस्कारभावितमानसो कालं कृत्वा, अस्मिन् स्वर्णपुरनगरे अहं राजा जातोस्मि। तीर्थङ्कराय नमस्कारकरणात् ईदृशीसंपत्ति र्लब्धा। तर्हि सर्वेऽपि लोकाः अर्हत्पूजा प्रणामगुणगानादिषु विशेषतः उद्यता अभुवन्। हेमरथराजापि ततः च्युतः सन् भगवत्भक्तिं भावतश्चक्रे, प्राग्भवे जिनप्रणामकरणात् सर्वोत्तमा ऋद्धिः प्राप्ता पुनरग्रे नमस्कारप्रभावात् स्वर्गपवर्गादिलक्ष्मीमपि प्राप्स्यति।

**इति स्नात्र पञ्चाशिकायां प्रणामपूजापूजायां केशवविप्रकथा द्वादशमी समाप्ता १२**



* * * * *

**श्रीसूर्यदेवेन विनिर्मितस्य, श्री सूर्यकुम्भस्य जलप्रभावात् ।**

**कुष्टादिरोगाश्च समे हि न स्युः, नरो भवेत् कुर्कुटतां विहाय ।।१।।**

**सुष्ठूपकरणं मुञ्चन्, भावात् श्रीजिनमन्दिरे ।**

**लभते शर्मकमलां, ब्राह्मणीव जनो यतः ।।२।।**

**अस्यार्थ :** यो भव्यजीवः भावतः श्रीजिनेश्वरपूजानिमित्तं श्रीजिनभवने पूजायै, सुन्दरोपकरणानि कलश-भृङगार-कनकस्थाल-वालाकुञ्चिका मयूरपिच्छिकादीनि पूजोपकरणानि चैत्ये मुञ्चति, स प्राणी मुक्तिलक्ष्मीं लभतेवृणुते इत्यर्थः । **कमला ब्राह्मणी**वत्, अत्र तत्कथा लिपीक्रियते।

जम्बूद्वीपे भरतक्षेत्रे मगधदेशे अयोध्यानगर्यां निर्जितसकलारातिगणः श्री-जितारिराजा राज्यं चकार। तत्पट्टमहिषी, अप्सरासदृशी चन्द्रमुखी - शीलादिगुण

राजिता लीलावती नाम्नी बभूव। सा भर्त्रा सार्धं पञ्चवैषयिकं सुखं समुपभुञ्जन्त्यध्युवास। अन्यदा समये लीलावती भर्तारमापृच्छ्य - बहुपरिवारसंयुता, तातमिलनार्थं धारापुर्यामायाता । तत्र नगरमध्यमार्गे गच्छन्त्याः श्री आदीश्वरस्य चैत्यं निरीक्ष्य, लीलावत्याः जातिस्मरणं समुत्पन्नम्। प्राग्भवव्यतिकरं ज्ञात्वा, शीर्षं धूनयति स्म, तदा दासाद्यनुचरैः पृष्टम् हे स्वामिनि। केन हेतुना शीर्षं धुनितम् -। तदा लीलावत्या प्रोक्तम् - अहम् अस्मिन्नगरे प्राग्भवे कमलानाम्नी निर्धना ब्राह्मणी अभूवम्। (मया) श्री जिनेश्वरस्यैकवेला एका वालाकुंचिका पूजार्थं मुक्ता, तत्पुण्यप्रभावेण दरिद्रभावं अपोह्य, कालं कृत्वा, जितारिनरेश्वरवल्लभा जाता। राज्ञी स्ववृत्तमुक्त्वा, बहुभावतः परमात्मभक्तिं विदधे। अन्येपि जना अर्हत्भक्तिकरणार्थमुद्यताः । ततः प्रान्ते राज्ञी दीक्षां समादाय, तद्भवे शिवर्द्धिं प्राप्ताः।

**इति श्री स्नात्रपञ्चाशिकायां पूजोपकरणविषये कमलाब्राह्मणी कथा त्रयोदशमी समाप्ता १३**

* * * * *

**अत्यद्भुतामादिजिनेश्वरस्य, प्रोच्चैस्तरामद्भुतमादिरूपाम् ।**
**सम्यक्त्वकन्दोद्भवमेघमालां, शत्रुंजयस्थां च महामि मूर्तिम्।।१।।**
**फलपूजां जिनस्याग्रे, कुर्वन् भावाद् भवी जनः।**
**लभते गोपवत् शर्म-संततिं मानसेप्सिताम्।।२।।**

**अस्यार्थ :** यो भविको जनः श्रीकारफलानि श्रीजिनस्याग्रे भावात् ढौकयति, प्राभृतीकरोति। स पुरूषः शर्मसंततिं सुखश्रेणिं मनोऽभीप्सितं लभते दिलीपगोपवत् । अत्र तत्संबन्धोऽक्षरेण विन्यस्यते। वसन्तपुरे चन्द्राभिध इभ्यो धनाढयः व्यवहारी परिवसति स्म। अगणितधनवान्, तेन कोऽपि तद्धनसंज्ञां कर्तुं न क्षमः । परं मिथ्यात्वमदग्रस्तः सोऽन्यदा केनचिन् मित्रश्रावकेन सह शुभकर्मोदयवसात् श्री जिनेश्वरस्य चैत्ये गतः। तत्र शांतमयी परमात्ममूर्त्तिः निरीक्षिता, अत्यद्भुतां सुन्दराकारां प्रभुमूर्तिं दृष्ट्वा नयनयोरानन्दकन्दोल्लसितः पुनः पुनः प्रभुबिम्बं

निरीक्ष्यमाणस्य चन्द्रस्य जातिस्मरणमुत्पन्नम्। ततश्चन्द्रश्रेष्ठिना निजसेवकेभ्य पुरतः निज पूर्वभववृत्तान्तः प्रतिपादितः। सर्वेऽपि जनास्तन्निशम्यतां 'अहोऽहं पूर्वभवेऽस्यां नगर्यां, दरिद्री दिलीपनामा गोपोऽभवम् - एकदा वनमध्ये एकमुत्तमं सुस्वादुफलं दृष्ट्वा, भगवदग्रे ढौकितं, तत्पुण्यप्रभावात्, अहं च्युत्वा चन्द्रनामा व्यवहारी धनवान् जातः। तत् श्रुत्वा बहवः प्राणिनो फलपूजां चक्रुः। अयमपि;(चन्द्रोऽपि) विशेषतः फलार्चा विधाय सुरलोके गतः, महाविदेहे सेत्स्यति।

**इति श्री स्नात्र पञ्चाशिकायां फलपूजा विषये चतुर्दशमी दिलीपगोप-कथा १४**

* * * * *

**विश्वत्रयोद्योतकदीपिकाभा, महाध्यमाणिक्यसुकुक्षिधर्त्री ।**

**मतङ्गजस्था मरूदेविमाता, विराजते यत्र गिरौ विशिष्टा।।१।।**

**(उपजातिः)**

**स्वंपत्त्यनुसारेण, पूजां कुर्वन् जिनेशितुः।**

**लभते सुखसङ्घातं, वृद्धानारीव मानवः ।। ।।**

**अस्यार्थ :** यो मनुष्यः स्वीयसंपदाऽनुसारेण श्रीजिनेशितुः श्रीजिनेश्वरस्य पूजां करोति।। सः पुरूषः सुखसमुदायं लभते, **वृद्धानारी**वत्। अत्र तत् सम्बन्धो लेशतः प्रतिपाद्यते।

इहैव जंबूद्वीपे दक्षिणभरतार्धे अङ्गदेशे वृद्धानगर्यां जितशत्रुनामा नृपो रराज। धारणी तत्पट्टराज्ञी, तत्र पुरे महालक्ष्मीपात्रो लक्षणलक्षितगात्रः सम्यग्दर्शनधारकः परमेष्ठिमन्त्रस्मारकः, स्याद्वादवाणीरक्षकः श्री जैनशासनोद्योतकारकः कमलनामा व्यवहारिको वसति स्म। सोऽन्यदा लक्ष्मीफललब्ध्यर्थं श्री सिद्धाचलस्य सङ्घं गृहीत्वा, यात्रार्थं चलितः। तेन सङ्घपतिना समं एका वृद्धास्त्री दुर्बला निर्धनाऽनाथा खलसंबलं लात्वा, शंत्रुञ्जय-यात्रार्थं प्रचलिता। अथ कीयद्दिनेनाविच्छिन्नप्रयाणेन

दूरत: श्रीपुण्डरीकाचलो नयनाभ्यां सङ्घलोकै र्निभालित: तदा स्वर्णरूप्य-पुष्पेण(ष्पै:)- पर्वतोपत्यकाभूमिर्वर्धापिता। सङ्घपतिनाऽपि स्वर्णपुष्प-रूप्यकुसुम - मुक्ताफलादिभि **र्वर्धापित:**। पुन र्वृद्धानार्या द्रव्याभावात् भावना भाविता। ततो महता प्रयत्नेन विमलाचलसमीपे वृद्धा समागत्य, परमप्रमोदेनोपरि चटिता:, पुन: समस्त-सङ्घोप्युपरि चटित:, सूर्यकुण्डे पवित्रजलेन स्नात्वा, पवित्रधौतं परिधायोत्तमकेशर-चन्दनादीनि सङ्घर्ष्य, पुन: पुष्पमालां परमात्मकण्ठे समारोप्य, विस्तरतो महती पूजा कृता, भगवत्पुरत: शुभभावना भाविता। पुन: प्रासादशृङ्गे ध्वजारोपिता सहस्रप्रमाणा द्रव्यव्ययीकृता, विविधप्रकाराण्याभराणि रचयित्वा, अर्हद्-बिम्बे चटापितानि। एवंविधा सङ्घपतिना तथा सङ्घेन च विरचितभक्तिं दृष्ट्वा, वृद्धानार्या चिंतितम् अहो धनवद्भि: पुरुषैरीदृशी भक्तिर्विरचिता। मत्पार्श्वे किमपि द्रव्यं नास्ति। एवं चिन्तयित्वा भावनां भावयति। खलखण्डं मालाकाराय समर्प्य, एकां पुष्पमालां गृहीत्वा, श्री-जिनेश्वरस्यकण्ठे समारोप्य, भावनां भावयति, तदवसरे सङ्घपतिस्तत्रागतस्तेन मूलनायककण्ठे तादृशी पुष्पमालां दृष्ट्वा हास्यं कृतं, अरे!वृद्धे! केन एतादृशी विसदृशी पुष्पमाला प्रभुकण्ठे स्थापिता। तदा वृद्धया प्रोक्तम् 'मया प्रभुकण्ठे कुसुममाला चटापिता' पुन र्हास्येन सङ्घपतिना प्रोक्तम् हे! वृद्धे! त्वां विना ईदृशीं! पूजां क: करोति? पुन: कुसुममालां वा को रचयति' एतादृशे हास्यवाक्ये वारंवारं क्रियमाणे कपर्दीयक्ष: प्रत्यक्षीभूय गगने स्थित: सन् एवम् आचख्यौ -

अरे! वृदधे! जिनपूजाप्रभावात् मुक्तिसुखं तव भविष्यति । ईदृशं सुरवाक्यं श्रुत्वा सङ्घपतिरूर्ध्वमुख: सन् वृद्धाया: चरणकमलं ननाम, करकुड्मलं संयोज्य वृद्धां सङ्घपतिरेवं स्तौति स्म,धन्या त्वं, तव मातृपित्रो र्धन्यत्वं, त्वं कृतपुण्या तव भावभक्त्या कपर्दीयक्ष: प्रकटीबभूव। एवं सङ्घेशेन प्रोक्तम् मया अज्ञानभावात् त्वदीया तव हासी कृता, तत: त्वं.क्षमस्व त्वं उत्तमा स्त्री, अहमधन्योऽकृतपुण्यो येन यश:कीर्त्यर्थं यात्रामागतोऽस्मि पुनरीदृश्या उत्तमाया: वृद्धाया: हास्यं न करोमि, (करिष्यामि) एवं वारंवारं निजनिन्दाकरणरूपं पश्चातापं कृत्वा, गुणेषु बहुमानं विधाय, स्वात्मानं निन्दन् यात्रां कृत्वा सङ्घसहित: कतिपयदिनेन सङ्घपति र्गृहे आगत:। परंपरया शिवं यास्यति, वृद्धानारी तु सिद्धशिलायामुपसर्प्यानशनं कृत्वा, चतु:शरणा

चाऽष्टादश पापस्थानकान् विमुञ्चन्ती परमात्मस्वरूपं ध्यायन्ती शुक्लध्यानबलेन क्षपकश्रेणीं कृत्वा, समस्त- कर्मक्षयं विधायाऽन्तकृत्केवलीभूय, शिवं प्राप्ता।

**इति श्री स्नात्रपञ्चाशिकायां भावपूजायां वृद्धानारी कथा पञ्चदशमी समाप्ता १५**

# श्री निःश्रेयसम्

संस्कृत-पत्रम्

४

## खण्ड-२

## अर्वाचीन कृतयः

# ॥ कमलनिर्लेपमुनीश्वराः जयन्तु ॥

**-पूज्यपादाचार्यप्रवरश्री विजयश्रेयांसप्रभसूरीश्वराः**

श्रीसूरिरामचन्द्रप्रवरगुरुभि र्येषां चरणयुगलभासेवितं श्रीमदात्मारामपरमगुरुवरैः 'खाखी-इतिभाषायां अर्थात् निस्पृह' इति येषामुपनाम कृतमासित्, पंजाबप्रमुखप्रदेशेषु च येषां विचरणं सद्धर्मसंरक्षकं जातं तं **आचार्यप्रवरश्रीमन्तं विजयकमलसूरीश्वरं क्रमप्राप्तं स्मरामः।**

वेदवेदाङ्गवेदी, स्वकुलोचिताचार-विचारनिपुणो गौडब्राह्मणजातीय-सरसानिवासी-रुपचन्दमहोदय आसीत् तस्य च सधर्मचारिणी जिताबाई इत्येतयोरयं रामलालनामा सूनु र्जातः, वैक्रमीय १९०८ तमे वर्षे।

प्रागल्भबुद्धिं तं ज्ञात्वा शास्त्रविशारदं कर्तुकामाभ्यां पितृभ्यां जैनयतिश्रीकिशोर-चन्द्रमुनिः प्रार्थितः। पूर्वभवीयसंस्कारसमृद्धेन तेन पाठकहृदयमहारि वैराग्यार्द्रचेतोभूत्वा वि.सं.१९२० तमे वर्षे यतिदिक्षां जग्राह।

वैराग्यनिष्ठनूतनमुनिमनसि परिग्रहारंभमग्नां गुरुवृत्तिं दृष्ट्वा 'आत्म-कल्याणार्थं-यतते सः यतिः' इति यतिशब्द-व्युत्पत्तिस्मृतेः परो खेदः समजनि। गुरुभिस्त्वेतज्ज्ञात्वा प्रलोभनादिना तं समाकर्षयितुं नैके प्रयासाश्चक्रिरे। किन्तु सत्यगवेषक-सम्यग्ज्ञानभावितेन शिथिलाचारखिन्नेन तेन मुनिना तु नववर्षाणि यथा-कथञ्चित्तथैव निर्व्युढानि। काव्यालङ्कार-व्याकरणस्वपरदर्शनशास्त्राणि च पठितानि।

वि.सं.१९२९ तमे वर्षे मारवाड-पंजाबसन्धिप्रदेशे जीरासन्नवर्ति-जगरावा ग्रामे गुरुमप्यनापृच्छयैकाक्येव गत्वा जिनागममन्दिर-मूर्तिश्रद्धाभर-श्रीआत्मारामकृपापात्र-विसनचन्द्रमुनिपरिचयेन त्यागतपो-भावितान्तःकरणेन तेन

श्रावकजनकृतप्रौढसमारोहेण सह स्थानकवासिसम्प्रदायीयदीक्षा जगृहे।

विरक्तमनसैः सन्मार्गपिपासुभिरष्टादशमुनिपरिवृतैः श्रीआत्माराममुनिप्रवरै-र्गूर्जरदेशीयअमदाबादनगरे वि.सं.१९३२ तमे वर्षे पं.श्री मणिविजयविनीतविनेय-

श्रीबुद्धिविजय-(बुटेरावजी) मुनिचरणे संविग्नदीक्षोपलब्धा तदा तै: स रामलालो मुनि: श्रीकमलविजयाभिधानेन श्रीलक्ष्मीविजय-(विसनचन्द्र-मुनि) शिष्यत्वेन स्थापित:।

त्यागतपोमयमहासंयमी, स्वाध्यायध्यानमग्न: स मुनि: साक्षाद्धर्म इव चकासयामास। मुनिगणस्य गुरुवर्गस्य च चेतांसि जहार। वि.सं. १९४५ तमे वर्षे श्रीआत्मारामुनिवरेण 'श्रीजसविजयनामा' शिष्यस्तस्मै' प्रदत्त:।

यत्र तत्र सर्वत्र यथाज्ञां विहरन् स मुनिवर: श्रोतावर्गं धर्माभिमुखं कुर्वन्-मांसाहार-निषेधं प्ररुपयन्, जिनमूर्तिपूजादिसत्यं विवृण्वन्, मत्स्यहिंसानिषेधं प्रख्यापयन् सन्मार्ग-प्रकाशनं तथा चकार यथा प्रभुशासनप्रभावना वृद्धिमती बभूव।

परमगुरुश्रीविजयानन्दसूरीश्वराणां (आत्मारामजी म.) चिरविदायानन्तरं विशालमुनिगणगच्छधुरं धारयितुं क: समर्थो योग्यश्चेति चिन्ताक्रान्तगच्छाय वृद्धमुनिप्रवरश्रीचारित्रविजय-प्रमोदविजयादिभि: श्रीकमलविजयो मुनिरेव प्रदर्शित:, स मुनिवरस्तु बहुश: प्रार्थित:, प्रसादितश्च परं निस्पृहत्त्वादात्मारामत्त्वाच्च नैच्छत्। अन्ततो गत्वा गच्छस्य बहु-निर्बन्धेन वि.सं. १९५२ तमे वर्षे दिवंगत-श्रीमदाचार्यप्रवराणां पट्टे वि.सं.१९५७ तमे वर्षे गूर्जर-पाटणनगरे महामहोत्सवपुरस्सरं 'श्रीमद्विजय-कमलसूरीश्वराभिधानेन' स गच्छनायकपदे प्रतिष्ठापित:, तत्समये श्रीवीरविजयो वाचकपदे, श्रीकांतिविजयश्च प्रवर्तकपदे प्रतिष्ठापित:।

श्रीमत्कमलसूरिवरा: परमनिस्पृहमूर्तय आसन्, तेन तै: प्रकाशिता नैके अमृतवचना: स्मृतिप्रदेशे संगृहितव्या 'बनीयों के गुरु बनना हो तो सुनना सबका लेकिन करना वो जो भगवानने फरमाया हो' ''क्या बड़ी-गद्दीपर बैठने से ही आचार्यपद शोभता है? पतले आसन पर बैठने से क्या नहिं शोभता?और इससे आत्मगुणों में कुछ हानि हो जाती है क्यां?'

धूरंधरपंडितजना अपि तेषां दर्शनमात्रेण धर्मभावनाभावितान्त: करणा अभूवन्-उन्मार्गोन्मूलनं कुर्वद्भिश्च बालदीक्षा-देवद्रव्यरक्षादिबहुविधधर्मकार्याणि कुर्वद्भि: कारयद्भिश्च स्वशरीरशैथिल्यं ज्ञात्वा वि.सं.१९८१ मृगशीर्ष-शुक्ला-पञ्चमीदिने छाणीनगरे स्वपट्टेश्रीविजयदानसूरीश्वर-श्रीविजयलब्धिसूरीश्वरौ प्रतिष्ठापितौ।

भीमकान्तगुणधारयन्धर्मधूरंधरसूरीश्वरात्मारामगुरुदेवानां पट्टं प्रभावयन्त: आत्मरमणतामनुभवन्त: वि.सं.१९८३ माघकृष्णषष्ठीतिथौ-दक्षिणगुर्जरप्रदेशे-नवसारीसन्निधौ जलालपोरग्रामे समाहित-मनसनश्वरदेहं तत्यजु:। गुरुभक्तैश्च तत्र गुरुमन्दिरं निर्माय देहप्रमाणगुरुमूर्त्ति: प्रतिष्ठापिता।

अस्माकं हृदयानि पावयन्त:, जयन्तु ते सूरीश्वरा:!

# ।। रामवचनमौक्तिकानि ।।

**-पू.पंन्यासप्रवरश्री मोक्षरतिविजयगणिवराः**



* धनमभिनवं बन्धनमिव!
तद्बन्धनाद् मोचयितुं भगवता दानधर्मः प्ररुपितः।

* आहारसंज्ञा स्वादलालसा चापि बन्धनमेव । तयोर्नाशाय भगवता तपोधर्मः प्ररुपितः ।

* विषयसुखाशा पापम् ।
तद्विलयाय भगवता शीलधर्मः प्रज्ञापितः।

* स्वं महान्तं दर्शयितुमिच्छा पापम् ।
स्वं महान्तं विधातुमिच्छा धर्मः ।

* यदपि सत्यं हितकरं च प्रतिभासते तत् स्वीकुरुत, अद्यैव।
यदपि मिथ्या अनर्थकरं च प्रतिभासते तत् परिहरत, अद्यैव।
आयुश्चञ्चलम्। मनोभावास्तु पुनरायु-षोऽपि चञ्चलाः।

* यथा पापकर्मणः फलमनिच्छतोऽपि दुःखमागच्छत्येव।
तथा धर्मस्य फलमयाचतोऽपि सुखमागच्छत्येव ।

* यत्र जीवनमस्थायि तथाऽन्तहीना आवश्यकताः, स एष संसारः ।
यत्र शाश्वतं सुखमयं च जीवनम् तथा नैकापि आवश्यकता, सोऽस्ति मोक्षः ।

* सुखीभवितुमभिलाषा चेत्?
कस्मैचिन्न ददातु दुःखम् ।

* संयमी प्रतिकूलतास्वपि प्रसन्नः ।
असंतोषी अनुकूलतायामपि अस्वस्थः ।

* पठनं श्रवणं सर्वं, प्रशस्तं क्रियते यदि चिन्तनं स्वयमेव स्यात्, प्रशस्तमिति निश्चितम् ।

* सुखानामागमनम्? देवगुरुकृपा ।
दुःखानामागमनम्? स्वपापोदयः ।





* "इतरे मह्यं एतावद् दु:खं ददते" एवंविधान् विचारान् निरस्य, एवंविधं विचारयत यदुत "अहमन्येभ्य: कियद् दु:खं ददामि?"

* सर्वप्रथमं सुखस्य च दु:खस्य च विशुद्धा व्याख्या निश्चिनुताम् ।
किं दु:खं? पराधीनता ।
किं सुखं? स्वाधीनता ।
अथ निर्णीयताम्
कुत्रपराधीनता? कुत्र स्वाधीनता?
संसारे तु सर्वेषामस्माकमनुभवोयं, यदुत पदे पदे कर्माधीनता बाधतेऽत्र ।
मोक्षे तु न तथा! सर्वकर्मक्षयो हि मोक्ष:। मोक्षे स्वाधीनता। अतो वारंवारं निवेद्यते-
संसारे दु:खमेव।
मोक्षे सुखमेव।

* व्यापारे यावद्भयमर्थहानेर्भवति भवताम्, तावद् भयमन्यायस्य चौर्यस्य मृषावादस्य वा भवति किम्?

* संपत्ति:, शरीरशक्ति:, वैदुषी च दुर्लभा। एतस्या: सदुपयोगस्तु सुदुर्लभ:।

* नैवं पृच्छामि, यदुत "भवान् कियन्तं धर्मं करोति? अहं केवलमियदेव ज्ञातुमिच्छामि, यदुत "धर्मो भवते कियान् रोचते?"

* केवलं संसारसुख-कामनया क्रियमाणो धर्मो यत् सुखं दत्ते, तदनन्तकालं यावद् दु:खमयीषु दुर्गतिषु जीवं भ्रामयति?

* संसारपरिभ्रमणं रोग:, मोक्ष आरोग्यम्, धर्म: औषधि:, धर्मप्रवृत्ति पथ्यम्, पापप्रवृत्ति: कुपथ्यम्।

* नात्मचिन्ता न मोक्षेच्छा,
यस्य पापभयं च न ।
दुर्गतौ प्रपतन्तं तं,
रक्षितुं कोऽपि न क्षम: ।।१।।

* यावान् पुरुषार्थ: संसारे निवसन्नेव सुखीभवितुं कृत:, तावान् यदि संसारत्यागाय भवेत्, तदा मोक्षस्तु हस्ततलगत:।

* पार्श्ववर्तिषु गृहेषु मार्गेषु वा कस्मिंश्चिद् दु:स्थिते सति, दयाशील: सुखानि भोक्तुं कथमिव समर्थ:?

* न चेदिच्छसि दु:खानि,
व्रज मोक्षं सदासुखम् ।
मोक्षं काङ्क्षसि चेत् तर्हि,
प्रव्रज्यामुररीकुरु ।।२।।

## ।। पुस्तकसमीक्षा ।।

### १ ।। हेमचन्द्रव्याकरण ढुण्ढिका ।।

**-देवर्षिकलानाथशास्त्री**

कलिकालसर्वज्ञेति महिमशालिनाऽभिधानेन सूचितैः श्रीहेमचन्द्राचार्यैः शब्दकोषः व्याकरणम्, छन्दोऽनुशासनम् इत्यादयो युगप्रवर्तका ग्रन्थाः प्रणीता अभूवन्निति विदन्त्येव सुधियः। तेषां व्याकरणस्य सिद्धहेमचन्द्रशब्दानुशासनस्य सूत्राणि बोधयितुं प्रतिसूत्रं तत्रोपदिष्टानुशासनानुसारं यथा प्रयोगा निष्पद्यन्ते तान् सूचयित्वा छात्रान् सरलतया पाठयितुं (प्रयोगसूच्या सविवरणोदाहरणसूच्या वा प्रकारेण) केनचन विदुषा **"ढुण्ढिका"** विरचिताऽऽसीत्। अज्ञातकर्तृकामिमां ढुण्ढिकां पाण्डुलिपिरुपेण प्राप्य गुर्जरेषु स्वसाधनया लोकानुपकुर्वद्भिः श्री **विमलकीर्तिविजया**ख्यमुनिवर्यैरस्याः सम्पादनं कृतम्। तस्या ढुण्ढिकायाः अनेके भागाः प्रकाशमाप्ताः।

प्रथमे खण्डे प्रथमाध्यायः द्वितीयाध्यायस्य च प्रथमः पादः समाविष्टोऽस्ति। परवर्तिषु खण्डेषु परवर्तिनोऽध्यायाः प्रकाश्यन्ते। अन्ते च सर्वेषामुदाहरणानामस्मिन् भागे समाविष्टानां वर्णक्रमानुसारिणी सूचनिकाऽप्यस्ति। इत्थं क्रमिकरुपेण समस्ताऽपि ढुण्ढिका प्रकाशयिष्यत इत्याशास्महे। अद्यावधि–अष्टौ भागाः प्रकाशिताः।

* * * * *

### २ ।। राजस्थाने संस्कृत पत्रकारता ग्रंथः।।

भारते संस्कृत पत्रकारताया इतिहासः १८६६ ई. वर्षमारभ्याद्यावधि निरन्तरमुद्रयमानोऽस्ति। राजस्थानेऽपि १८८० ई. तः **संस्कृतपत्रकारताया** इतिहास

उपलभ्यते (यदा विद्यार्थीत्याख्यं पत्रं नाथद्वारतः प्रकाशितं) । तदनन्तरं तु ''संस्कृतरत्नाकर'' (१९०४ई.) पत्रेण यशोध्वज उद्धूतो जयपुरात्। अद्यापि ''भारती'' पत्रं षष्टिवर्षीयेतिहासस्य धनिकम्। सर्वस्यास्येतिहासस्य विवरणं शोधोपाधये डॉ. चेतनया व्यलेखि संस्कृते। तदिदं सम्प्रति सम्पादनान्तरं ग्रन्थाकारतया प्रकाशितमिति प्रमोदास्पदम्। डॉ. चेतना सम्प्रति न्यायिकसेवायामधिकारि-पदमधितिष्ठति। न्यायाधीशेन लिखितोऽयं ग्रन्थो राजस्थानीयानां संस्कृतपत्रिकाणां विवरणं-षट्सु-सविवरेष्वध्यायेषु प्रस्तौति। अत्र पत्रिकाणां विषयवस्तु समीक्षा, प्रसिद्धपत्रकाराणां (सम्पादकानां) परिचयः पत्रिकाणामतीतं वर्तमानं, भविष्यच्च इत्यादि विषया विवेचिताः सन्ति।

इदमपि सूचयन्तः प्रमोदामहे यत् डॉ. चेतना सुविख्यातानां तपःपूतजीवनानां राजस्थाने, भारते च मुख्यन्यायाधिपति-सर्वोच्चन्यायाधिपत्यादिपदान्यधिष्ठितवतां प्रसृतयशसां न्यायमूर्ति **श्रीहरबंसलाल** महाभागानां सुयोग्या पुत्री। ग्रन्थेऽस्मिन् परिचय पत्रके एव न, अपि तु भूमिकाचतुष्टयं यदत्र विविधानां महापुरुषाणां मुद्रितमस्ति तत्राऽपि न कुत्रचन सोऽयमुल्लेखो दृष्टोऽस्माभिर्यत् डॉ. चेतना न्यायाधिपति महाभागानां सुता इति। इदं तु प्रशस्यं तथ्यमस्ति, अस्य सूचने कीदृशी लज्जेति न ज्ञातुं प्रभवामः। अस्तु। दुर्लभाः खलु **संस्कृतपत्रकारताविवेचका** ग्रन्था अद्यत्वे, इति सुतरां स्वागतमस्य ग्रन्थस्य क्रियते संस्कृतजगतीति कामयामहे।

* * * * *

१ = श्री हेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका= (क्रमिकरुपेण प्रकाश्यते) सम्पाः-मुनि विमलकीर्तिविजयः, प्रका.-कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्य नवमजन्म-शताब्दीस्मृतिसंस्कारशिक्षणनिधि, श्रीविजयनेमिसूरीश्वर-स्वाध्यायमंदिर-१२ भगतबाग, नया शारदामंदिर रोड, पालडी-अहमदाबाद-

प्रथम विभागस्य पृ.सं.-२५० मू.-२५०/-

* * * * *

२ = राजस्थान-संस्कृत-पत्रकारता: ले.डॉ.चेतना, प्रकाशिका - स्वामी मोहनदास-सेवा समिति, वेष्णोमाता मंदिर, ११८, नेमीनगर, जयपुर. पृ.सं.२१०- मू.-१७८



## धनाक्षरी

भारतसुधाब्धावद्य, चर्वितुं निरीहजीवान्।
त्वङ्गन्तस्तिमिङ्गिलास्त्वरन्ते मकरैः समम्।
क्षीयतेऽस्य लक्ष्मीः, परिहीयते च मूल्यविधा।
भारतीयबन्धो! किमु, पश्यस्येनमुत्क्रमम्।
त्वामेव ह्वयामश्छिन्धि दुरितानुषक्तिघटा।
जनगणशक्तिकुलिशेन, भिन्धि सम्भ्रमम्।
हिंसाऽऽतङ्कदंशहर!, दिव्यज्योतिरंशधर!।
विक्रमस्य वंशधर!, दर्शय पराक्रमम्।।

महामहोपाध्याय देवर्षि कलानाथ शास्त्री
अध्यक्षः-आधुनिक संस्कृतपीठस्य,
ज.रा. राजस्थान संस्कृत विश्वविद्यालये,
जयपुरम् : ०१४१-२३७६ ००८

* * * *



सज्जनपञ्चचिन्हानि, नम्रता प्रियभाषणम् ।
समन्वयः सदाचारः, विश्वबन्धुत्वदर्शनम् ।।

दुर्जनपञ्चचिन्हानि, गर्वो दुर्वचनम् तथा ।
हठश्चैव विवादश्च, परोक्तम् नहि मन्यते ।।

# ।। गीत-वीतराग प्रबन्धः ।।

## एकमवलोकनम्

**-डॉ. एच. वि. नागराजराव्**

१. कर्णाटदेशे देवभाषासाहित्याभिवृद्धौ जैनानां मुख्यं पात्रमस्ति । भगवज्जिनसेनाचार्यादयो महाकवयोऽत्र स्मरणीयाः। तदुत्तरकालेऽपि नानाकृतयो जैनविद्वद्भिररच्यन्त तन्मध्ये गीतवीतरागाख्यस्य काव्यस्य परिचयं कारयितुं प्रस्तुते लेखे प्रयत्नो मया क्रियते।

२. **गीतगोविन्द**नामकाव्यं **जयदेवरचितं** संस्कृतप्रपञ्चे सुप्रसिद्धम्। प्रायशो द्वादशे शतके (१२) तस्य रचना बभूव। तस्यात्यन्तजनप्रियत्वं वीक्ष्यान्ये कवयस्तामेव शैलीम् अनुसृत्यान्यानि काव्यानि स्वाभिमतदेवताविषयकाणि रचयामासुः । गीतगौरीपति, गीतराघवम् इत्यादीनि तादृशानि। तथैव जैनमतानुचार्या **पण्डिताचार्याख्यः** कविः **गीतवीतरागप्रबन्धं** निबबन्ध। ग्रन्थोऽयं डॉ. आ. ने. उपाध्येमहाशयेन सम्पादितः भारतीयज्ञानपीठेन क्रिस्तशक १९७२ तमे वर्षे प्रकटितः।

३. ग्रन्थकर्ता **पण्डिताचार्य** इत्यत्र न कोऽपि सन्देहः। ''इति श्रीमद् अभिनवचारुकीर्त्तिपण्डिताचार्यवर्यस्य कृतौ गीतवीतरागे महाबलस्य सद्धर्म-प्रशंसाविवरणो नाम प्रथमः प्रबन्धः'' इति पुष्पिकायाः दर्शनात्। ग्रन्थस्याध्यायाः प्रबन्धनाम्ना आहूताः। सर्वत्रान्ते नाम तथैव दृश्यते। अपि च ग्रन्थान्ते केचन श्लोका अपि अभिप्रायमिमं दृढयन्ति। यथा-

**गाङ्गेयवंशाम्बुधिपूर्णचन्द्रो, यो देवराजोऽजनि राजपुत्रः।**

**तस्यानुरोधेन च गीतवीत-रागप्रबन्धं मुनिपश्चकार ।। (२४.१३)**

**द्राविडदेशविशिष्टे, सिंहपुरे लब्धशस्तजन्मासौ।**

**बेळ्गोळपण्डितवर्यश्चक्रे श्रीवृषभनाथवरचरितम्।।**

**स्वस्ति श्री बेळ्गोळे दोर्बलिजिननिकटे, कुन्दकुन्दान्वयेनो;**

**भूस्तुत्यः पुस्तकाङ्कश्रुतगुणभरणः, ख्यातदेशीगणार्यः।**

**विस्तीर्णाशेषरीतिप्रगुणरसभृतं गीतयुग्वीतरागं**

**शस्तादीशप्रबन्धं बुधनुत-मतनोत्पण्डिताचार्यवर्यः।।इति।।**

४. अनेनैतदपि ज्ञायते यदेषग्रन्थकारो द्राविडदेशे (तमिळुनाडु इति अधुना कीर्त्यमाने) सिंहपुरे संजातः। ततः कर्णाटदेशस्थे श्रवणवेळ्गोळ –इति प्रदेशे संन्यासी भूत्वा अभिनवचारुकीर्त्तिरिति दीक्षानाम लेभे। तत्रैव दोर्बलि (बाहुबलि) निकटे गीतवीतरागप्रबन्धं रचितवान्। रचनायां च मुख्यं कारणं गाङ्गेयवंशस्य देवराजाख्येन राज्ञा कृतोऽनुरोधः। अस्य काव्यस्य वस्तु वृषभनाथतीर्थङ्करस्य चरितम्। कविरात्मानं कुन्दकुन्दान्वयं कथयति। एवं पुस्तकगच्छ देशीगणः तस्येति। आ. ने. उपाध्ये (आदिनाथनेमिनाथोपाध्याय) महाशयः, नाना प्रमाणैः गीतवीतरागस्य रचना प्रायशः क्रिस्तशकपञ्चदशशतकस्यादिभागे बभूवेति निश्चितवान्।

५. यथा गीतगोविन्दे तथा गीतवीतरागेऽपि प्रत्यध्यायं कानिचन पद्यानि नानाछन्दोनिबद्धानि विद्यन्ते। ततो रागानुसारेण गेया अष्टपदी विद्यते। ततः पुनर्द्वित्राणिच्छन्दोनिबद्धानि पद्यानि। अष्टपदीषु माधुर्यप्रसादौ विलसतः। जयदेवस्यानुकरणं भूयो भूयो गोचरीभवति। कवेर्देवभाषापाण्डित्यं कविताचातुर्यं च सहृदयहृदयाह्लादकं विद्योतते।

६. ग्रन्थादौ वृषभनाथस्य प्रार्थना कविना क्रियते। यथा–

**विद्याव्याप्तसमस्तवस्तुविसरो, विश्वैर्गुणैर्भासुरो,**

**दिव्यश्रव्यवचःप्रतुष्टनृसुरः, सद्ध्यानरत्नाकरः।**

**यः संसारविषाब्धिपारसुतरो, निर्वाणसौख्यादरः;**

**स श्रीमान् वृषभेश्वरो जिनवरो, भक्त्यादरान् पातु नः ।।इति।।**

द्वितीयतृतीयपद्ययोरपि तद्वन्दनं दृश्यते। तस्य पूर्वभवेषु यानि नामान्यासन् (जयवर्म-महाबल-ललिताङ्ग-वज्रजङ्घ-आर्य-श्रीधर-सुविधि-वज्रनाभ-सर्वार्थ-सिद्धि इति) तानि कविना सूच्यन्ते। महाबलराजं प्रति स्वयंबुद्धो नाम मन्त्री यद्वदति तदेव प्रथमाष्टपद्या वस्तु। तत्र ध्रुवपदमित्थं वर्तते-

**भरितपयोधितटप्रमितावनिभागं,**

**सरसचरित्रकलत्रसुभोगम्।**

**भूमिप! तव धर्मफलेन जय धरणीशपते!**

**खेचरभूप! जय धरणीशपते!।।**

गीतगोविन्दस्य प्रथमाष्टपद्या ध्रुवपदं चेत्थमस्ति-

**प्रलयपयोधिजले धृतवानसि वेदं,**

**विहितवहित्रचरित्रमखेदम्।**

**केशव! धृतमीनशरीर!,**

**जय जगदीश! हरे! ।।इति।।**

७. अनयोः सादृश्यं सकलसहृदयगोचरमेव। किन्तु जयदेवेन दशावताराणां वर्णनाः प्रस्तुताः। पण्डिताचार्येण तु उपदेशः प्रस्तुतः। शब्दसङ्घटनायां द्वयोरपि साम्यं दृश्यते। पण्डिताचार्यो जयदेवम् अनुकरोतीति स्पष्टमेव।

गीतवीतरागस्य प्रबन्धानां (अध्यायानां) नामानि दृश्यन्ते चेत् प्रतिपाद्यविषयाणां परिचयो लभ्यते। तानीमानि-

१. महाबलस्य सद्धर्मप्रशंसाविवरणम् (प्रबन्धः)

२. महाबलस्य वैराग्योत्पादनम्। ३. ललिताङ्गस्य वनविहारवर्णनम्।

४. श्रीमतीजातिस्मरणवर्णनम् ।
५.वज्रजङ्घपट्टकार्थविवरणम् ।
६.श्रीमतीसौरुप्यवर्णनम् ।
७.श्रीमतीविरहवर्णनम् ।
८.भोगभूमिवर्णनम् ।
९.गुरुगुणस्मरणवर्णनम् ।
१०.स्वर्गवैभववर्णनम् ।
११.सुविधिपुत्रसंबोधनवर्णनम् ।
१२.अच्युतेन्द्रदिव्यशरीरवर्णनम् ।
१३.वज्रनाभस्त्रीवर्णनम् ।
१४.सर्वार्थसिद्धिविमानवर्णनम् ।
१५.मरुदेवीवर्णनम् ।
१६.षोडशस्वप्नवर्णनम् ।
१७.प्रभातवर्णनम् ।
१८.भगवज्जन्माभिषेकवर्णनम् ।
१९.भगवत्परमौदारिकदिव्यदेहवर्णनम्।
२०.भगवद्वैराग्यवर्णनम् ।
२१.भगवत्तपोऽतिशयवर्णनम् ।
२२.भगवत्समवसरणसालवेदिवर्णनम् ।
२३.भगवत्समवसरणभूमिवर्णनम् ।
२४.भगवदष्टमहाप्रातिहार्यवर्णनम् ।
२५.वृषभमुक्तिवर्णनम् ।

८. जयदेवेन राधामाधवयोः विलासाः एव वर्णिताः। गीतवीतरागे तु विषयवैविध्यं विद्यते। नानाजन्मकथा वर्तते। वैराग्यमेव प्रधानं, तथापि श्रीमतीवज्रजङ्घयोः कथायां द्विविधस्य श्रृङ्गारस्य प्रस्तावो वर्तते। पत्युर्विरहे श्रीमत्या विरहस्य वर्णना मनोज्ञा दृश्यते-यथा

**कुण्डलिमण्डलमण्डितविषमिव, दण्डयतीह समीरं,**
**चण्डयतेऽखण्डमण्डलविधुमिव, पिण्डितचन्दनसारम्।**
**तव विरहे सा मुग्धा भूमिप; तव विरहे सा मुग्धा,**
**भूमिप! कामकलम्बदरादिव, चिन्तनया तव स्निग्धा ।।इत्यादि।।**

एवं सर्वार्थिसिद्धिविमानवर्णनापि
पण्डिताचार्यवर्येण सम्यक् कृता उदाहरणम्-

**विमिलितकिरणे, समुदितरमणे, सुरतनुघृणिवलये**
**सुमणिविरचिते, शोभनभरिते, सुभगविसरनिलये,**
**रेमे सुरपो लसदवनौ सुवशी जिताङ्गजवरो रेमे ।।इत्यादि।।**



९. छन्दोबद्धपद्यानां रचनायाम् अपि पण्डिताचार्यः परमं प्रावीण्यम् अभिव्यनक्ति। तत्र किञ्चिदुदाहरामः।

**जम्बूद्रूमासञ्जन भासमाने, द्वीपे शशाङ्कोज्ज्वलभागमाने,**

**सद्भारतक्षेत्रवरे प्रताने, स कोशलोऽभूद्विषयः प्रधानः।**

**रत्नोरुसाला चलकेतुलोला, रथ्याविशाला जिनगेहमाला;**

**नरेन्द्रलीला धृतरत्नमाला, साकेतसंज्ञा रचिता सुरेशा (?शैः)**।।इति।।

१०.प्रभातवर्णननाम्नि सप्तदशे प्रबन्धे पण्डिताचार्य-काव्यप्रतिभा नितान्तं भाति। किञ्चिदुदाहरामः

**विदलितसरसिज विरचितसाञ्जलि वागमदिह सुविभातं,**

**सदमलकरविधु धरति रजनी निजमुखमिव लसकान्तम् ।**

**लोकविनतचरणाम्बुरुहे विमलानघसुगुणसमूहे;**

**देवि ललितशयनं मृदु मुञ्च सुकोमलतरशुभदेहे ।।**

**विगलितकिरणकलापकलाधरलोकनजनितविषादं,**

**जगदभिनन्दय तावकवदनसद्विधुना कारय मोदम्।**

**लोकविनत..............................शुभदेहे ।।इत्यादि।।**



वीतरागस्य विषयं प्रधानतया गृहीत्वापि संयमिवरः पण्डिताचार्यः प्रबन्धं सुन्दरं रसमयं च कृतवान् इति विशेषः। रागतालबद्धः प्रबन्धो वीतरागस्य वृषभदेवस्य वर्णनायाम् उपयुक्तः इति प्रशंसार्हम्। कथांशो जिनसेनकृतात् पुराणात् सङ्गृहीतः, किन्तु वर्णनाः कविना स्वप्रतिभया निर्मिताः। क्वचिदपाणिनीयाः प्रयोगा दृश्यन्ते (पृच्छय इत्यादयः) तथापि काव्यं मनोहारि। शान्तरस एवात्र प्राधान्येन निरुपितः। सकलैरपि देववाणीप्रियैः पठनीयोऽयं ग्रन्थ इत्यस्मदीयोऽस्ति आशयः। भगवान् वृषभदेवस्तथानुगृह्णातु।

**डॉ.अेच. वि. नागराज राव्**

९०, ९-क्रोसरोड, नाबिला रोड,

केव्हम्पुरनगर, मैसुर-५७० ०२३

# ।। वैश्विकः सखा ।।

-प्रा.चन्दुलाल व. ठकराल

१.

### श्रद्धा

ईश्वरे दृढां श्रद्धां धारयत। पवित्रेषु शास्त्रेषु सुज्ञजनवचनेषु श्रद्धां धारयत। परमात्मनः कृपायां दिव्यनाम्नः प्रभावे च श्रद्धां धारयत। विशुद्धा श्रद्धा विस्मयावहानि कार्याणि संपादयितुं समर्था।

२.

### आज्ञापालकत्वम्

मातापितॄणां शिक्षकाणां च आज्ञायाः पालनं कुरुत। भ्रातॄणां भगिनीनां च आज्ञायाः पालनं कुरुत। आदरादाज्ञापालनमतिरिच्यते। एवं कृते महापुरुषरुपेण यूयं प्रकाशयुक्ताः भविष्यथ। युष्माकं कार्येषु सर्वेषु साफल्यं लप्स्यथ अपि च समृद्धियुक्ताः सुखिनश्च भविष्यथ।

३.

### सन्मित्रैर्भाव्यम्

दुःस्वभावानां बालकानां त्यागं कुरुत। यदि न यूयं सावधानास्ते दूषयिष्यन्ति– युष्माकं चारित्र्यम्। न धूमपानं कर्तव्यं, न द्यूतलीला आश्रयणीया, न च द्यूतपुत्रैः लीलाकर्त्तव्या. सुज्ञानां भगवद्भक्तानां सख्यं मार्गयत। मौनं धारयित्वा उपाविशत, तेषामुपदेशांश्च श्रुणुत तेषामाचरणं च कुरुत।

४.

## वाणी

सत्यं वदत। मिष्टतया वदत। मृदुतया वदत। प्रेम्णा वदत। मौनपालनं कुरुत। कस्यापि निन्दां मा कुरुत। वदनात् प्राक् सावधानै र्भाव्यम्। एवं कृत्वा शान्तियुक्ता सुखिनश्च भविष्यथ।

५.

## अनुकुलनक्षमः

यद्यपि शब्दाः रसप्रदाः न, तथापि पराणां शब्दान् शान्त्या शृणुत। मा कदापि रोषं कुरुत। शान्तिपूर्णं श्रवणं दृढतां विकासयति, परेषां हृदयानि च जयति। लोकानां प्रकृतिं सम्यक् अधिगच्छत।

६.

## अनुकूला भवथ

हठधर्माणः मा भवत। परिवर्तनतत्परा भवत। अन्यैः सहानुकूला यथा भवत येनान्येषां प्रीतिकरा भवत। सर्वदा संवादात्मकतया प्रतिभावं प्रकटयत। सर्वेषां सेवां कुरुत। सर्वांश्च प्रेम वितरत।

७.

## स्वच्छता

स्वच्छाः सुव्यवस्थिताश्च भवत। दिव्यतायाः अपरं स्थानं स्वच्छताया वर्तते। वेशभूषाविषयेऽपि व्यवस्थिताः भवत। सर्वदा स्नानं कुरुत। वस्त्राणि पुस्तकानि च नात्र तत्र विकिरत। स्वच्छं जीवनं सुदृढ-मनसः तथा च स्वानुशासनस्य निर्देशकम्। तद् दर्शयति यत् यूयं संस्कारयुक्ताः।

अेच्.अेच् स्वामी शिवानन्दजीलिखित 'युनिवर्स् कोम्पेन्सन' इति आङ्गलभाषानिबद्ध पुस्तकस्य संस्कृताऽनुवादः

**- प्रा.चन्दुलाल व. ठकराल,**
'मंजुल', कालावड रोड, प्रिन्सेस स्कुल पाछळ,
श्रीनाथ पार्क, बी.एन,-१८, राजकोट-१



# ।। बद्धः मुक्तः ।।

-डॉ. वासुदेव पाठक 'वागर्थ'
३५४, सरस्वतीनगर, आंबावाडी,
अमदावाद-१५ (गुजरात-भारत)
फोन : ०७९-२६७४५७५४

साधनारतः
लक्ष्यनिरतः
सत्यसाधकः
केनापि पृष्टः-
एवं कृते,
का ते प्राप्तिः ?
साधकोऽवदत्-
न काऽपि प्राप्तिः,
प्राप्तिरेवापत्तिः;
त्याज्याऽऽपत्तिः।

जीवत्वप्राप्तिः,
वासनाप्राप्तिः,
सम्बन्धप्राप्तिः,
महत्यापत्तिः।
प्राप्त्यैवाहं बद्धः,
प्राप्तिं त्यक्त्वा
मुक्तः।

(शार्दूलविक्रीडितम्)
भ्रातस्साधक! साधनापथरतं,
पृच्छाम्यहं सादरम्,
का लब्धिस्तव? दीर्घकालकलिता,
कष्टप्रदा साधना ।
लब्ध्यर्थं न हि साधना प्रियसखे!,
त्यक्त्वा समग्रं मुदा;
छित्त्वैवं मम बन्धनानि मुदितः,
मुक्तिं भजे भावतः ।।



# ।। आगमस्यामृतम् ।।

**-पूज्यपादाचार्यप्रवरश्री कल्याणबोधिसूरीश्वराः**

इह हि द्विविधानि तपांसि, इत्वरकालिकान्याकालभावीनि च। कदाचित् क्रियमाणमुपवास-एकाशनं वा तप इत्वरकालिकं भवति, समयान्तरे तत्समापनयोगात्। इच्छानिरोधाद्यभ्यासयोगितयेदमपि तप उपयुज्यत एवाऽऽत्म-स्फाति-लाभविधौ। द्वितीयं तु तपो नम्रतादिरुपम्, आकालिकं चेदम्, अखण्डभावस्वभावतयाऽनपायत्वात्, यथोक्तम्-पराभिभूतौ यदि मानमुक्ति-स्ततस्तपोऽखण्डमतः शिवं वा-

इति (अध्यात्मकल्पद्रुमे)। तदेवंविधेषु तपस्सु कतममुत्तमं स्यादित्यत्र समाधत्ते जिनागमः-

**तवेसु वा उत्तमबंभचेरं** ।। (परमपावनं द्वितीयाऽऽगमस्वरुपं श्रीसूत्रकृताङ्गसूत्रम्)

सर्वेष्वपि तपस्सु श्रेष्ठं तपः प्रवरं ब्रह्मचर्यम्। किलाऽकामेनापि पालयन्ति ब्रह्म तथाविध-राजतुरगादयः, न च तत् प्रवरम्, अकामत्वादेव, अतोऽत्र-उत्तमब्रह्मचर्यम्-इत्युक्तम्, श्रेष्ठमित्यनुवर्त्तते। न हि प्रतनुसत्त्वसाध्यं प्रवरं ब्रह्मचर्यम्, वीराणामपि तत्र कातरभावदर्शनात्। अतो महासत्वानामेव भवति मनोवाक्कायपावित्र्यतः परिशुद्धब्रह्मचर्यसिद्धिः, ततोऽप्यविकल्प्यफलाऽऽगमः, यथोक्तम्-**ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः**-इति (योगसूत्रे), अन्यत्रापि-

**चिरायुषः सुसंस्थाना, दृढसंहनना नराः।**

**तेजस्विनो महावीर्या भवेयुर्ब्रह्मचर्यतः**-इति (योगशास्त्रे)। अतो यतन्तामत्र शुभात्मानस्तत्तत्फलयोगायेति शम्।

# ।। अनर्थपञ्चकम् ।।

**-पूज्यपादाचार्यप्रवरश्री कल्याणबोधिसूरीश्वरा:**

न ह्यनभिज्ञाता अनर्था: परिहर्त्तुं शक्या:, नाप्यपरिहृतानर्थानां श्रेयोदर्शनं सम्भवतीति विदुषा सम्यक् तत्परिज्ञाने यतितव्यम्। शास्त्रकारा हि महात्मानो वकारपञ्चक-लक्षणमनर्थपञ्चकमस्मभ्यो निर्दिष्टवन्त:। यथा-

**वैर-वैश्वानर-व्याधि-वाद-व्यसनलक्षणा:।**
**महाऽनर्थाय जायन्ते, वकारा: पञ्च वर्धिता:।।**

१) **वैरम्**- यदि केनापि सहास्माकं विरोध उद्भूत:, कलहादि च सञ्जातम्, तदा क्षिप्रं तेन सह क्षमापना कर्त्तव्या, एवमेव मन:प्रसादादिसत्फलसम्प्राप्तिसम्भवात्, अन्यथाऽनर्थध्रौव्याच्च।

२) **वैश्वानर:** - अग्निपर्यायनामेदम्। वर्धमानो ह्यसौ सर्वमपि गृहसारं भस्मसात् कुरुते, विनाशयत्यात्मानमपि, अतो वर्धितोऽयमप्यनर्थकृदेव।

३) **व्याधि:** - रोग:। उपेक्षिततया वृद्धिं गतोऽसौ मरणान्तकष्टप्रदोऽपि भवतीति प्रतीतम्।

४) **वाद:** - वाग्युद्धम्। उदारचित्ततया मधुरालापपुरस्सरं (वाग्) विराम एवात्रापि श्रेयान्, अनर्थश्चान्यथेति प्रत्यक्षमीक्ष्यते।

५) **व्यसनम्** - द्यूत-सुरा-मृगया-परस्त्रीगमन-मांस-वेश्यागमन-चौर्यलक्षणम्। धूम्रपानप्रभृतिं-साम्प्रत-कालीनञ्च महामोहाऽऽपादकं द्रव्यमपि व्यसनान्तर्भूतमेव। नायं लोको नापि परो व्यसनिनामिति त्याज्योऽयमप्यनर्थ: सुधिया।

# ।। सद्गुरु–माहात्म्यम् ।।

**-पण्डितवर्य चन्द्रकान्त एस्. संघवी**

अणहिलपुर पट्टनम्

**''येन ज्ञानप्रदीपेन निरस्याभ्यन्तरं तमः।**

**ममात्मा निर्मलीचक्रे तस्मै श्रीगुरुवे नमः।।**

आश्रितहितकामिना येन भव्यात्मना सद्गुरुणा अन्तर्गतङ्गाढतमो निरस्य ममात्मा समुज्ज्वलीकृतः, सत्पथगामी सुकृतः, सत्यान्वेषी प्रकृतः तत्त्वादर्शी भावितः, भगवत्सदृशः पूज्यस्य तत्सद्गुरुचरणयो र्ममानन्तवन्दनाः।।

अस्मिञ्जगति अस्मिंश्च जन्मनि यदि सद्गुरुर्न मिलितः, तर्ह्यस्माकम–धन्यात्मनाङ् किं भवेत्? तद्वक्तुमक्षमा वयम्। अरे! कथनस्य का वार्ता किन्तु कल्पयितुमसमर्थाः। चिन्तयितुश्चानीश्वराः।

एतद्विषयकं वचनं श्रीगुरुतत्त्वविनिश्चयग्रन्थे पूर्वाचार्यैरुक्तम्:–

**''गुरु आणाए मुक्खो, गुरुप्पसाया उ अट्ठसिद्धीओ।**

**गुरुभत्तीए विज्ञा-साफलुं होइ नियमेणं।। (श्रीगु.त.वि.)**

अस्यां गाथायाम्–तद्ग्रन्थकर्तारोऽस्मभ्यं सुचारुपदेशं ददते–तथाहि–भोः प्रिय! अन्तेवासिन्! यदि त्वं मोक्षङ्काङ्क्षसि, यदि त्वमष्टमहासिद्धीरिच्छसि, यदि त्वं विद्यायाः साफल्यमिच्छसि तर्ह्येकङ्कार्यङ्कुरुष्व। तत् कार्यं किम्?

सदैव सर्वत्र सद्गुर्वाज्ञां सर्वथा सुपालय।

मोक्षार्थीभूय परमादरेण सद्गुरुभक्तिं तनु।

येन केन प्रकारेण सर्वं सोढ्वा सद्गुरोश्चित्तं प्रसन्नीकुरु।

अनेन प्रकारेण संसेवितः सद्गुरुः स्वज्ञानामृतनिधिं स्वगुणसमृद्धिं च प्रसन्नचेतसा तुभ्यं प्रदास्यते। अस्मिन् विषये संस्कृत-मध्यमा-मध्ये सुवचनं प्रदत्तम्-

**''यथा खात्वा खनित्रेण, भू-तले वारि विन्दति।**

**तथा गुरुगतां विद्यां, शुश्रूषुरधिगच्छति।।''**

यथा कर्षक)(खनित्रेण महीं खात्वा महीतले वारि विन्दति, तद्वत् सुविनेयजनोऽपि गुरोः प्रतिकार्यं, भक्त्या नमस्कृतिं कृत्वा नतशिरसोपतिष्ठते। सुवर्तनमाचर्य गुरुलब्ध-गुरुगुणाकरं स्वात्मनि स्थापयति। प्रस्थाप्यासन्नमोक्षगामी भविष्यति।

अथ एकः प्रश्नः-जिज्ञासुरन्तेवासी स्वसद्गुरुं प्रति नतमूर्ध्ना आपृच्छते। हे! परमादरणीयसद्गुरो! गुरुसेवा कतिकालं कर्तव्या? तदा वात्सल्यनिधि र्ज्ञापयति-भो! गुरुचरणपद्मभृङ्गायमाण शिष्य! ज्ञानसारग्रन्थे महामहोपाध्यायैरेतत्प्रदर्शितम्-

**''गुरुत्वं स्वस्य नोदेति, शिक्षासात्म्येन यावता।**

**आत्मतत्त्वप्रकाशेन, तावत् सेव्यो गुरुत्तमः।।** (ज्ञानसारत्यागाष्टके पञ्चमः श्लोकः)

यावत् सम्यक्परिणत्या गुरुकृपया च लब्धशिक्षाया आत्मस्वरुपदर्शकबोधेन स्वात्मनो गुरुत्वं नोदयेत, तावदुत्तमगुरुरविकल्प्य सर्वप्रयत्नेन प्रसन्नमनसा निष्कामभावेन च सदा सेव्य उपास्यश्च।

प्रान्ते-स्वाराध्यपादाः परमपूज्याः श्रीप्रेमसूरीश्वराः सद्गुरव एतादृशशासन-प्रभावकाः, पुण्यप्रभावस्वामिन, इच्छामात्रेण कार्यप्रसाधका कथं सञ्जाताः? तदुत्तरमेतज्ज्ञातव्यम्-सुदीर्घद्रष्टृभिः पूज्यपादैस्तैरपि स्वजीवनमध्ये निराशंसभावेन चिरकालं परमोपकारिस्वगुरुपास्तिः संस्कृता। तत्प्रभावेण तेऽप्येतादृशा महान्तो महाप्रभाववन्तश्च प्रजाताः।

गुरुमहिमप्रदर्शकस्य अस्य लेखस्यायं निष्कर्ष आयातः-अस्माभिर-प्यस्मज्जीवने धर्मज्ञो, धर्मकर्ता, सदा धर्मपरायणो, भव्यसत्त्वेभ्यो धर्मशास्त्रार्थ-देशकस्सद्गुरुः प्रस्थापयितव्यः। यतस्तत्सुचारुप्रभावाद् मोक्षाभिलाषिणो वयं सर्वेऽपि भवोदध्युत्तितीर्षवो भूयास्म। इति शासनसेवकस्य मङ्गल-मनीषा सर्वजीवान् प्रति।

**❁ श्रीरस्तु ❁ ❁ शुभं भूयात् ❁ ❁ कल्याणं स्तात् ❁**



# ।। प्रवचनमातु: संदेश: ।।

**-मुनिप्रवरश्री दर्शनरक्षितविजया:**

**"जयं चरे जयं चिट्ठे, जयमासे जयं सए ।**
**जयं भुंजतो भासंतो, पावं कम्मं न बंधइ" ।।१।।**

हे संयमिन्!

त्वं दावानलसदृशं रागादिमहाकषायै: प्रचुरं, दु:खानाश्चाकरं संसारं हित्वा मोक्षमहालयप्रापकं, देवानां दुर्लभतमं निष्पापमयं चेदं संयमजीवनं प्राप्तवानसि।

चिन्तामणीरत्नतुल्यसंयमे प्राप्ते तव किं कर्तव्यमस्ति? इति सदा मनसि विचारणीयम्। आचार्यश्री शय्यंभवसूरिभि र्दशवैकालिकमहासूत्रे कथितमस्ति। साधु र्यतनया चरेत् यतनया तिष्ठेत्, यतनयोपविशेत्, यतनया स्वप्यात्, यतनया भुञ्जानो भाषमाणश्च पापकर्माणि न बध्नाति।



साधु र्यतनया चरेत्, सा यतना कीदृक्स्वरुपा? मनोवच:कायै: सर्वजीवान् प्रत्यात्मवत् तुलना, यस्मिन् कार्ये कृते सत्यात्मनो बाधा जायते तादृशं कार्यं परान् आत्मन: प्रति न कर्तव्यम्। संयमजीवनस्याचरणमष्टप्रवचनमातुरादेशानुसारेण कर्तव्यम्। व्यवहारेऽपि कथ्यते यो बालो मातुरादेशं न करोति स स्वहितमार्गे न गच्छति, यो मातरं पुरस्कृत्य कार्याणि करोति स: स्वात्महितमवश्यं प्राप्नोति एका माता बहून् पुत्रान् पालयति तत: सा वात्सल्यमूर्तिरिति कथ्यते, यो मुनिरष्टप्रवचनमातॄ: पालयति स: संयममूर्ति: कथ्यते।

अमू: सन्ति प्रवचनमातर:-इर्याख्या प्रथमा, भाषाख्या द्वितीया, एषणाख्या तृतीया, आदानभण्डनिक्षेपाख्या चतुर्थी, पारिष्ठापनिकाख्या पंचमी, मनोगुप्त्यभिधाना

षष्ठी, वचोगुप्त्यभिधाना सप्तमी, कायगुप्त्यभिधाना चाष्टमी।

इर्यासमित्याख्यमाता वात्सल्येन कथयति हे सुत। यदि मां तुतुक्षुरसि, तर्हि यतनया सार्द्धतृतीयहस्तप्रमाणां भूमिं दृष्ट्वा, इतस्ततो विलोकनं त्यक्त्वा गन्तव्यम्, मनसि च सर्वजीवान् प्रति करुणाभावो धारणीयः।

भाषासमित्याख्यमाता कथयति हे सुनो! यदि मम हृदि स्थानं प्राप्तुमिच्छुरसि तर्हि जीवानामिव जिह्वाया अपि यतना करणीया, सर्वदा मुखवस्त्रिकोपयोगेन परेषाञ्चात्मनश्च पीडा न जायते तादृशी भाषा वक्तव्या।

एषणासमित्याख्यमाता कथयति हे वत्स! यदि विचारेणाचारेण च निर्मलः भवितुमिच्छसि तर्हि ममाज्ञा पालनीया, द्विचत्वारिंशद्दोषैरदूषितां भिक्षां समानय। द्विचत्वारिंशद् दोषैरदूषितामपि भिक्षां प्राप्य मण्डल्याः पञ्चदोषाश्चारित्रं कर्बुरितं कुर्वन्ति। अतः मण्डल्याः पञ्चदोषान् सावधानतया परिहर। ममाज्ञाऽपालनमकुर्वन्तो मङ्ग्वाद्याचार्या अपि दुर्गतौ पतिताः, केचित् च चारित्रेण भ्रष्टाः।

आदानभण्डनिक्षेपणासमित्याख्यमाता कथयति हे आत्मज! यदि मे सेवां कर्तुमिच्छसि तर्हि कस्मिन्नपि कार्ये आपतिते सति, सदाऽहं स्मरणीया, वस्त्रपात्रदण्डकाद्यादान-निक्षेपकार्ये दृष्ट्या प्रतिलेखनं रजोहरणाद्युपकरणेन च प्रमार्जनं कर्तव्यम्। निशायां पादप्रोञ्छनकेन मन्दं मन्दं गत्या चलितव्यम् !

पारिष्ठापनिकासमित्याख्यमाता सूचयति हे नन्दन! यदि त्वं ममाज्ञां पालयिष्यसि, तर्हि लोकमध्ये प्रशंसनीयो भविष्यसि मलमूत्राहारोपध्यादयो जीवरहिते नातिदूरं, नातिसमीपे, लोकागमरहिते, स्वात्मविराधनारहिते च भूमौ परिष्ठापनीयाः।

मनोगुप्त्याख्यमाताऽऽख्याति हे प्राणवल्लभ! मन एव मनुष्याणां बन्ध-मोक्षयोः कारणं, स्वयंभूरमणसमुद्रे गुरुमत्स्यनेत्ररोम्णि स्थितस्तन्दुलिकमत्स्यो मनसा दुष्टचिन्तनेन सप्तमनरकस्यायु र्बध्नाति। अतस्त्वयाऽपि मनसा परान् प्रति दुष्टचिन्तनं त्यजनीयम्। विशेषेण स्वगुरुन्,सहवर्तिगुरुबन्धून् च प्रति कदाचिदपि दुर्भावो न कर्तव्यः, बोधिनाशकारणत्वात्, सर्वे जीवाः कर्माधीनास्सन्ति, कर्मसत्ताग्रे कस्यचिदपि किञ्चिदपि न चलति। तीर्थंकर-चक्रि-नरेन्द्रादयोऽपि कर्मनटेन नर्तिताः, तेषामग्रे तव मम च का गणना? इति सदा चिन्तनीयम्।

वचोगुप्त्याख्यमाता कथयति हे हृदयाब्जभ्रमर! यदि सर्वेषां प्रियो भवितुमिच्छसि तर्हि ममादेश: सदा पालनीय:। कारणेन विना न वक्तव्यं यदि कारणमापतेत् तर्हि हितं मितं प्रियं च वचनं वक्तव्यम्। सत्यमपि तादृशं वचनं न वक्तव्यं, येन श्रोतु र्दु:खं भवेत्, यथा 'त्वं काणोऽसि' इत्यादि, 'त्वं मूकोऽसि' इत्यादि, सत्यमपि मितशब्देन वक्तव्यं, अल्पकथनेन यदि कार्यं भवेत् तर्हि बहु न वक्तव्यं यथा वीर-परमात्मना चंडकौशिकं प्रति ''बुज्झ बुज्झ'' इति कथितवान्।

कायगुप्त्याख्यमाता कथयति हे तनुरुह! यदि स्वनामसार्थकं कर्त्तुमिच्छसि तर्हि ममाज्ञां पालय। साधनाया विराधनायाश्च सर्वश्रेष्ठसाधनं कायोऽस्ति धर्मस्याद्यसाधनं शरीरमिति मत्वा साधनामार्गे सदा देहं प्रयुञ्ज्या:। पापप्रवृत्तिभि: कायव्यापारं विरमे:। गर्दभतुल्यं कायं मत्वा कायेन यावती साधना भवेत् तावती साधना इह भवे कर्तव्या। कारागारे गुप्तश्चौरो यथा किञ्चित् दुष्कर्म न करोति तथैव गुप्तकायो यति: किञ्चिदधर्मं न करोति।

## इर्यासमितिमातु: संदेश:

**''आलंबणेण कालेणं, मग्गेण जयणाइ य।**

**चउकारणपरिशुद्धं, संजए इरियं रिए ।।१।।''**

इर्यासमित्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति हे जगज्जीवाभयदात:! वत्सल! यदि जगज्जीवानां मम च प्रियो भवितुमिच्छसि तर्हि यदा गमनागमनयो: प्रयोजनं भवेत् तदा मम चतस्र आज्ञा: पालनीया:।

(१) आलंबनेन (२) यथाकालेन(३) सुमार्गेण (४) यतनया च गन्तव्यम् संयमजीवने संयमिन: सर्वदा ज्ञानदर्शनचारित्रस्यालम्बनं भवति। तस्यालम्बनं विना स्वासनात् नोत्तिष्ठति, ज्ञानं संयमिन: प्राणसदृशं, दर्शनं नेत्रसदृशं, चारित्रं च हस्तपादसदृशमस्ति। ज्ञानाहारेण पुष्ट: संयमी दर्शनेन स्वात्मस्वरुपदर्शनं करोति, स्वात्मस्वरुपदर्शनेन प्राप्तपरिणत्याऽतिशुद्धं चारित्रं पालयति। यथा स्वलालातन्तुनामा -लम्बनेन कौलिक इष्टस्थानं प्राप्नोति तथा स्वात्मगुण-ज्ञान-दर्शन-चारित्राणामालम्बनेन संयमी शाश्वतमपवर्गस्थानं प्राप्नोति। ज्ञानस्य फलं विरति:,

दर्शनस्य फलं जिनाज्ञापक्षपात:, चारित्रस्य च फलं परिणति:, त्रयाणां फलं मोक्षप्राप्तिरस्ति।

संयमिन: यथाकालमाहारनिहारविहारचर्यायां निर्गच्छेयु:। सूर्योदये सति चक्षुर्भ्यां लघुजीवा दृश्यन्ते तदा गन्तव्यम् निशायामुपाश्रयेऽपि प्रयोजनाभावे गमनं वर्जनीयम्, प्रयोजने सति पादप्रोञ्छनकेन प्रमार्जनपूर्वकं गन्तव्यम्। निशायां पादप्रोञ्छनकं संयमिनस्तृतीयं नयनमस्ति।

संयमिना लोकातिवाहिते, भास्वदंशुभिश्चुम्बिते, स्वात्मविराधनारहिते च मार्गे गन्तव्यम्। यस्मिन् मार्गे जनानां गमनागमनं सततं स्यात् तस्मिन् मार्गे प्रायो जीवानामुत्पत्त्यभावो जायते, तथैव भास्वदंशुभिश्चुम्बिते मार्गेऽपि जीवोत्पत्तिसंभवो न जायते, यद्युत्पत्ति र्भवेत् तर्हि तापेन जीवाश्च्यवन्ति, यदि त्रसजीवा विद्येरन् तर्हि दृष्टिविषया भवन्ति। अतिसङ्कटे, कण्टकाकुले, जलाकुले, कर्दमाकुले, श्वापदाकुले, च मार्गे स्वात्मविराधनाया: प्रसङ्गो जायते अतस्तन्मार्गे गमनं वर्जनीयम्। भावत: संयमी सदोपयुक्तमानसो भवेत् यथा-

**सव्वे जीवा वि इच्छंति, जीविउं न मरिज्जिउं।**

**तम्हा पाणिवहं घोरं, निग्गंथा वज्जयंति णं ।।२।।**

इति भावनया गमनाऽऽगमनावसरे श्रमण इतस्ततो विलोकनं त्यक्त्वा इर्यापथिकीक्रियया स्वात्मध्याने लीनो भवेत्। मुनिना मानसे चिन्त्यं यथा लोकमध्ये त्वं श्रमणोऽसि, इति गीयते, अत: क्रोध-मान-माया-लोभादिकषाया दूरतस्त्यजनीया:। पञ्चेन्द्रियविषयाणां स्पर्शमात्रमपि न कर्तव्यम्। विषस्य भक्षणं एकभवे मारयति परं विषयसेवनं प्रतिभवं दुर्गतिपातनेन मारयति। रागो रोगमिव, द्वेषो द्विषमिव त्यक्तव्य:। मोहमहाभूपस्याज्ञा कदाचिदपि न पालनीया।

परमात्मना इर्याविषये द्रव्यक्षेत्रकालभावभेदेनापि यतना चतुर्विधा प्रोक्ता। द्रव्यतश्चक्षुर्भ्यां, क्षेत्रतो युगमात्रभूमिं, कालतो गमनयोग्यकालं, भावत उपयुक्तमानसो भवेत्। एवंविधोपयोगतो व्रजतस्तस्य कथञ्चित् प्राणवधेऽपि प्राणिवधपापं न लगति।

हे सुत! त्वया **वरदत्तमुनिवद्** प्राणान्तेऽप्यहं रक्षणीया। एकदा सभायां शक्रेण वरदत्तमुने: समितिमातृभक्ति: प्रशंसिता, तदा तां प्रशंसामसहमान: एको

मिथ्यादृष्टिदेवस्तत्परीक्षाकृते मर्त्यलोके समागत:। देवशक्त्या मुने र्गमनमार्गे परितो बह्व्यो मण्डूकिका: पृष्ठतश्च हस्ती विकुर्वते, तथाऽपि स मुनिर्गतिं न भिनत्ति, हस्तिनोत्क्षिप्य पातितोऽपि शरीरे निस्पृह: स्वदेहपातजन्यमण्डूकिकाविराधनां विचार्य, पश्चात्तापं विधत्ते, तदा स देवस्तस्य समितिमातृभक्तिं प्रशस्य देवलोके गतवान्।

यथा वरदत्तमहामुनिना प्राणात्ययेऽपि समितिमाता रक्षिता तथा मातृभक्तेन सर्वजीववत्सलेन त्वयाऽपि समितिमातृपालने यत्न: करणीय:।

## भाषासमितिमातु: संदेश:

**''असच्चमोसं सच्चं च, अणवज्जमकक्कसं,**

**समुप्पेहमसंदिद्धं, गिरं भासिज्ज पन्नवं''।। ।।**

भाषासमित्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति हे भारतीप्रिय! वत्स! यदि जगति प्रशंसनीयो भवितुमिच्छसि तर्हि भाषणस्य प्रयोजनं भवेत् तदा मे निर्दिष्टाज्ञा पालनीया।

प्रज्ञावान् श्रमणोऽसत्यामृषां सत्यां च भाषामपि स्वात्मने परस्मै चायत्यां हितकारिणीमसंदिग्धामनवद्यामकर्कशाञ्च वदेत्।

मुनिनैकान्तेन सत्यैव भाषा वक्तव्येति न शास्त्राज्ञा, कदाचिन्निर्जने कानने विहरतो मुने: कोऽपि व्याध: पृच्छेत्, 'भवता केऽपि हरिणा गच्छन्तो दृष्टा:', तदा मुनि मौंनं धारयेत्, यदि सोऽत्याग्रहपूर्वकं पृच्छेत् तर्हि मुनि र्विरुद्धमार्गं दर्शयेत्। ईदृशी भाषिताऽसत्याऽपि भाषा मुने: हरिणहिंसानिमित्तभूतपापाद् रक्षति। अत: सोपादेया, सत्याऽपि स्वपरात्मघातका भवेत् तर्हि सर्वथा हेया।

अन्यच्च वयं गमिष्याम एव, वयमिदं कार्यं करिष्याम एव इत्यवधारणीभाषा न वक्तव्या यदि कथनस्य प्रसंग आपतेत्, तर्हि प्रायिका भाषा वाच्या, यदि कोऽपि श्राद्धो गोचर्यार्थं निमन्त्रयेत्, तर्हि मुनिना 'वर्तमानजोग' इति भाषाप्रयोग: कर्तव्य:। यदि योगो वर्तिष्यते तर्ह्यागमिष्यामि यदि योगो न वर्तिष्यते तर्हि नाप्यागमिष्यामि, निश्चयेन किमपि न वक्तव्यम्, निश्चयेन वदतस्त्वसत्यभाषणस्य प्रसङ्ग आपतति।

परेषां हृदि संतापजनका कर्कशा भाषाऽपि न वदेत्, 'त्वं काणोऽसि, त्वं

पण्डोऽसि त्वं चोरोऽसि' तथा हे दुर्भग! हे चोर! हे मूर्ख! इत्यप्रीतिकारिणीभाषायाः प्रयोगो न कर्तव्यः। ज्येष्ठानां कनिष्ठानाञ्चाभिधानपूर्वकेण हे महानुभाग! हे सुश्रावक! हे प्रभुभक्त! इत्यादि प्रयोगः कर्तव्यः, पञ्चेन्द्रियप्राणिनां लिङ्गमजानन् तेषां जात्या प्रयोगः कर्तव्यः, ''पशुविहगान् दृष्ट्वा, असौ पशु र्हंतव्यः, असौ विहगः पालनीयः'', तथा वृक्षान् दृष्ट्वा, ''असौ वृक्षः प्रासादार्थं योग्योऽस्ति, असौ वृक्षो मञ्चिन्यार्थं योग्योऽस्ति'', इत्यादि भाषा दशवैकालिकसूत्रे कथितवाग्शुद्ध्याख्याऽध्ययनानुसारेण त्यजनीया।

व्यवहारेऽपि भाषया सर्वो व्यवहारो जायते। एकचिन्तकेन कथितम् ''भाषा मनुषस्यात्मकथाऽस्ति'' यस्य भाषा शुद्धा, स जगति प्रशस्यते, तीर्थंकरपरमात्मभिः पञ्चत्रिंशद्गुणालङ्कृतभाषयाऽनेकभव्यजीवानामुद्धारः कृतः। तत्पश्चात् नन्दिषेणमहात्मनाऽपि स्ववैराग्यमयभाषया द्वादशवर्षं यावत् प्रतिदिनं दशपुरुषाः सन्मार्गे स्थापिताः। तथा सांप्रतकालेऽपि विजयरामचन्द्रसूरिमहाराजैः स्वदेशनया शताधिकशिष्याणां गुरुत्वं प्राप्तम्।

हे सुत! त्वयाऽपि ज्येष्ठभातृसङ्गतमुनिवद् भाषासमित्यामुपयुक्ततया स्थातव्यम्। पुरा सङ्गत इति नाम्ना तपोधनो गुरुभिस्सह विहरन् कस्मिंश्चिद् नगरे गतः। गुरुभि र्निमित्तबलेन तस्मिन् ग्रामे परचक्रस्यागमनं ज्ञातं, ज्ञात्वा च ते सर्वसाधुभिस्सहान्यत्र विहृताः। परं तु सङ्गतमुनि र्ग्लानमुनिवैयावृत्यार्थं तत्रैव स्थापितः। ततः परचक्रेण नगरे रुद्धे सति सङ्गतमुनिः शुद्धाहारार्थं नगर्या बहिर्निर्गतः। एकाकिनं मुनिं दृष्ट्वा परचक्रसेनान्या पृष्टः भवान् कुतरागतवानसि, मुनिनोक्तं नगर्या आगतोऽस्मि, पुनः पृष्टं नगरे कियन्तोश्वाः, हस्तिनस्तथा दारुधान्यादिनां निचया विद्यन्ते?। नागरिका निर्विण्णा अनिर्विण्णा वा? इदं यूयं ब्रूथ? तदा स प्राह स्वाध्यायध्यानयोगव्याक्षिप्ता वयमेतद् न जानीमः। पुनः पृष्टं यूयं हिण्डमाना अपि किं न पश्यथ न श्रुणुथ? तदा ब्रवीति।

**''बहु सुणेइ कण्णेहिं, बहु अच्छिहिं पेच्छइं,**
**न य दिट्ठं सुयं सव्वं, भिक्खू अक्खाउमरिहई''॥ ॥**

मुनिः कर्णाभ्यामक्षिभ्यां च बहु श्रुणोति प्रेक्षते च, तथाऽपि सर्वं दृष्टं सर्वं च

श्रुतमाख्यातुं नार्हते। यथा सङ्गतमुनिना मरणभयं विगणय्य सङ्कटेऽपि समितिमाता रक्षिता तथा स्वात्मकल्याणेच्छुकसर्वसंयमिभि र्वाक्विषयेऽहं स्मरणीया।

## एषणासमितिमातुः संदेशः

**''गवेसणाऐ गहणे य, परिभोगेसणाय जा।**

**आहारोवहिसेज्जाए, एए तिण्णि विसोहए''॥ ॥**

एषणासमित्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति हे शुद्धधर्मगवेषक! वत्स! यदि विचारेणाचारेण च निर्मलः भवितुमिच्छसि तर्हि ममाज्ञां हृदि संप्रधार्य सदा पालनीया।

धर्मस्याद्यसाधनं शरीरमेवाऽस्ति, आहारेण विना शरीरं न चलति। ततो धर्मस्यानन्यं साधनमाहारः कथ्यते। व्यवहारेऽपि कथ्यते यादृश आहारस्तादृशो विचारो मनसि जायते, यादृशो विचारस्तादृशी वाचा प्रादुर्भवति। अतो मनो-वचः-कायानां नियन्त्रक आहार एव, ततो सम्यगुपयुक्तेन मुनिना मनो-वचः-कायनियन्त्रणार्थमाहारगवेषणा नवकोटिपरिशुद्धा कर्तव्या। आहारवद् वसति-वस्त्र-पात्रादयोऽपि धर्मसाधनायां सहायभूता सन्ति, अतो वस्त्रादीनां गवेषणाऽपि सुयुक्त्या कर्तव्या।

अणाहारिपदप्राप्तुकामा मुनिवराः सर्वदा नानाविधतपांस्याचरन्ति। परं संयमयात्रानिर्वाहार्थमेवाहारं गृह्णन्ति साधवः। अत आहारस्याभ्यवहारे सत्यपि मुनिवरा नित्यमुपोषिताः कथ्यन्ते तथापि शास्त्रे कथितं संयमादिरक्षार्थं द्विचत्वारिंशद्दोषैरदूषितैव भिक्षा ग्रहीतव्या। उद्गमोत्पादनैषणादिदोषवर्जनेन शुद्धैषणा कर्तव्या, गृहस्थेनोत्पादिता आधाकर्मिकादिषोडशोद्गमदोषाः, यतिनोत्पादिता धात्र्यादिषोडशोत्पादनदोषाः, गृहस्थसाधूभयप्रभवाश्च शङ्कितादिदशैषणादोषाः सन्ति। विवेकिभिः संयमिभिः स्वात्महितार्थमेते दोषाः संशोधनीयाः संत्याज्याश्च।

द्विचत्वारिंशद्दोषैरदूषितां भिक्षामानीय मण्डल्याः संयोजनादयः पञ्चदोषा न निवारिता स्तर्हि सा भिक्षा सर्वदोषै र्दूषितेति कथ्यते। अतो जितेन्द्रियमुनिभिर्मण्डल्याः पञ्चदोषा अतिसावधानतया वर्जनीयाः।

शास्त्रेष्वपि कथितं, अदूषिता भिक्षा सर्वसंपत्कारिणी गुणवर्धका, आत्मनि नवनवसंवेगपरिणामजनयित्री, विकारचौरहारिणी, स्वात्मगुणाभिमुखकारिणी चास्ति। दूषिता भिक्षा बलहारिणी, विकारवर्धिनी, गुणसङ्घातनाशिनी, प्रमादजननी चास्ति अतो विवेकिसंयमिभि **धनशर्म**मुनिवत् एषणासमितिमाता भृशं पालनीया।

एकस्मिन् ग्रामे **धनमित्र** इति नाम्ना श्रेष्ठी न्यवसत्। तत्पुत्रो धनशर्मः, एकदोद्याने समवसृतगुरुमुखाद् धर्मदेशनां श्रुत्वा विरागी जातः। पुत्रेण सहितः स प्रव्रजितः। एकदा निदाघकाले गुरुभिः सह विहरन्तौ पितापुत्रमुनी घोराटव्यां गच्छन्तौ आस्ताम्। तदा ग्रीष्मकालातपेन धनशर्ममुनिरतीव पिपासु र्जातः। पिपासयार्त्तः स पदमपि चलितुं न शक्नोति, मूर्च्छया च भूमौ पतितः, तदा गच्छेन सह गन्तुमशक्तो धनमित्रमुनिः पुत्रमुनिना सह पश्चादागच्छति, तदा मार्गे निर्मलजलपूर्णा नदी दृष्टा। पुत्रमोहमोहितेन पितामुनिनोक्तं हे वत्स! नद्याः सचित्तजलं पिब, इति कथयित्वा पुत्रमुनिः सलज्जो न भवेदिति विचार्य स्वयं वृक्षान्तरे स्थितः। तदा धनशर्मबालमुनिना तत्समये जिनवचनं स्मृतं, जिनेशैः सचित्तजलेऽसङ्ख्येया जीवा कथिताः, मदेककृतेऽसङ्ख्यजीवा मरिष्यन्ति, मया देवगुरुसाक्षिणा महाव्रतानि गृहीतानि सूक्ष्ममपि जीवं स्वहस्तेन न मारयिष्यामि। परमात्मन आज्ञां लुप्त्वा सचित्तजलं कथं पिबेयम्? इति विचारणायां मुनिना प्राणत्यागः कृतः। शुद्धैषणासमितिपालनेन मृत्वा स वैमानिक सुरलोके महर्द्धिकसुरो जातः।

यथा धनशर्ममुनिना प्राणान्तेऽपि समितिमाता रक्षिता तथात्मतत्व-गवेषकमुनिभि र्वस्त्र-पात्र-शय्याऽऽहाराद्येषणायां यतना कर्तव्या।

## आदानभण्डमत्तनिक्षेपणसमित्याख्यमातुः संदेशः

**''पुढवि आउक्काए, तेऊवाऊवणस्सइतसाणं।**

**पडिलेहणापमत्तो, छण्हंपि विराहगो भणिओ''।। ।।**

आदानभण्डमत्तनिक्षेपणसमित्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति हे षड्जीवकायरक्षक! नन्दन! यदि मे सेवां कर्तुमिच्छसि तर्हि सर्वकार्येषु प्रतिक्षणं सदाऽहं स्मरणीया। वस्त्रपात्रदण्डकाद्युपकरणादाननिक्षेपकार्ये पूर्वं, वस्तुनो दृष्ट्या



प्रतिलेखनं, पश्चाद् रजोहरणाद्युपकरणेन वस्तुनो भूमेश्च प्रमार्जनं कर्तव्यम्।

शास्त्रेषु यतयः षड्जीवकायरक्षका इत्युक्ताः सन्ति, अतो यतनापरैः यतिभिः पृथ्व्यप्-तेजो-वायु-वनस्पत्यादिजीवाः स्वात्मवद् रक्षणीयाः। षड्जीवकायजीवान् रक्षितुं शास्त्रेषु निर्दिष्टा विविधक्रियाः प्रतिदिनं यतनया कर्तव्याः। यतना मनो-वचः-कायेन त्रिविधा दर्शिता। मनसा यतिभिस्सर्वजीवेषु दयाभावो धारणीयः। वचसा मुखवस्त्रिकोपयोगपूर्वकेन हित-मित-प्रियवचनेन च वक्तव्यम्। कदाचित् प्रमादेन वचःकायाभ्यां यतना न कृता तथाऽपि मनसा यतनावश्यमेव धारणीया। कायेन यतना मनो-वचःसावधानतया पालनीया।

यतिभि प्रातर्जागरणे सति, निशायां च शयने सति नाभेरधोभागो रजोहरणेन, उपरितनभागश्च मुखवस्त्रिकया प्रमार्जनीयः। अपरमपि विहारप्रसङ्गे ग्रामाद् बहिः नद्युत्तारणप्रसङ्गे च पादौ प्रमार्जनीयौ। प्रतिदिनं द्विवारं सिद्धान्तोक्तसमये सुविधिना वस्त्र पात्रादीनां प्रतिलेखनं कर्तव्यम्।



कस्याञ्चिदपि क्रियायां कर्मबन्धस्य मूलकारणमनुपयुक्तताऽस्ति अतः शास्त्रेष्वपि कथितम्। **"उपयोग एव प्रधानतमो धर्मोऽस्ति"**।।

अनुपयुक्ततया कृता क्रिया जीवहिंसारहिताऽपि कर्मबन्धनाय भवति। उपयुक्तमनसा कृतायां क्रियायां कदाचित् जीव-हिंसायाः प्रसङ्ग आपतेत् तथाप्याशयशुद्धितस्तदपेक्षयाल्पबन्धो जायते। अतः शास्त्रेष्वनुपयोगमानसो मुनिः षड्जीवकायविराधकः कथितः, अतः प्रतिलेखनाप्रमार्जनादिक्रिया यतिभिरुपयुक्त-मानसेन कर्तव्या।

यस्यां क्रियायां जीवदयाभावो विद्यते सा क्रिया जिनाज्ञानुसारिणी कथ्यते। जीवदयाभावेन रहिता क्रियमाणा क्रियाऽपि कायक्लेशसमाऽस्ति। प्रतिलेखनादिक्रियायां वस्त्रपात्रेषु ये केचित् त्रसजीवाः पतिता दृश्यन्ते तान् जीवान् यतनयाऽऽतपरहिते निर्जीवस्थाने स्थाप्याः। शास्त्रेषु कथितं यत् यतिभिः विविधतपांसि शक्त्यनुसारेण, स्वाध्यायादिज्ञानोपासना क्षयोपशमानुसारेण, कायोत्सर्गादि-क्रियाकलापा यथामनोबलं च कर्त्तव्या। किंतु जीवानां यतना तु मनसा वचसा कायेन एतत्त्रितयोपयोगेन कर्तव्या। अतः सर्वजीवानामतिसुलभा प्रमार्जनाऽस्ति। अतो

यतिभि: सांप्रतकाले पूज्यपादाचार्यप्रेमसूरीश्वरजीमहाराजवत् प्रमार्जनायामुपयुक्तता धारणीया।

यत: आचार्यश्रीदानसूरीश्वरजीमहाराजानां शिष्यवर्याचार्य-श्रीप्रेमसूरीश्वरजी-महाराजा निद्रायामपि हस्तपादादिशरीराङ्गानामाकुञ्चन-प्रसारणसमये रजोहरणेन प्रमार्जनं कृतवन्त आसन्। येषां महानुभावानां निद्रायामपीदृशी प्रमार्जना अवर्तत, तेषां हृदि जीवानां रक्षणार्थं कीदृशो भावो वर्त्स्यते ? इति चिन्त्यम्।

हे सुत! यदि निक्षेपणासमितिमातरं मां रक्षिष्यसि तर्हि मया सह जगत्स्थितजीवानां रक्षको भविष्यसि। जगत्स्थितजीवानां रक्षक एव वस्तुत: स्वात्मरक्षक इति कथ्यते।

## पारिष्ठापनिकासमित्याख्यमातु: संदेश:

**अणावायमसंलोए, परस्साणुवघाइए।**
**समे अज्झुसिरं वावि, अचिरकालकयंमि य ।।१।।**
**वित्थिण्णे दूरमोगाढे, नासन्ने बिलवज्जिए।**
**तसपाणबीयरहिए, उच्चाराईणि वोसिरे ।।२।।**

पारिष्ठापनिकासमित्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति, हे सर्वजीव-पालक! नन्दन! यदि त्वं ममाज्ञां पालयिष्यसि तर्हि सर्वजीवानां मध्ये प्रशंसनीयो भविष्यसि। निरुपयोगिवस्त्र-पात्र-भक्त-पान-मल-मूत्रादय-स्त्रसस्थावरजन्तुविवर्जिते क्षमातलेऽत्युपयोगपूर्वकं व्युत्सर्जनीया:।

साधव: संयमस्य साधनां शरीरेणाशरीरिपदं प्राप्तुं कुर्वन्ति, शरीरं विना संयमस्य साधना न जायते, साधनायां तु साधव: शरीरमाच्छादितुं वस्त्राणि, निर्वाहयितुं च भक्तपानादिकमुपयुञ्जन्ति। शारीरिकधर्मानुसारेण मलमूत्रादिक्रिया यथासमये भवति। तेषां मल-मूत्र-श्लेष्म-जीर्णवस्त्र-पात्रादिद्रव्याणां व्युत्सर्जनकाले ममाज्ञा सावधानतया पालनीया।

वस्त्रपात्रमलादिव्युत्सर्जनं निर्जीवभूमौ कर्तव्यम्। तत: पूर्वं भूमेर्निरीक्षणं कर्तव्यम्। उपर्युक्तश्लोकद्वयानुसारेण त्रसस्थावरजीवानामापातेन रहिता, जनानां

गमनागमनाभ्यां रहिता, षड्जीवनिकायानामनुपघातका, तलेन समाना, शुषिरैः रहिता, अचिरकालात् कृता, प्रमाणेन विस्तीर्णा, दूरं, नासन्ना, त्रसप्राणिबीजादिभिश्च रहिता भूमि: शोधनीया।

मुनिरेतादृशै र्दोषैः रहितां भूमिं विशोध्य दृष्ट्वा च प्रतिलेखनादिक्रियां कृत्वा तद्तद्भूम्यधिष्ठायकदेवानामनुज्ञार्थम्।

"**अणुजाणह जस्सुग्गहो**" इति मन्दस्वरेण वदेत्। ततो मल-मूत्राद्युत्सर्जनं कृत्वा "**वोसिरइ वोसिरइ वोसिरइ**" इति त्रिर्वारं वदेत्।

श्लेष्म-मलाद्युत्सर्जनप्रसङ्ग आपतेत् तर्हि भस्मनः उपयोगः कर्तव्यः। यतो मक्षिकादिपतनस्य प्रसंगो न भवेत्। कदाचिद् मार्गे सहसा कफाद्युत्सर्जनप्रसङ्ग आपतेत् तर्हि कफादयः पांसुभिराच्छादितव्याः। यतः समूर्च्छिमजीवानामुत्पत्ति-प्रसङ्गो न भवेत् वस्त्रपात्रादयो जल-वनस्पत्यादिरहिते निर्जलकूपे नखकेशादयश्च चटकादि-पक्षिपशुनामग्राह्ये स्थले परिष्ठापनीयाः।

अतः संयमविराधनाभीरुभिः संयमिभि धर्मरुच्यनगारवत् समितिमाता पालनीया। धर्मरुच्यनगारो गोचर्यां तिक्तालाबुव्यञ्जनं गृहित्वावासे आगतः। गुरोः पुरतो गोचरी दर्शिता, गुरुणा ज्ञानेनेदं तिक्तमिति विषजातं ज्ञात्वा निर्जीवभूमौ परिष्ठापनार्थमादेशो दत्तः। तदा धर्मरुचि र्नगराद् बहिर्निर्जीवभूमिं गवेषयति। एकत्र स्थण्डिलं दृष्ट्वा व्यंञ्जनस्यैकबिन्दु भूमौ क्षिपति, तदा परितः पिपिलिकासमूहा आगताः, व्यञ्जनमास्वाद्य सर्वे मृताः। तदा मुनिवर्यश्चिन्तयति। यद्येकेनैव बिन्दुनेयन्त्यः पिपीलिका मृताः तर्हि सर्वव्यञ्जनेन कियन्त्यः पिपीलिका मरिष्यन्ति, इति चिन्ताकुलेन मुनिना व्यञ्जनपरिष्ठापनार्थं स्वोदरमेवोत्तमं स्थलं मत्वा सर्वव्यञ्जनं स्वोदरे क्षिप्तम्। एवं मुनिवर्येण स्वप्राणदानेनाऽनेकजीवानां रक्षणं कृतम्।

यथा धर्मरुच्यनगारेण प्राणान्तेऽपि समितिमाता पालिता तथा संयमविराधनाभीरुभिः संयतैः पारिष्ठापनिकासमितिपालने सदोद्यमः कर्तव्यः।

## मनोगुप्त्याख्यमातुः संदेशः

**"विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम्।**

**आत्मारामं मनस्तज्ज्ञै, र्मनोगुप्तिरुदाहृता "।। ।।**

मनोगुप्तिसमित्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति हे सुनिश्चलमानस! मनोवत्सल! यदि परमात्मनो दृष्ट्यां स्वात्मानं स्थापितुमिच्छसि तर्हि कर्मबन्धमोक्षयोर्जनकस्य मनसो नियन्त्रणे सदा प्रयत्नवान् भव!

शास्त्रेषु मनोगुप्तिस्त्रिभेदेनोदाहृता। तेषु प्रथमार्तरौद्रध्यानानुबन्धि-कल्पनाजालवियोगस्वरुपा, द्वितीया शास्त्रानुसारिणी, परलोकसाधिका, धर्मध्यानानुबन्धिनी, मध्यस्थपरिणतिस्वरुपा, तृतीया योगनिरोधावस्था-भाविन्यात्मारामतास्वरुपाऽस्ति।

चतुर्गतिसंसारभ्रमणस्य मूलकारणमार्तरौद्रध्यानानुबन्धिमनोभावः, सांसारीकास्सर्वे शुभाशुभविचारा आर्तरौद्रध्याने समाविशन्ति, इष्टानिष्ट-संयोगवियोगौ आर्तध्यानस्योत्पत्तिस्थानमस्ति। स्व-परजीवहिंसानुबन्धि रौद्रध्यानमस्ति। संयमजीवने संयमदेहनिर्वाहार्थं वस्त्र-पात्र-वसत्याहारादीनामावश्यकता वर्तते। इष्टानिष्ट-वस्त्र-पात्र-वसत्यादिप्राप्ते सति रागद्वेषाभावेन सर्वदा प्रयुञ्ज्यात्। संयमजीवनोपकरणेषु ममत्वभावं, गुरुषु गुरुबन्धुषु शिष्येषु स्वजनवर्गेसु च स्नेहभावो रागत्वादार्त्तध्यानमस्ति। संयमजीवनोपकरणेषु मुक्तिसुखसाध्यप्राप्तौ साधनानीतिभावः, गुरुषु हृदि बहुमानभावः, स्वाश्रितशिष्यवृन्देषु स्वजनेषु चात्महितभावो धार्यः। परिषहोपसर्गेषु दीनभावो, मलमलिनगात्रेषु जुगुप्साभावो, गुरुषु गुरुबन्धुषु दुष्टचिन्तनं द्वेषत्वादार्त्तध्यानमस्ति। कर्मनिर्जरार्थिभिः साधुभिः परिषहोपसर्गेषु स्वकर्मक्षपणार्थं मित्रभावो मलमलिनगात्रेष्वजुगुप्साभावो। गुरुषु, गुरुबन्धुषु च यथासङ्ख्यम् कृतज्ञता, हितवत्सलताभावो धार्यः

यतना-तत्पर-यतिभिराजीवनं लघोरपि लघुजीवं मनो-वचः-कायै-रक्षितुं प्रतिज्ञा हिंसा करण-कारापणाऽनुमोदनात्मकप्रतिज्ञा च कृताऽस्ति। अतः श्रमणजीवने रौद्रध्यानस्य प्रसङ्गो बहुलतया न संभवेत्।

द्वितीयमनोगुप्त्यां स्थितस्य जीवस्य हृदये सर्वजीवेषु शास्त्रानुसारिणी मध्यस्था परिणति र्जायते, सत्यासत्ययो र्भेदः स्पष्टतया भासते, मनोगुप्तिः वस्तुनः शुद्धस्वरुपं ज्ञातुं चोक्षमुकुरसदृशाऽस्ति, शास्त्रानुसारितया परलोके सुगति-साधिकाऽस्ति, अतः सर्वे तपोधना द्वितीयमनोगुप्त्यां विराजमानाः सन्ति।

तृतीयमनोगुप्ति र्योगनिरोधावस्थायां सयोगिगुणस्थानके सम्भवति। यस्यां कुशलाकुशलमनोवृत्योर्निरोधेनाशेषात्मरमणतात्मनि प्रादुर्भवति। यस्यां प्राप्तायामात्मा मुक्तप्राय एव गण्यते। अस्याः प्रापणायोपयुक्तैः द्विमनोगुप्त्योरासेवनमवश्यं कर्तव्यम्।

कलिकालसर्वज्ञश्री हेमचन्द्रसूरिभि र्योगशास्त्रमहाग्रन्थे (१) कल्पनाजालेन रहिता, (२) समत्वे सुप्रतिष्ठिता, (३) स्वात्मनि रममाणं मन इति त्रिभेदेन मनोगुप्तिः कथिता।

अतो मनोजिगमिषुभि र्मुनिभि र्जिनदासश्रावकवद् मनोगुप्तिमाता रक्षणीया। स श्राद्धो यानशालायां सर्वरात्रिकीं प्रतिमां प्रतिपन्नः स्थितः। तदा तस्य व्यभिचारिणी भार्या कीलकयुक्तं पल्यङ्कं गृहीत्वा तत्राऽऽयाता सती, तस्यैव चरणोपरि मञ्चकपादं स्थापयित्वा केनचिद्दुष्टजारेण सहाऽनाचारमाचरन्ती चिरकालं तत्र स्थिता। कीलकयुतेन मञ्चकपादेन तस्य जिनदासस्य पादो विद्धः। प्रभूतं शोणितं निसृतं तथाऽपि स वेदनां सम्यगध्यासति, स्वपत्न्या ईदृशं दुष्टकार्यं दृष्ट्वाऽपि निश्चलमनसस्तस्य मनसि मनोदुष्कृतं न समुत्पन्नं धर्मध्यानस्थ एव कालगतः वैमानिकसुरो जातः। यथा जिनदासश्राद्धेन स्वप्राणात्ययेऽपि मनोगुप्तिमाता रक्षिता तथा मनोऽतीतावस्था-लिप्सुभिस्तपोधनै र्मनोगुप्तिमातारक्षणे सततं प्रयतितव्यम्।

## वाग्गुप्त्याख्यमातुः संदेशः

**संज्ञादि परिहारेण, यन्मौनस्यावलम्बनम्।**

**वाग्वृत्तेः संवृत्ति र्वा, सा वाग्गुप्तिरिहोच्यते।। ।।**

वाग्गुप्त्याख्यमाता स्वात्मजं संयमिनं प्रति कथयति हे वचोगुप्तिविशारद! यदि सर्वजनेषु प्रियो भवितुमिच्छसि तर्हि ममाज्ञा स्वहृदि स्थापनीया।

सिद्धान्ते वाग्गुप्तिर्द्विभेदेनोदाहृता, विविधाङ्गविकारादिसर्वसंज्ञानां परिहारपूर्वकं यन्मौनं सा प्रथमा, मुख-नयन-भ्रूकुटिविकारान् अङ्गुल्या-च्छोटनादिकं, लोष्टोत्क्षेपं, हुङ्कारजृम्भादिकं च परित्यज्य मौनस्याऽभिग्रहो धार्यः। वाचन-पृच्छन-पृष्टप्रश्नादिषु लोकागमविरोधेन मुखवस्त्रिकया आच्छादितमुखस्य भाषमाणस्याऽपि यद् वाङ्नियन्त्रणं सा द्वितीया।

संज्ञादिना प्रयोजनं सूचयतो मौनं निष्फलमेव, आत्मकल्याणार्थिनो मुनयः सदा मौन एव रमन्ते, ''**मौनं ये दधति**'' इति मुनय, इत्येवं स्वाभिधानं सार्थकं करणीयम्। आत्महिताय बाधकभूतेषु पौद्गलिक-विषयसुखसम्बन्धिप्रवृत्तिषु स्वात्मानं परेषाञ्चापि न प्रयुञ्जेयुः।

यदि वक्ता मुखवस्त्रिकायाः सम्यगुपयोगेन लोकागमाविरुद्धां वाणीं वदेत् तर्हि वक्ताऽपि वाङ्नियन्त्रकः कथ्यते। प्रथमगुप्तौ भाषाया निषेधः, द्वितीयायां भाषाया नियन्त्रणं दर्शितम्। भाषासमिति-वाग्गुप्त्यो र्भेदोऽस्ति, भाषासमित्यां सम्यग्वाक्प्रवृत्तिः, वाग्गुप्तौ सर्वथा वाङ्निषेधो वाङ्नियन्त्रणं च, शास्त्रानुसारेण कथनस्य प्रसङ्गे ये मौनं दधति ते वचोगुप्त्याराधका न सन्ति।

अतः शास्त्रे कथितम्

**''समिओ नियमा गुत्तो, गुत्तो समिअत्तणंमि भयणिज्जो।**

**कुशलवयमुइरंतो, जं वइगुत्तो वि समिओ वि ।। ।।**

समित्या आसेवको नित्यं गुप्त्या आसेवकोऽस्ति् किंतु गुप्त्या आसेवकः समित्या आसेवकोऽस्ति वा नास्तीति भजना (विकल्पः) ज्ञातव्या।

यदि त्वं स्वात्मगुणेषु गुप्तो भवितुमिच्छसि तर्हि त्वयाऽपि चौरै गृहीतसाधुवद् गुप्तिमाता दृढतया पालनीया। एकदा केचन साधवः स्वस्वजनान् प्रतिबोधयितुं गच्छन्तो मार्गे तस्करैर्गृहीताः तस्कराधिपतिना निष्परिग्रहसाधून् दृष्ट्वास्मद्वृत्तान्तं कश्चिदन्यं मा चीकथत इति कथयित्वा मुक्ताः। साधवो मार्गेऽग्रे चलन्ति स्म, तदा किश्चिद् विवाहादिकार्यार्थं ग्रामान्तरं व्रजन्तः स्वजनाः सन्मुखं मिलिताः। तदा ते साधवः स्वजनैः सह प्रतिनिवृत्ताः पुनः मार्गे स्तेनैः स्वजना लुण्टिताः, तदा चौराः पूर्वमुक्तान् मुनीन् दृष्ट्वा परस्परं कथयन्ति इमे त एव साधवो येऽस्माभि र्मुक्ताः। चौराणां वचनं श्रुत्वा स्वजनाः साधून् कथयन्ति यदि भवद्भिः स्तेना दृष्टास्तदा वयं कथं न बोधिताः, तदा साधवः स्वगुप्तिमातापालनं सुष्ठुरीत्या प्ररुपयन्ति तदा प्रबुद्धैः स्तेनैः सर्वसार्थो मुक्तः।

साधुजीवने सर्वसंक्लेशानां मूलं वागस्ति, यदि भाषणस्य प्रसङ्ग आपतेत् तर्हि स्वपरबाधा रहिता वाग् वक्तव्या। तां वक्तुं समर्थो न भवेत् तर्हि मौनं धार्यम्

"**मौनमेव सर्वार्थसाधकं कथितम्**" मौनमेव जीवान् वशीकर्तुं श्रेष्ठतममन्त्रोऽस्ति यावत् शब्द: स्वमुखाद् न निर्गच्छति तावत् सोऽस्मद्शासनेऽस्ति। सकृदपि मुखाद् निर्गत शब्दस्य वयं ग्रहका:स्म:।

एकदा केनचिद् राज्ञा स्वनिकटवर्तिनं सांवत्सरिकमाहूय स्वमरणकाल: पृष्ट:। तदा वाग्गुप्तिनाऽगुप्तेन तेन कथितम्, अद्यत: सप्तमे दिने भवतो मृत्युर्भविता। तदा राजा तस्मिन्नुपरि कोपाकुलो जात:, स देशान्निष्काशित:। तदनन्तरमपरो ज्योतिष आकारित:। तस्य पूर्ववत् प्रश्न: पृष्ट:। वाग्गुप्तिना गुप्तेन तेनोक्तं भवानतिभाग्यवानस्ति। स्ववंशे कस्यचिदपि मरणमद्रष्टा भविता, राजा तस्योपरि तुष्ट: पारितोषिकं दत्वा स विसर्जित:।

यथा द्वितीयगणकेन लोकागमाऽविरुद्धवाचा राजा तोषितस्तथा वाग्गुप्तिगुप्तेन त्वयाऽपि स्वपरागमाविरुद्धवाग्जल्पने सदा प्रयत्न: करणीय:।

## कायगुप्तिमातु: संदेश:

**उपसर्गप्रसङ्गेऽपि, कायोत्सर्गजुषो मुने:।**

**स्थिरीभावशरीरस्य, कायगुप्तिनिर्गद्यते ।। ।।**

कायगुप्त्याख्यमाता स्वात्मजं संयमिनं कथयति, हे तनुरुह! यदि जगति स्वनामसार्थकं कर्तुमिच्छसि तर्हि ममाज्ञाऽप्रमादेन पालनीया। साधनाया विराधनायाश्च सर्वश्रेष्ठसाधनं कायोऽस्ति, धर्मस्याद्यसाधनं कायोऽस्ति, इति मत्वा साधनामार्गे कायं सदा प्रयुञ्ज्यात्। विराधनामार्गाच्च विरमेत।

शास्त्रेषु कायगुप्ति द्विप्रकारेणोक्ता, प्रथमा कायेन सर्वचेष्टाया: परिहाररूपा, द्वितीया तु स्वच्छन्दचेष्टाया: परिहाररूपा, प्रथमा कायगुप्तिस्तु सुरासुरनर-तिर्यक्कृतोप-सर्गपरिषहकाले अथवोपसर्गपरिषहाऽभावेऽपि सर्वथा कायचेष्टा परिहारेण योगनिरोधं कुर्वत: केवलिन: शरीरचेष्टापरिहाररूपा प्रथमा कायगुप्ति र्विद्यते।

सांप्रतकालिनसंयमिभि: द्वितीये स्वच्छन्दचेष्टात्यागादिरूपकायगुप्तिपालने सदा यत्न: कर्तव्य:। संयमजीवनस्य काचिदपि क्रिया शरीरमन्तरेण न भवति। येन शरीरेण संयमजीवनस्य साधना क्रियते तेन शरीरेण शयनाऽऽसन-निक्षेपाऽऽदान-

चङ्क्रमणप्रसङ्गेषु समयोक्तचेष्टानियमो धारणीयः। शयनविषये तु यामिनी-प्रथमयामेऽतिक्रान्ते गुरुनापृच्छ्य प्रमाणयुक्तायां वसतौ भूमिं संप्रेक्ष्य प्रमृज्य च संस्तारोत्तर-पट्टकद्वयमास्तीर्य, उर्ध्वकायं मुखवस्त्रिकया, अधःकायं च रजोहरणेन प्रमृज्य नमस्कारमहामन्त्रस्मरणेन दिनकृतातिचारानालोच्य सर्वजीवान् प्रति क्षमाभावयुक्तः कृतवामभुजोच्छीर्षक, आकुञ्चितजानुकः, कुकुट्टिवद् प्रसारितजङ्घः स्वप्यात्। रात्रौ हस्त-पादादिसङ्कोचनप्रसारणप्रसङ्गे रजोहरण-मुखवस्त्रिकादिभिः प्रमार्जनपरो भवेत्। कर्मभिः श्रान्तोऽपि सदाऽभ्रान्तः श्रमण आगमोक्तकाले रात्रौ शयीत दिवा च कारणेन विना न शयीत। यत्र प्रदेशे श्रमण उपविविक्षुरस्ति तं प्रदेशं पूर्वं चक्षुर्भ्यां निरीक्ष्य पश्चाच्च रजोहरणेन प्रमृज्य निषद्यामास्तीर्योपविशेत्, उपविष्टोऽप्याकुञ्चन-प्रसारणादि-प्रमार्जनपूर्वकं कुर्यात्, वर्षाकाले कारणेनान्तरेणासनाद् नोत्तिष्ठेत्, वृष्ट्यादिपतनप्रसङ्गे वर्षाकल्पेन सर्वशरीरं प्रावृत्यैकासने निश्चलं स्थेयम्, वर्षाकाले पीठफलकादिषु यतनापूर्वकमुपविशेत्। वस्त्र-पात्र-दण्डाद्युपकरणाऽऽदान-निक्षेपप्रसङ्गे प्रतिलेखना प्रमार्जना च यतनया विधेया। आहार-निहार-विहारादिप्रयोजनवतः साधोः पुरस्ताद्युगमात्रप्रदेशं दृष्ट्वा त्रस-स्थावरजीवानां रक्षा कर्तव्या। अत्वरया गत्या पादन्यासो कर्तव्यः। यतो जीवविराधनायाः प्रसङ्गो नाऽऽपतेत्।

यो मुनिः कायेन षट्कायजीवान् विराधयति, स वस्तुतः कायेन कायगुप्तो नास्ति, षड्जीवकायान् यः स्वकायवद् गणयति, स कदाऽपि तेषां हिंसायां न प्रवर्तते सोऽध्वप्रपन्नकश्रमणवत् कायगुप्तिमातू रक्षको भवति।

एकदा श्रमणसमुदायः सार्थेन सहैकग्रामादपरग्रामं गच्छति। मार्ग एकसाधुः सार्थाद् भ्रष्टो जातः। सार्थं न कुत्रापि लभते, मार्गे गच्छतस्तस्य क्वचिदपि स्थण्डिलं न प्राप्तम्। एकस्मिन् स्थान एकपादं प्रतिष्ठत्येतावन्मात्रं स्थंडिलं लब्धं, तत्र स्थितैकपादेन सर्वा शर्वरी व्यतीता, अस्थंडिले पादो न स्थापितः।

यथा सार्थभ्रष्टश्रमणेन त्रसस्थावरजीवानां रक्षणार्थं कष्टेनाऽपि कायगुप्तिमाता पालिता तथा त्वयाऽपि गुप्तिमातुर्पालने निरन्तरं प्रयत्नः करणीयः। इति शम्।।



# श्री रामचन्द्रीयं महाकाव्यम्...

**- पंन्यासपप्रवरश्रीमोक्षरतिविजयगणिवराः**

श्रियमेष दधावलौकिकां, ललमानः करतः परं करम् ।
कमलं कमलादिवापराद्, रममाणः कलहंसबालकः॥ वियोगिनी, औपच्छन्दसिकं वा ॥ ॥१॥
त्रिपदीपदवीमनुव्रजन्, भुवनं पालयिताघतः स यत् ।
भुवनादिमपाल इत्यसौ, त्रिपदादिर्गुरुणा तदौच्यत[1] ॥२॥
शिशुतोचितखेलनेऽपि स, स्वसहायान्[2] वृषदेशनां[3] ददौ ।
भवितव्यमहाप्रवक्तृता,- जिनधर्माधिपतित्वसूचिकाः ॥३॥
स्वसुतस्य दिवः सुखासिका,- मुपचारैः किमु कर्तुमुद्यतौ ।
पितरौ दिवमीयतुः क्रमा,- दनिमेषाक्षि[4] च रुपमीक्षितुम् ॥४॥
मरणं प्रकृतिः शरीरिणां, विकृतिर्जीवितमुच्यते बुधैः ।
उपदेशमिमं विनापि स, स्वमनः शोकविनाकृतं व्यधात् ॥५॥
भवसौख्यपरंपरापरा,- ङ्मुखपित्रोरवलोक्य जीवितम् ।
भवति स्म पुरा विरागभाक्, स इदानीं तु विरागवृद्धिभाक् ॥६॥
जलबुद्बुदवज्जलोर्मिवज्, [5]जलबालाविलसद्विलासवद् ।
जलवाहधनुर्वदङ्गिना,- मचिरस्थायि परैमि जीवितम् ॥७॥
तरुणे च शिशौ च यूनि च, क्षितिपाले च जने च नागरे ।
बठरे च बुधे च तुल्यधीः, समवर्ती शमनः[6] प्रवर्तते ॥८॥



१. एतावता त्रिभुवनपाल इति नाम समर्थितम् । २. मित्राणि । ३. धर्मदेशनाः ।
४. क्रियाविशेषणमेतत् । ५. जलबाला विद्युत् । ६. यमः

गणनातिगतायुषः सुरा, अपि नाम्ना ह्यमरा इतीरिताः ।
धरणीं यदतीत्य वर्तते, मरणं द्युष्वपि सर्वतोगतिः ।।९।।
अपहाय भवेऽत्र मीलिता,- नपरत्र स्वजनान् पुनर्नवान् ।
तनुते तनुमान् पुनः पुनः, परमाप्नोति न सौख्यमीप्सितम् ।।१०।।
जननी मम यत् स्म भाषते, तदिदानीमुचितं प्रभासते ।
यतनीयमिह स्थिराय नि,- र्वृतिसैख्याय हि बुद्धिशालिभिः ।।११।।
क्षणभङ्गुरतां जगत्स्थिते,- रिति सञ्चिन्तयतोऽस्य लक्षिता ।
अवलोक्य मुखं विचक्षणै,-र्भववैमुख्यविचारणा जनैः।। षड्भिः कुलकम्।।
स्वजनान् गतयोर्दिवं जनै,- र्गृहमाश्वासयितुं समागतैः ।
मुखमस्य विलोक्य शोकहृत्, स्वयमाश्वासनमापि चित्रकृत् ।।१३।।
विदुषोऽथ मुखात् कलिन्दिकां[१], सहसासौ सुगृहीतवान् सुधीः ।
गुरवस्तु गृहीतशारदा,-मनसां साक्षिण एव केवलम् ।।१४।।
तरुणस्य विलोचनाम्बुज,- द्वितयी वेदनया कदाचन ।
सरसीरुहिणी यथोग्रया, हिमवृष्ट्या किल जग्रसेतराम् ।।१५।।
न जलं नहि भोजनं नहि, स्थितिरस्मै नहि रोचते गतिः ।
अतिवाहयति स्म वासराञ्,- शयनीयस्थित एष काँश्चन ।।१६।।
व्यथयाथ कदाचिदार्तदृङ्, निशि शय्यागत एष लोकते ।
उपनिःसरणि व्यवस्थितां, वरतेजःसरणीं मनोरमाम् ।।१७।।
परिसर्पति सान्द्रतामसे, न विवेद स्फुटमेष किञ्चन ।
स्मय-विस्मय-मिश्रिताशयः, परमेवं स्वगतं व्यकल्पयत ।।१८।।
शशिनः किमियं नु कौमुदी, पतितान्तर्निलयं गवाक्षतः ।
धरणीं पवितुं किमागता, सुरगङ्गा गगनादियं स्वयम् ।।१९।।
स्मयमाननिशः प्रियागमा,-ल्ललनायाः किमु दन्तकान्तयः ।
अत एव तया प्रकाशिता, किमु वा दीपशिखा प्रभास्वरा ।।२०।।

१. सर्वविद्याम्।

तमसां सकलस्थलस्पृशां, गगनस्पर्शितरङ्गपङ्क्तितः ।
किमिहैष महासमुद्रतः, परिवर्षत्युत फेनसञ्चयः ।।२१।।
सुकृतस्रगियं नु नेत्रयो,- रपनेतुं परितापमागमत् ।
इदमाः कलयामि मातरं, त्रिदशावासविभूषणं मम ।।२२।।
इति यावदयं विनिश्चयं, कुरुते तावदसौ सुराङ्गना ।
सविधेऽस्य रयादुपागता, परिपस्पर्श च पाणिनाक्षिणी।।षड्भिः कुलकम्।।२३।।
उदमीलदसौ दृशौ द्रुतं, परमासीन्नहि तत्र किञ्चन ।
जननी नहि नाकवासिनी, नयनस्था महती व्यथापि न ।।२४।।
शुशुभेऽथ स यौवनश्रिया, बहिरन्तश्च गुणश्रियाश्रितः ।
सहकारफलं मनोहरै,- रिव रुपैश्च रसैश्च सौरभैः ।।२५।।
यदभाज्जगदक्षिविश्रमं, प्रथमादेव महोऽस्य विग्रहे ।
गगनार्धगतस्य तद्रवे, -रिव पूर्णं युवतागतावभूत् ।।२६।।
कथयन्ति कचा इवास्य नून्, कुटिलत्वं धरत क्वचिन्नहि ।
परथा तु बहिष्कृतिं तथा,ऽसिततां चाप्स्यथ भो यथाप्नुम ।।२७।।
महतामपि चित्तचित्रकृत्, तरुणस्यास्य कलासु कौशलम् ।
यदनेन कचेषु केवलं, निदधाते कुटिलत्वकृष्णते ।।२८।।
अतिमात्ररते सुरीसुरे, वदनेऽमुष्य सुधाऽभिवर्षिणि ।
अमृतार्चिषि[१] लाञ्छनच्छला,- दभवत् किन्ननु शैवलोदयः ।।२९।।
कमलं तरणेरपेक्षते, कुमुदं चन्द्रमसस्तथोदयम् ।
दिनरात्रि दधत् प्रसन्नतां, जयति द्वे अपि ते तदाननम् ।।३०।।
मधुरध्वनिना वलित्रया,-ङ्कितकण्ठेन जितोऽमुनाम्बुधेः ।
पतितः किल पाञ्चजन्य उत्,-कलिकायां[२] कृपयाहिना[३] धृतः ।।३१।।
जगदुद्धरणक्षमौ भुजा,- विदमीयावभिराजतस्तराम् ।
धृतभीमविषेण कस्तयो,- स्तुलनामिच्छतु सर्पचक्रिणा[४] ।।३२।।

१. चन्द्रे । २. उत्कलिकाः समुद्रतरङ्गाः ३. अहिना विष्णुना ४. शेषनागेन ।

श्रुतसागर आश्रयिष्यते, तदितीवाशयतः प्रजापतिः ।
हृदयं पृथुलं विनिर्ममे, तरुणस्यास्य सुधीशिरोमणिः ॥३३॥

ध्रुवमङ्ग-[१]विलालसत्प्रभा, सरिदावर्त इवास्य नाभिका ।
नहि चेत् कथमन्यथा नु तत्-, परितो रोममिषेण वीचयः ॥३४॥

मृगशत्रुवदुन्नतं ततं, धरता तेन नितम्बमुच्यते ।
जगते यदतःपरं त्वया, नहि भेयं दुरितेभयूथतः ॥३५॥

जिनशासनमन्दिरस्थिरी,- करणे, सुदृशां स्तम्भतुलां वदन्निजाम् ।
तरुणस्य महोरुयामलं, सुदृशां स्तम्भसमं दृशोऽहरद् ॥३६॥

चरणे शरणे भविष्यतः, सुजनानामिति चिन्तयन् ध्रुवम् ।
व्यधितास्य प्रजापतिः सुधी,- रसि-चक्राशनि-चाप-चिह्निते ॥३७॥

चिरतः पृथगाश्रयाश्रिता, मति-लक्ष्मी-धृति-कीर्ति-कान्तयः ।
किमिवैकनिवासवासना,- वशतस्तत्र मुदैयरू[२] रयात् ॥३८॥

विदधात्विदमीयविग्रह,-प्रभया स्पर्द्धनमद्रिरामरः[३] ।
सविधे परमस्य धीरता,- विषये स्थातुमपि प्रभुर्न सः ॥३९॥

व्रतभङ्गभवक्रुधा भवो, न ददाहाङ्गभवं[४] सुनिश्चितम् ।
नहि चेत् कथमन्यथा हिमा- लयजातां प्रमदामुपायत ॥४०॥

परमेष समर्थिकासुता,- ङ्गतुलारोहणपापकृत् स्मरः ।
लघु दह्य इति प्रजापते,-र्वचनेनादहदेनमीश्वरः ॥ युग्मम् ॥४१॥

शमिनां सविधे कदाचन, स्वयमेवाथ कदाचनामुना ।
श्रुतमापि तथा तथा यथा, व्रतिवर्गेऽपि बभूव विश्रुतः ॥४२॥

परमप्रतिभाद् यतः परा,- भवभीतेव सरस्वती करात् ।
न जहाति तदादि पुस्तकं, क्व नु कुर्यात् करपीडनोत्सवम् ॥४३॥

न कथञ्चन तद्विबुध्यते, चिरतश्चिन्तितमप्यहो बुधैः ।
किमयं ननु दोषभीरुकः, किमु दोषाश्चकिता अतः सतः ॥४४॥

---

१. विलालसत् भृशं विलसत् । २. आगमन् । ३. आमरोऽद्रिः - मेरुगिरिः ।
४. मन्मथम् ।

सकलासु कलासु कौशलं, वचनं श्रीरचनं हितं मितम् ।
परमासु रमासु मानसं, महतां स्यान्महदेव वाखिलम् ॥४५॥
बहुना किमिदङ्गुणान् विधिः, परिमातुं प्रतिरात्रि सोद्यमः ।
कुरुते गगनं सतारकं, कुरुहान् पल्लवयत्यहर्निशम् ॥४६॥
इतश्च-अभवज्जिनभास्करः पुरा, भगवान् वीर इति श्रुतो बुधैः ।
निजगोभिरनेन शाम्यते, भविनां मोहकृतो महातपः ॥४७॥
जिननामफलं स तीर्थकृद्, भुविं तीर्थं विरचय्य निर्वृतः ।
पदमस्य सुधर्मसंज्ञकः, श्रयते पञ्चमगच्छनायकः ॥४८॥
क्रमशः पदमेतदाश्रयन्, यतयो जैनवचोवशंवदाः ।
कृतभाग्यभरा यथा नराः, पदमुच्चैरमरावतीपतेः[१] ॥४९॥
अथ विंशशती[२]दिवापति,-र्विजयानन्दगुरुर्गुरूपमः[३]।
समजायत सूरिपः स्वक,- द्युतिविद्योतितविश्वविश्वकः ॥५०॥
प्रभुवीरपदं विराजयद्,-गणराजामरिहन्तसधर्मणाम् ।
अभवत् स किल त्रिसप्ततः, शिवमार्गैकरतिर्महामतिः ॥५१॥
विजयान्तिमहीरसूरिपा,-दनु यद्व्याप तमोऽर्हतां मते ।
रविवत् तददूरयत् सुधी,- रपरात्मादिमरामनामवान् ॥५२॥
प्रथमं श्रमणः स ढुण्ढकं, मतमङ्गीकुरुते स्म सादरः ।
प्रतिभाभिमुखीभवद्गुरोः, स्वमहत्त्वेन च चेतसि स्थितः ॥५३॥
ऋतशोधनशीलशालिधी, रहसि व्याकरणं च सोऽपठत् ।
निजवृत्तजिनाध्वनोः क्रमाज्,-जिनशास्त्रान्निविवेद भिन्नताम् ॥५४॥
प्रतिमां वदतः स सिद्धिदां, सुमतस्याभ्यसनाय तत्परः ।
समबुद्ध परानबोधयत्, सुमतं स्वीकृतवान् सहानुगः ॥५५॥
मतिमेरुवगाहितागम,-श्रुतसिन्धुर्बहुलां स्थले स्थले ।
जनताममृतेन सोऽकरोद्, वचसा मृत्युभयोज्झितां सुधीः ॥५६॥

१. इन्द्रस्य । २. विक्रमीया विंशशती बोद्धव्या । ३. आत्मारामजी इति ।

अमितप्रतिभा प्रभोः स्म सन्,-ततमाकर्षति बुद्धिशालिनः ।
सुरभिः सलिलोद्भवोद्भवा[1], मधुलुब्धानिव दूरदूरतः ॥५७॥
प्रति[2]घस्रमनेन कुर्वता, त्रिशतीं कण्ठगतामनुष्टुभाम् ।
जिनशास्त्ररहस्यमर्जितं, [3]समयालिर्विहिता हिता नृणाम् ॥५८॥
यशसोज्ज्वलिताखिलावनी,-वलयः श्रीश्रुतदेवताश्रयः ।
अभवद्यश आह्ववाचक,- स्तदनु त्वेष विदुर्बुधा इति ॥५९॥
इदमीयपदं यथा सरः, कमलं श्रीकमलः शमीश्वरः ।
जिनशब्दसमर्पणादिभि,-र्गुरुदत्तैः सुगुणैर्व्यराजयत् ॥६०॥
प्रथमं यतिनैष केनचिच्,- छलतोऽलम्भयत् व्रतं[4] सुखम् ।
परमार्हतसंयमेच्छुकं, न कथञ्चित्तमलम्भयत् सुखम् ॥६१॥
सुगुरोः प्रतिमानुरागिणः, सविधे संयममाप ढौण्ढकम् ।
गुरुणा सह मूर्तिपूजका,- भिमतं सोऽश्रयत व्रतं ततः ॥६२॥
प्रगरुः स च पर्यदीपयत्, क्रमशः पञ्चनदाह्वमण्डलम् ।
इव दक्षिणदिग्विराजितं, भरतं वर्षवरं दिनेश्वरौ ॥६३॥
निदधाति निरीहतामुखां, गुणलक्ष्मीमिह लोकवत्सलः ।
प्रगुरुः शशिनीव भानुमान्, दिवसान्तेऽस्तमयन्निजप्रभाम् ॥६४॥
ददता करुणोपदेशना,-मृतमेतेन नृपाल-पङ्क्तये ।
विहितं महदद्भुतं मृते,-रपरप्राणितमाशु रक्षता ॥६५॥
मुनिमोहनसंज्ञ आह्वितः, सुधिया वादकृतेऽन्यदा यदा ।
चकितः स च नागतस्तदा, प्रतिमा सेधयति स्म पर्षदि ॥६६॥
जिनदेवमतस्य सेवना,- मितरत्राप्यकरोन्निवारयन् ।
कुमतानि बहूनि मैथिली,- हलिविघ्नानि यथैव लक्ष्मणः ॥६७॥
पदमेतददीपयत् ततो, विजयश्रीयुतदानसूरिपः ।
कनकं कषपट्टिका यथा, युवता वा तनुरुपसम्पदम् ॥६८॥

१. पद्मजा । २. घस्रः दिवसः । ३. शास्त्रश्रेणिः । ४. तत्कालप्रचलिताया जिनमतबाह्याया यतिपरंपराया व्रतम् ॥

वटपद्रपुरीपतिं सुधी,-रुपदेशं प्रददान आबभौ ।
क्षितिपालमकब्बराभिधं, गुरुहीरः शमिनामिव प्रभुः ॥६९॥
सुजनाः पदपद्म सेवितुं, कलहंसाः सुखमाययुः परम् ।
अवलोकितुमप्यनीश्वराः, खलघूका मुखभास्करं प्रभोः ॥७०॥
शिशुसंयममेक आर्हतं, मुनिसंमेलन आक्षिपन्मुनिः ।
जिनशास्त्रमतिर्निरुत्तरं, स तमेकोऽपि चकार हेलया ॥७१॥
विहरन्मरुमण्डलेऽन्यदा, प्रखरज्योतिरभिज्ञमाह्वयत् ।
अजयश्च मुहूर्तचिन्तने, कृतवादः स महेन्द्रसंज्ञकम् ॥७२॥
विनयी विबुधोऽपि शीलवान्, सुभगोऽपि प्रशमी क्षमोऽपि सन् ।
स गुणानपि नित्यवैरिणः, कृतवानेकनिकेतनान् प्रभुः ॥७३॥
स्वपरागमसिन्धुजीवित,-[1]प्रभवेऽगस्तिऋषीश्वरायितम् ।
गुणवारिधि[2]-नन्दनाकृते, धरणीधारक-धारकायितम्[3] ॥७४॥
पवनायितमर्हदागम,-च्छविविच्छादकवारिवाहके ।
गगनायितमप्युदीतयो,-र्विनयज्ञानहिमाहिमार्चिषोः ॥७५॥
भविकभ्रमरोत्करे पुनः, शतपत्रायितमम्बुदायितम् ।
कुमत-[4]प्रखरांशुतापिते, ऽखिलविश्वे खलु तेन सूरिणा ॥७६॥
विजयादिमरामचन्द्रमो,-विजयप्रेममुनीश्वराविति ।
उपहारमदाद् य ईदृशं, जिनसङ्घाय स वर्ण्यतां कथम् ॥७७॥
तदुपास्तिरतिर्व्यराजयद्, विजयप्रेमगुरुः पदं ततः ।
विजयादिमरामचन्द्रमः,- शमिचन्द्रं य इहाप भाग्यभाग् ॥७८॥
जिनवाग्दयितारतोद्भवद्,-विमलब्रह्मगुणाभिभूषितः ।
भवसौख्यपराङ्मुखः सुधी,-र्व्रतसंसेवनधीरमानसः ॥७९॥
निजपूर्वजवत् स लीलया, जिनराजागमपारमीयिवान् ।
गुरुणा भणितस्ततः स यत्, किल सिद्धान्तमहोदधिर्भवान् ॥८०॥

१. सिन्धुजीवितप्रभुः समुद्रः । २. गुणलक्ष्मीकृते । ३. विष्णुरिवाचरितम् ।
४. प्रखरांशुः सूर्यः ।

पठनं रचनं च वीक्ष्य सोऽ,-बहु कर्मागमगोचरं कृती ।
अपठश्च परानपाठयन्, नवसाहित्यमकारयद् बहु ॥८१॥
वरवत्सलपाणिना गुरुः, स समत्याजयदङ्गिभिर्भवम् ।
इव कार्मणकारिणाखिला,-न्यपि कर्माणि रवेण कोकिलः ॥८२॥
स्थगिताध्ययनस्य धीमता, कठिनग्रन्थमणेरुपक्रमः ।
पठनस्य चिरात्पुनः कृतः, किल कर्मप्रकृतेरभिख्यया ॥८३॥
अचिराच् चलितां परंपरा,-मनृतां प्रोज्झ्य गुरूपदेशतः ।
स हि पर्वतिथेरपि प्रभुः, क्षतिवृद्धी बहुमन्यते सुधीः ॥८४॥
विजयान्तिमदानसंयत,-प्रभुरात्मव्रतिभिः सहैकदा ।
ग्रहनाथ इव ग्रहैर्मरुत्,-पदवीं[1] ग्राममिमं [2]समाश्रितः ॥८५॥
दीक्षादाननिदानचिन्तनपरस्तावत् समर्थासुतः,
श्रीमद्दानगुरोः समागमकथां, कस्माच्चनाकर्णयत् ।
एकं विप्रजनः क्षुधार्त इतरत् स्थालं भृतं मोदकै,-
रेकं कामवशा मृगीदृगपरं केकायितं केकिभिः ॥ शार्दुल० ॥८६॥

इति श्रीरामचन्द्रीयमहाकाव्ये जिनशासनशृङ्गार-गणनातीतगुणगणालङ्कार-मुमुक्षुजनप्रणाधार-पूज्यपादाचार्यदेव-श्रीमद्विजय-**रामचन्द्रसूरीश्वर**-चरित-वर्णनात्मके द्वितीयः सर्गः ॥

---

१. आकाशम् । २. पद्रकाभिधम् ।





# ।। श्रीआदिजिन अष्टकम् ।।

**- पंन्यासप्रवर श्री अजितयशविजय गणिवराः**

**(अधुना- पूज्यपादाचार्यप्रवर श्री अजितयशसूरीश्वराः)**



* विद्यादिमंडनमुनीशकृतप्रतिष्ठं,
कर्माख्यश्रेष्ठिरचितं शुभबिंबश्रेष्ठम् ।
उच्छ्वाससप्तकप्रसिद्धप्रभावपुष्टं;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।१।।

* वेलायते लवणिमा ननु देहतीर्थे,
वर्तायतेऽक्षियुगलं शफरायमानम्।
यस्मिंश्च भव्यजनभावनदीप्रयागः;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।२।।

* कूर्मावतारचरणं, कमलावतारं,
नेत्रं च तेऽथ वदनं मिहिरावतारम् ।
चन्द्रावतारधवलं, किल मारुदेवं;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।३।।

* मध्यस्थताजनितशुद्धप्रसन्नताढयौ,
मैत्रीप्रमोदकरुणाजलपुष्करिण्यौ ।
यल्लोचने प्रथयतस्त्रिजगत्पतित्वं;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।४।।

* सिद्धाचले चलविधूनितवैजयन्त्या,
भव्यान् निमन्त्रयति यस्य जिनेन्द्रसद्म ।

सौवर्णदण्डकलशं कलुषोपशान्त्यै;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।५।।

* चक्रध्वजाङ्कुशझषैः परिराजमानं,
यस्यास्ति पादयुगलं सलिलं त्वघाय;
श्रीक्षीरपादपतलेऽखिललोकपूज्यं;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।६।।

* श्री शान्तिचैत्यप्रमुखै र्बहु चैत्यवृन्दै,
वृन्दारकालय-परीसरमस्ति यस्य ।
यस्यास्ति सन्मुखमहो गणिपुण्डरीकः;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।७।।

* निर्वारिषष्ठतपसान्वित-सप्तयात्रा,
नूनं हि यस्य भवसागरयानपात्रम्।
यस्तीर्थनायकजिनो वृजिनौघवैरी;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।८।।

* सूरीश**लब्धि**-गणनायक **विक्रमाख्य**-,
सूरीश्वरस्य कृपया **यशसाजिताख्यः** ।
यस्याष्टकं खलु विधाय लभेय मुक्तिं;
सौभाग्यवारिनिधिमादिजिनं नुवे तम् ।।९।।

## शाश्वतगिरितीर्थनामस्तोत्रम्

१. **श्रीशत्रुञ्जयगिरितीर्थम्**

* षण्मासतः सकलशत्रुगणं विजित्य,
ते प्राप्नुवन्ति शुकराज इवाशु राज्यम्।
ध्यायन्ति ये गिरिवरे परमेष्ठिमन्त्रं;
शत्रुञ्जयं सकलशत्रुहरं नुवे तम् ।।१।।

२. **श्रीपुंडरिकगिरितीर्थम्**

* आदीश्वरोक्तवचनाद् गणिपुण्डरीकः,

आगत्य निर्वृतिपुरीं मुनिपञ्चकोट्या,
मासोपवासकरणेन गतोऽत्र तेन ।
श्री पुण्डरीकगिरिराजमहं नुवे तम् ॥२॥

३. **श्रीसिद्धक्षेत्रगिरितीर्थम्**

* उद्धारका गिरिवरस्य ततश्च सिद्धाः
पाण्डोः सुता द्वि-दशकोटियतीशयुक्ताः ।
प्राप्तुं च सिद्धपदवीं खलु यत् प्रसिद्धं;
क्षेत्रं च सिद्धपदयुक्तमहं नुवे तम् ॥३॥

४. **श्रीविमलगिरितीर्थम्**

* नीरन्ध्रपापमलिनं विमलीचकार,
श्रीचन्द्रशेखरनृपं खलु तीर्थराजः ।
लोकाग्रसंस्थितपदं विमलं ग्रहीतुं;
तीर्थाधिराजविमलाद्रिमहं नुवे तम् ॥४॥

५. **श्रीसुरगिरितीर्थम्**

* यं पूजयन्ति जिनशासनभक्तदेवाः,
सत्सात्विकाश्च बहवस्त्रिदशास्तथैव ।
यत्रोद्धरन्ति हरयो बहुतीर्थभक्त्या;
तस्मात् सदा सुरगिरिं प्रथितं नुवे तम् ॥५॥

४. **श्रीमहागिरितीर्थम्**

* षड्विंशयोजनमितोन्नतता तथा च,
यस्यास्त्यशीतिरिति योजनतो बृहत्ता ।
यस्यामरासुरनरै र्महिता महत्ता;
मुक्त्यै महागिरिवरं प्रकटं नुवे तम् ॥६॥

७. **श्रीपुण्यराशिगिरितीर्थम्**

* माहात्म्यतोऽस्य बकुशाश्च कुशीलकाश्च,
माहात्म्यमेव विगुणा अपि प्राप्नुवन्ति ।

पुण्यं सहस्रगुणकं लभतेऽत्र दानात्;
श्रीपुण्यराशिगिरिवर्यमहं नुवे तम् ॥७॥

८. **श्रीपदगिरितीर्थम्**

* यत्राप्नुवन्ति जनताः कृतभक्तिपानाः,
पुण्यश्रियां शिवश्रियां च पदं दधानाः।
[1]निध्यूनकोटिमुनिभिस्सह नारदोऽत्र;
मुक्तोऽथ-श्रीपदगिरिं सततं नुवे तम् ॥८॥

९. **श्रीइन्द्रप्रकाशगिरितीर्थम्**

* सीमंधरै, र्जिनवरैः शिखरीश्वरस्य,
देवेन्द्रसन्मुखमहो महिमा सुगीतः ।
यस्माच्चतुर्दशजगत्सु न तीर्थमन्य-
दिन्द्रप्रकाशगिरिवर्यमहं नुवे तम् ॥९॥

१०. **श्रीमहातीर्थगिरितीर्थम्**

* लोकत्रये सकलतीर्थवरस्य यात्रां,
दानं च श्राद्धदशकोटिगणे विदध्यात् ।
लाभस्ततोऽपि च महान् मुनिदानतोऽत्र;
तीर्थं महादिपदयुक्तमतो नुवे तम् ॥१०॥

११. **श्रीशाश्वतगिरितीर्थम्**

* यद् राजतेऽत्र भुवि तीर्थमनादिकालाद्,
यत् संप्रति त्रिभुवने जनदुःखहारि ।
आनन्त्यमस्य समयेन गिरेस्समस्ति;
तस्माद् हि शाश्वतगिरिं सततं नुवे तम् ॥११॥

१२. **श्रीदृढशक्तिगिरितीर्थम्**

* तीर्थस्य यस्य मधुकार्तिकपूर्णिमायाः,
यात्राऽतिपापमलिनेष्वपि सिद्धिदात्री ।
क्रूराः कषायबहुला दढशक्तितोऽस्य;

---

१-निधिः=नव

शुद्धयन्ति शैलदृढशक्तिमतो नुवे तम् ।।१२।।

१३. **श्रीमुक्तिनिलयगिरितीर्थम्**

* लक्षैश्च कोटिमुनिभिश्च सहस्रकैश्च;
प्राप्ताश्च मुक्तिनिलयं बहवो मुनीशाः ।
थावच्चपुत्रप्रमुखा ननु यत्र शैले;
तस्माच्छ्रीमुक्तिनिलयाऽद्रिमहं नुवे तम् ।।१३।।

१४. **श्रीपुष्पदन्तगिरितीर्थम्**

* यत्रागतो जिनपति र्ननु पुष्पदन्तः,
उद्धारकौ गिरिवरस्य च पुष्पदन्तौ ।
यः पुष्पदन्तसमसंस्थितिमान् विभाति;
श्रीपुष्पदन्तगिरिवर्यमहं नुवे तम् ।।१४।।

१५. **श्रीमहापद्मगिरितीर्थम्**

* तीर्थं महोत्पलमिवात्र विभाति पृथ्वी-,
पद्मद्रहे शिवरमारमणाय मन्ये।
तस्मान्महादिपदसंयुतपद्मसंज्ञं;
तीर्थं समस्तजनतापहरं नुवे तम् ।।१५।।

१६. **श्रीपृथ्वीपीठगिरितीर्थम्**

* मुक्तिस्वयंवरसमागतसंयतानाम्,
पृथ्व्यामिदं भवति पीठमहोविशालम् ।
मुक्त्या वृतो निखिलसाधुगणस्तु चित्रम्;
पृथ्व्यादिपीठगिरिवर्यमहं नुवे तम् ।।१६।।

१७. **श्रीसुभद्रगिरितीर्थम्**

* मुद्रार्पणं भवति भद्रपदाय तेषां,
येषां हि तीर्थरजसा तनवस्तु दिग्धाः।
यस्मिंश्चतुर्गतिमयस्य भवस्य भद्रं;
तस्मात्सुभद्रगिरिवर्यमहं नुवे तम् ।।१७।।

## १८. श्रीकैलासगिरितीर्थम्

* यत्तीर्थवासकरणान्ननु शंकरत्वं,
दग्ध्वा स्मरं जनगणाः खलु प्राप्नुवन्ति ।
शत्रुञ्जयी वहति देवनदीव यत्र,
कैलासशैलममलं प्रकटं नुवे तम् ॥१८॥

## १९. श्रीकदम्बगिरितीर्थम्

* निर्वाण्यतीतजिनपट्टधरः कदम्बो,
मासोपवासकरणेन शिवङ्गतोऽत्र ।
तीर्थं च यद् गुणकदम्बकलाभकारी;
तस्मात् कदम्बगिरिवर्यमहं नुवे तम् ॥१९॥

## २०. श्रीउज्वलगिरितीर्थम्

* पातालमस्ति खलु पावनमस्य मूलात्,
शृङ्गाच्च तस्य गगनं खलु पावनञ्च ।
शुभ्रोज्ज्वलं च यशसा खलु तारकत्वात्;
शैलोज्ज्वलं निकृतपापरिपुं नुवे तम् ॥२०॥

## २१. श्रीसर्वकामदायकगिरितीर्थम्

* आमुष्मिकैहिकसुखं, सकलं लभन्ते,
यत्तीर्थभक्तिबलतो, मनुजाः सदैव,
**सूरीशविक्रम**शिशुः **यशसाऽजिताख्यः**;
श्रीसर्वकामदगिरिं प्रथितं नुवेऽहम् ॥२१॥

# श्री चारित्रसप्तविंशिका-४

-मुनिप्रवरश्री सम्यग्दर्शनविजयगणिवराः

## मांगल्यम्

(**शार्दूलविक्रीडितसमवृतम्**-ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ऽऽ। ऽऽ। ऽ)

* ऐन्द्रैश्चर्चितपार्श्वनाथजिनपो, ध्यातो विधत्ते श्रियम्,
मानं मोहरिपुं च काममसमं, सर्वापदं संहरेत्,
ऋद्धिं सर्वसुखावहां वितनुते, निःश्रेयसे स्थापयेत्,
स्यातां श्रीपरमेश्वरः मम सदा, पार्श्वः स हृत्पार्श्वगः ।।१।।

(**चित्रगतिसमवृत्तम्**-ऽ।। ऽ।। ऽ।। ऽ)

* दुर्गुणसञ्चयमुक्तिकरं, सद्गुणमौक्तिकशुक्तिसमं,
श्रीपदसाधकयुक्तिपरं, किं न ददाति सुखं चरणम्? ।।२।।

* शान्तसुधारसपुण्यसरम्, चन्दनसौरभभावभरम्,
साम्यगुणाद्रिवहज्झरणम्, स्यात् शमसौख्यकरं चरणम् ।।३।।

* दौःस्थ्यनिदाघशमाय मरुत्, ज्ञानरसाऽऽचमनाय [१]गरुत्;
भावविशालतया गगनं, तच्चरणं भवतात् शरणम् ।।४।।

१.-गरुत्-चञ्चूः

* दुर्मति-दुर्गति दौःस्थ्यहरम्, सन्मति-सद्गतिसौख्यकरम्;
नैकभवार्जितपापहरम्, स्याच्चरणं भवतापहरम् ॥५॥

* यद् भवसंसरणं हरते, साधुगणांश्च समुद्धरते,
**मोहविकारमपाकरते, तच्चरणं भवतात् शरणम्** ॥६॥

(**लयग्राहिसमवृत्तम्**-ऽऽ। ऽऽ। ऽऽ। ऽऽ)
* दारिद्र्य-दौर्भाग्य-दौःस्थ्यैकवारम्, संपत्ति-सौभाग्य-सत्ता-प्रसारम्,
चारित्रमेतत् क्षमाभावसारं, चारित्रमेवाऽस्ति श्रेयःसुखाय ॥७॥

* संसारपाथोधितीरं प्रव्रज्या, संतापनाशे समीरः प्रव्रज्या,
मोहारिभेदेऽस्ति वीरः प्रव्रज्या, मायामहीदारसीरं प्रव्रज्या ॥८॥

* मानुष्य-साफल्यकारा प्रव्रज्या, संपूर्णसाम्यावतारा प्रव्रज्या,
संतोषपीयूषधारा प्रव्रज्या, भव्यात्मवृन्दस्य दारा प्रव्रज्या ॥९॥

* चित्सिन्धुपाराय सेतुः प्रकृष्टः, सद्धर्मप्रासादकेतुः वरिष्ठः;
स्वात्मर्द्धिसंप्राप्तिहेतु र्गरिष्ठः, चारित्रमेतद् विधत्ते शमिष्टम् ॥१०॥

* योगेषु शुद्धिं विशुद्धिं च भावे, दुर्भावदोषै र्निवृत्तिं च सद्यः,
अध्यात्मभावे प्रसिद्धिं च दत्ते, चारित्रमेतन्न किं किं विधत्ते ॥११॥

(**मृगचपलासमवृत्तम्**-ऽ।। ऽऽ। ।।। ऽ)
* सच्चरणं श्री शिवकरणं, मुक्तिनवोढासुखवरणम्;
साम्यपयोमुक्सलिलकणं, श्रीचरणं स्तात् मम शरणम् ॥१२॥



* भव्यजनानन्दवितरणं, स्वात्ममनोनिर्वृतिकरणम्,
दुर्गतिकृत्कल्मष हरणं, श्रीचरणं स्तात् मम शरणम् ।।१३।।

* शीलसुगन्धं श्रुतनयनं, तत्त्वप्रसन्नीकृतश्रमणम्,
सिद्धिकनीप्रीतिरमणं, श्रीचरणं स्तात् मम शरणम् ।।१४।।

* भौतिकसौख्याऽरतिकरणं, संसृतिदुःखाम्बुधितरणम्,
सद्गुणनानातरुगहनं, श्री-चरणं स्तात् मम शरणम् ।।१५।।

* भावजिनाज्ञाव्रततिघनं, दानतपःशीलगुणधनम्,
पुण्यनिधानाऽर्जनप्रवणं, श्री-चरणं स्तात् मम शरणम् ।।१६।।



(**कनकसमवृत्तम्-** ऽऽऽ ।।ऽऽ ।।ऽ)

* मायाशल्यनिवृत्तिकरं, स्वाध्यायादिप्रवृत्तिकरम्,
आत्मानंदनवृत्तिकरं, स्यातां मे चरणं शरणम् ।।१७।।

* सम्यग्दर्शनशुद्धिकरं, सम्यग्ज्ञानप्रवृद्धिकरम्,
सम्यग्धर्मप्रसिद्धिकरं, स्यातां मे चरणं शरणम् ।।१८।।

* श्रेयः-शासननीतिविदं, संसाराटनभीतिभिदम्,
दीक्षोद्वाहनप्रीतिप्रदं, स्यातां मे चरणं शरणम् ।।१९।।

* दुर्धीदुर्गतिसङ्क्षयकृत्, अन्तःशत्रुपराजयकृत्,
नित्यं भव्यमहोदयकृत्, स्यातां मे चरणं शरणम् ।।२०।।

* संसारार्णवसेतुसमं, मोहद्विट्जयकेतुसमं,
श्रीधीसङ्गम-हेतुरलम्, स्याता मे चरणं शरणम् ।।२१।।

(**कुसुमविचित्रासमवृत्तम्**-।।। ।SS ।।। ।SS)

* परिणतितारातति‍शशि-साम्यं, शमकमलावल्लभहरिप्रायम्,
सुकृतनिकेतं, विधिशुचिकायं, वरचरणं तत्, मम शरणं स्यात् ।।२२।।

* दुरिततमोजित् विनयवचोभृत्, स्मररिपुनाशेऽमरसरिताभृत्[२],
भवममताभित्, गुरुकरुणाभृत्, वरचरणं तत्, मम शरणं स्यात् ।।२३

* शिवपथयाने प्रवररथाभं, गतपरिवादं विगतप्रमादम्,
जगगुरुरर्हत्-परमप्रसादं, वरचरणं तत् मम शरणं स्यात् ।।२४।।

* प्रशमसुधाभुक्[३]-ललननिवासं, मुनिगणयोधा-कवचसकाशं,
विरतिवधू-भूषणशुचिभासं, वरचरणं तत् मम शरणं स्यात् ।।२५।।

* विषय[४]गदौघेऽ[५]गदप्रतिरुपं, प्रवचनप्रोक्तं गुणगणभूपम्,
परमपथे शम्बलमनुरुपं, वरचरणं तत्, मम शरणं स्यात् ।।२६।।

* (**शिखरीणिसमवृत्तम्**- ।SS SSS ।।। ।।S S।।।S)
विधत्ते वैराग्यं, भव भवसुखे-वारिविमलं,
तथा **सम्यक् श्रेयः**, परमसमतासौख्यममलम्,
करोत्येषा शुद्धिं, प्ररमसुखदे **दर्शन**गुणे,
परिव्रज्या किं किं, नहि वितनुतेऽध्यात्मजसुखम् ।।२७।।

---

१. कमलावल्लभः- लक्ष्मीपतिः, २. अमरसरिताभृत्-शङकरः ३. सुधाभुक्-देवः, ४. गदौघः-रुग्वृन्दः ५. अगदः - वैद्यः

# श्रीवासुपूज्यस्तुत्यष्टकम्

-पू.मुनिप्रवरश्रीप्रशमरक्षितविजयाः

(छन्द : शार्दूलविक्रीडितम्)

* देवर्द्धिं परिभुज्य देवविषयां, पञ्चाक्षशर्मावहां,
स्वर्गात् प्रच्युतमत्र मानवभवे, क्षेत्रे जनैः सङ्कुले ।
मातङ्गादिचतुर्दशोत्तमतमैः, स्वप्नै वरैः सूचितं;
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ॥१॥

* नक्षत्रग्रहलग्नवासरवरे, यज्जन्म जातं महद्,
नाकाधीश्वरवृन्दकैः सुरगिरौ, भक्त्या चतुषष्टिकैः ।
तीर्थानीतजलैः सुरासुरयुतैः, कुम्भै वरैः स्नापितं,
श्रीचम्पाभिधतीर्थराजमनिशं श्रीवासुपूज्यं नुमः ॥२॥

* बाल्यस्थे जनने सुरेश्वरनतं, ज्ञानत्रयैः शोभितं,
नानाचित्रविचित्रकेलिभवनं, भूनाथजैः क्रीडितम् ।
हस्ताद् हस्तगतं सुधीरमनसं, सर्वाङ्गसल्लक्षणं;
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ॥३॥

* त्रैलोक्यासुमतां समाहृतमना-रूपाद्यनन्यश्रिया,
सौख्यं भोगविपाककर्मजनितं, वैराग्यतो भुक्तवान् ।
छाया यस्य विकारतापहरणी, कामाग्निसन्तापिनां;
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ॥४॥

* राज्यं प्राज्यसुखं विलाससदनं, सप्ताङ्गसैन्यान्वितं,

छत्रानन्यमयं विपक्षविकलं, शस्यप्रभुत्वालयम् ।
मत्वा पापभृतं च दुर्गतिपथं, यस्त्यक्तवान्ः प्रभुः;
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ।।५।।

* गर्भस्थेऽपि विरागभावसहितो, लोकान्तिकैः संस्तुतो,
दत्त्वा वार्षिकदानमिच्छितप्रदं, गत्वा वने सुन्दरे ।
त्यक्त्वा मौक्तिकरत्नभूषणगणं, दीक्षा गृहीता स्वयं,
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ।।६।।

* प्रव्रज्यासमये प्रकाशितमनः, पर्यायचित्शोभितं,
तप्तं तीव्रतपो धृतं शुभमनश्चीर्णं चरित्रं शुभम् ।
ध्यानाग्निज्वलितोग्रकर्मनिकरात्, कैवल्यमासादितं,
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ।।७।।

* भव्याब्जं प्रतिबोधयन् रविसमः, सद्धर्मतेजोव्रजै-
रार्हन्त्यं शुभकर्म यो क्षपयते, सद्देशनादानतः ।
कोट्यैकाधिकसङ्ख्यया सुमनसां, यो राजतेऽहर्निशम्;
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ।।८।।

* संरुद्धाऽङ्गवचोमनोऽखिलक्रियः, संनिष्ठितार्थव्रजः,
शैलेशीमनुगत्य प्रान्तसमये, ह्रस्वाक्षरैः पञ्चभिः ।
निर्वाणं गतवान्सदा सुखमयं, यस्तीर्थराजेश्वरः;
श्रीचम्पाभिधतीर्थराजमनिशं, श्रीवासुपूज्यं नुमः ।।९।।

# श्रेयस्करी जिनस्तुतिचतुर्विंशी

**-साध्वीवर्याश्री प्रशमनिधिश्रियः**

## (१) श्री आदिजिनस्तुतिः

(राग-स्नातस्या...)

(एकोनविंशत्यक्षरीयाऽतिधृतिजातौ **'शार्दुलविक्रीडितं'** नाम समवृत्तम्)

**वर्णन्यास** :- ऽऽऽ[१] । ।ऽ ।ऽ। ।।ऽ ऽऽ। ऽऽ। ऽ

श्लोक :- **ऐन्द्रश्रीसखीसङ्गमाय प्रहिता, मुक्तौ त्वयाम्बा निजा,**
**पूर्वं नाथ! ततोऽगमच्छिववधू-क्रीडासमुत्को भवान् ।**
**वव्रे नैकजनं विहाय प्रथमं, त्वां तीर्थकृत्संपदा;**
**श्रेयःश्रीप्रिय! नः कुरुष्व कुशलं, नाभेय! सम्यक् सदा।।१।।**

**अन्वयः** :- हे नाथ! त्वया पूर्वं ऐन्द्रश्रीसखीसङ्गमाय अम्बा मुक्तौ प्रहिता ततः शिववधूक्रीडासमुत्कः भवानगमत्।
हे श्रेयःश्रीप्रिय ! तथा नैकजनं विहाय त्वां तीर्थकृत्संपदा प्रथमं वव्रे।
नाभेय ! नः सदा सम्यक्कुशलं कुरुष्व ।

अथ **तत्वप्रभ**नामविवरणं प्रारभ्यते- इह हि दशदृष्टान्तदुर्लभं नरभवं प्राप्य, तत्साफल्यलिप्सुना विदुषा मन्दमतिना वा सत्त्वेन, वीतराग-सर्वज्ञ-परमोपास्य-श्रीमत्तीर्थकृतां भक्तिरेव त्रिकरणतः अनन्य-मनस्कतया अन्यकार्याव्याक्षिप्तचित्ततया कर्त्तव्यैव यतः परमात्म-भक्तिरेव मुक्तिसुख-लिप्सुनां परमोत्कृष्टहेतु र्व्यावर्णिता परमर्षिभिः।

१-(ऽ)- अे गुरु अक्षरनी निशानी छे। (।)- आ लघु अक्षरनी निशानी छे ।

किञ्च न्यायाम्भोनिधि-न्यायविशारद-महोपाध्याय-वाचकपुङ्गवा यशोविजयभगवन्तोऽपि जिनमहत्त्वद्वात्रिंशिकायां प्रोचुरेवं।

**''सारमेतन्मया लब्धं, श्रुताब्धेरवगाहनात्।**
**भक्तिर्भागवती बीजं, परमानन्दसंपदाम् ।।''**

तेषां वाचं परमश्रद्धया श्रद्धधानेन मया,

मन्मातुलमुनि-**तत्त्वप्रभ**विजयस्य संयमस्वीकारस्य चतुर्विंशतिवर्ष-पूर्णाहुति-प्रसङ्गं, भगवतीसूत्रानुज्ञास्वरुपगणिपदप्रदानावसरं च प्राप्य सन्दृब्धा नामत: **''श्रेयस्करीजिन-स्तुतिचतुर्विंशीयं।''** परमो-पकारी-मधुरभाषी **श्रीजिनप्रभसूरी**श्वराणां, परमश्रद्धेय निष्कारण-वत्सल-श्री**श्रेयांसप्रभसूरी**श्वराणाञ्च भूयांस: परमोपकारान्स्मृत्वा ताभ्यामेवेयं स्तुतिचतुर्विंशीसमर्पणाय तयो: पुण्यनामधेयमाश्रित्यैव एतद्ग्रन्थाभिधानस्य ''**श्रेयस्करीजिन**'' इति विशेषणं कृतम्। अधुना तु तस्योपरि ''**तत्त्वप्रभ**''-नाम विवरणं क्रियते। तन्मयि कृपां कृत्वा विद्वद्भि: संशोध्यम् इति।

**विवरणं :-** **ऐन्द्रश्रीसखीसङ्गमाय**...। हे **नाथ**! स्वामिन् ! **त्वया** अम्बा-माता-जननी। कीदृशी? **निजा**-स्वकीया **प्रहिता**-प्रेषिता । कस्यां? मुक्तौ-निर्वृतौ-सिद्धौ। कदा? **पूर्वं**-प्राक् । किमर्थं? **ऐन्द्रश्रीसखीसङ्गमाय** - ऐन्द्र-आत्मा, तस्य संबन्धिनी श्री:-ऐन्द्रश्री: एव सखी तस्या सङ्गमाय-मीलनाय। **तत:**-तत्पश्चात्। **भवान्**-त्वं। **अगमत्**-अगच्छत्। कीदृक् भवान्? **शिववधू-क्रीडासमुत्क:**-शिवो मोक्ष: स एव वधूस्तया सह क्रीडायै रमणार्थं समुत्क: य: स।(लोकेऽपि माता स्वपुत्रार्थं वधूयोग्यतापरीक्षायै प्रथमं स्वयं कन्यां पश्यति पश्चाद् विवाहनिर्णयं करोति) **नाभेय**! नाभिनृपसुत!। **त्वां**-भवन्तं **वव्रे**-अवृणोत्। का? **तीर्थकृत्संपदा**-

तीर्थं करोतीति तीर्थकृत् तस्य संपदा श्रीः लक्ष्मीः या साऽपि। किं कृत्वा? **विहाय**-परिहृत्य। कं? **नैकजनं**-बहुजनं। **श्रेयःश्रीप्रिय!** श्रेयः कल्याणं एव श्रीः- लक्ष्मीः तस्याः प्रियः-वल्लभः तत्संबोधने। **नः**-अस्माकं-**कुरुष्व**-कुरु। किं? **कुशलं**-शुभं। कदा? **सदा**-नित्यं। कीदृग्? **सम्यक्**-प्रशस्यं। कुशलं **द्विधा** भवति कुशलानुबन्धी अकुशलानुबन्धी च तत्र अकुशलानुबन्धी, अशुभ-अशुभतरकर्मो-पार्जकत्वात् दुर्गतिसन्तान-वर्धकं भवति तेन प्रेक्षावतामनभीष्टम्। कुशलानुबन्धी च शुभ-शुभतरकर्मोपार्जकत्वात् मुक्तिपाथेयं भवति- ततः कुशलपदस्य 'सम्यक्' इति विशेषणं कृतम्।।

**वृत्तवैशिष्ट्यम् :-** अत्र उत्प्रेक्षालङ्कारः तल्लक्षणं काव्यादर्शे इत्थं

**अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा।**
**अन्यथोत्प्रेक्ष्यते यत्र, तामुत्प्रेक्षां विदुर्यथा ।।**

एतदेकोनविंशत्यक्षरीयाऽतिधृतिजातौ ''शार्दूलविक्रीडितम्'' नाम समवृत्तं तल्लक्षणं तु सिद्धहैम छन्दोऽनुशासने द्वितीयेऽध्याये ३२१ तमे सूत्रे इत्थं-**'अतिधृत्या म्सौ तौ गः शार्दूलविक्रीडितं ठै'** रिति। ठैरिति द्वादशाक्षरैः पश्चात् यतिः = विरामः कार्यः । अत्र श्लोके प्रथमपादे ''ऐन्द्रश्री'' इत्यत्र र-संयोगात्पूर्वस्य ''द्र'' गुरु ज्ञेयः। उच्चारे तीव्रप्रयत्नत्वात् । पुनस्तत्रैव-प्रथमपादे ''सङ्गमाय प्रहिता'' इत्यत्र र-संयोगात् पूर्वस्थः ''य'' ह्रस्वो ज्ञेयः। तस्य अतीव्रप्रयत्नमत्त्वात्। एवं प्रतिश्लोकं यथावृत्तलक्षणं गुरु-लघुत्वं ग्राह्यं-ज्ञेयं। किन्तु वृत्तभङ्गदोषो न ज्ञेयः। यस्मात् प्राचीनैरपि एवं समाचीर्णं। यथाहुः :- कलिकालसर्वज्ञाः श्रीमद्हेमचन्द्रसूरयः। सिद्धहैमछन्दोऽनुशासने प्रथमसंज्ञाऽध्याये सप्तमसूत्रे तथाहि :-

**सूत्र :- )( क)( प-विसर्ग-अनुस्वार-व्यञ्जनाऽह्लादिसंयोगे ।।७।।**

**टीका :** जिह्वामूलीये, उपध्मानीये, विसर्जनीये, अनुस्वारे, व्यञ्जने

ह्रादिवर्जिते संयोगे च परे ह्रस्वोऽपि गो भवति वक्रश्च। 'अह्रादि' इति समस्त-व्यस्तसङ्ग्रहात् ह्रसंयोगे। ह-संयोगे र-संयोगे च न गुरुः। आदिशब्दाद्यथादर्शनम् ह्रादिसंयोगे च यथा:

**''स्पृष्टं त्वयेत्यपह्नियः खलु-कीर्त्तयन्ति''**।। ७.१ तथा-

**'तव ह्रियापह्नियो मम ह्रीरभूत्,**

**शशिग्रहेऽपि द्रुतं न धृता ततः।**

**बहलभ्रामरमेचकतामसं,**

**मम प्रिये! क्व समेस्यति तत् पुनः ।। ७.२**

**तथा ''धनं प्रदानेन श्रुतेन कर्णौ''।।७.३।। इत्यादि तथा**

**'लीलासिताब्जमुतदर्पणमातपत्रं,**

**किं दन्तपत्रमथ किंशुकमौलिरत्नम् ।**

**किं चामरं तिलकबिन्दुरथेन्दुबिम्ब -**

**मेतद्दिवो निह्नुतदीप्ति मुदे न कस्य' ।।७.४।।**

**एषु अतीव्रप्रयत्नत्वं संयोगस्य गुरुत्वाभावे हेतुः।**

**तीव्रप्रयत्ने तु भवत्येव गुरु र्यथा :-**

**''बर्हभारेषु केशान्''। ''किं दन्तपत्रमथ'' । इत्यादि ।**

## (२) श्री अजितजिनस्तुतिः

(राग-तुम दिलकी धडकनमें/रघुपति राघव...)

दशाक्षरीय-पङ्क्तिजातौ **'मृगचपला'** नाम समवृत्तम् ।

**वर्णन्यास :-** ऽ।। ऽऽ । ।।। ऽ

**श्लोक :- श्रीविजयानन्दन! कुरुतात्, तात्त्विकवृत्तिं मम हृदये ।**

**वारय चाऽरं भवभयदां, दारुणमिथ्यामतिमहितां ।।२।।**



**अन्वयः :-** श्रीविजयानन्दन! मम हृदये तात्त्विकवृत्तिं कुरुतात् च अहितां भवभयदां दारुणमिथ्यामतिं अरं वारय ।

**विवरणं :-** **श्रीविजयानन्दन...**। हे **श्रीविजयानन्दन**-विजयापट्टराज्ञीसुत! त्वं **मम**-मे, **हृदये**-मानसे, **तात्त्विकवृत्तिं** - त्वमेव 'सुदेवः' इति सम्यग् श्रद्धारुपेण तात्त्विक-पारमार्थिकभावेन निवासं-स्थितिं । **कुरुतात्**-कुरु। **चः**-समुच्चयार्थे। **अरं**-द्रुतं, **वारय**-निवारय-दूरीकुरु। कां? **दारुणमिथ्यामतिं** दारुणा-भयङ्करा एव मिथ्या-विपर्यासरुपा-मतिः-बुद्धिः या सा तां। कीदृशीं? **अहितां**-अहितकारिणीं। पुनः कीदृशीं? **भवभयदां**-भवस्य-संसारस्य, भयः-भीः तां ददातीत्येवंशीला या सा तां।।२।।



**वृत्तवैशिष्ट्यम् :-**अत्र तृतीयपादे छेकानुप्रासशब्दालङ्कारः यतः गेयछन्दसि शब्दालङ्कारस्य महत्त्वम्। सन्दृष्टाद्व-यमकालङ्कारश्च। यमकालङ्का-रस्य लक्षणं चेत्थं - **'आवृत्तिं वर्णसङ्घातगोचरां यमकं विदुः'**। इति काव्यादर्शग्रन्थे आचार्यदण्डिना प्रोक्तं सन्दृष्ट-यमकलक्षणं तु तत्रैवेत्थं **'सन्दृष्टयमकस्थानमन्तादी-पादयोः द्वयोः'**। इदं दशाक्षरीयपङ्क्तिजातौ **''मृगचपला''** नाम-समवृत्तम्। तल्लक्षणं च सिद्धहैमछन्दोऽशासने द्वितीयेऽध्याये १२२ तमे सूत्रे इत्थं ''भत्नगा मृगचपला'' इति।।

## (३) श्री संभवजिनस्तुतिः

**(राग-तुम दिलकी धडकनमें / रघुपति राघव राजा राम...)**

(दशाक्षरीयपङ्क्तिजातौ **'चित्रगति'** नामसमवृत्तम् ।)

**वर्णन्यास :-** ऽ।।ऽ।।ऽ।।ऽ

**श्लोक :- संभव! सं भवभित्तनुतात्, कर्मतनूं च तनूकुरु मे।**

**हृत्कमलं विमलं तपनी-भूय विकाशय देव सदा।।३।।**

**अन्वय** :-हे भवभित् संभव! मे सं तनुतात्, कर्मतनुं च तनूकुरु, देव! विमलं हृत्कमलं च तपनीभूय सदा विकाशय ।

**विवरणं :-** **संभव**...। हे **संभव**! तृतीयतीर्थङ्कर! । **भवभित्** - भवं भिनत्ति इति भवभित् तत्संबोधने । त्वं **मे** = मम मह्यम् वा, **सं**-ज्ञानं, **तनुतात्**-विस्तृणोतु । **चः** समुच्चयार्थं । मम-**कर्मतनूं**-कार्मणशरीरं । **तनूकुरु** प्रागतनूं तनूं इव कुरु-तनूकुरु-क्षीणं,- निर्बलं कुरु। हे **देव** त्वं **विकाशय**-विबोधय । कं? **हृत्कमलं** हृदयं एव कमलं तं हृत्कमलं । कीदृशं? **विमलं** निर्मलं। किं कृत्वा? **तपनीभूय**-सूर्यः भूत्वा प्रागतपनः तपन इव भूत्वा तपनीभूय ।।३।।

**वृत्तवैशिष्टयम्**:-अत्र प्रथमपादे आदि-अव्यवहितालङ्कारः । द्वितीय-तृतीयपाद-योश्च व्यवहिताऽव्यवहितमध्यमालङ्कारः।

''हृत्कमलं'' इति पदे च समस्तरुपकालङ्कारः ।

एतद् - दशाक्षरीयपङ्क्तिजातौ **'चित्रगति'** नाम समवृत्तम्।

तल्लक्षणं च सिद्धहैमछन्दोऽनुशासने द्वितीयेऽध्याये ११७ तमे सूत्रे ''भिगौं चित्रगतिः'' इति।

## (४) श्री अभिनन्दनजिनस्तुतिः

**(राग-जीना यहां मरना यहां / भक्तामरप्रणतमौलि...)**

(एकादशाक्षरीय-त्रिष्टूब्जातौ **'लयग्राहि'** नामसमवृत्तम् ।)

**वर्णन्यास :-** ऽऽ। ऽऽ। ऽऽ। ऽऽ

**श्लोक :-** **मन्ये स्वचापल्यदोषेण खिन्नो ।**

**यत्पादकोणं कपिः प्राप्य लीनः ।**

**पल्लाञ्छनव्याजतो स्थैर्यमाप्तुं;**

**मां देहि शं सांवरं सांवरः स ।।४।।**

**अन्वयः :-** स्वचापल्यदोषेण खिन्नः कपिः स्थैर्यमाप्तुम् पल्लाञ्छनव्याजतो यत्पादकोणं प्राप्य लीनः इत्यहं मन्ये । स सांवरः मां सांवरं शं देहि ।

**विवरणं :-** **मन्ये**...। **स-सांवरः**-संवरात्मजः-अभिनन्दनजिनः **शं**-सुखं **देहि**-विस्तृणोतु । कीदृशं शं? **सांवरं**-संवरजन्यं-कर्मनिरोधजं। कं? **मां**-मह्यम्। स कः? **यत्पादकोणं** प्राप्य कपिः लीनः (स)।यस्य पादकोणं-यत्पादकोणं-जङ्घास्थानं, **प्राप्य**-लब्ध्वा, **कपिः**-वानरः **लीनः**-आश्रितः। कपिः कीदृशः? **खिन्नः** उद्विग्नः। केन? **स्वचापल्यदोषेण** - स्वकीयचञ्चलता-दुर्गुणेन । किं **कर्तुं**? **आप्तुं**-प्राप्तुं। किं आप्तुं? **स्थैर्यं**-स्थिरतां। **कुतः**? कथं? **पल्लाञ्छनव्याजतः**- चरणलक्ष्ममिषेण। इत्यहं **मन्ये** इत्युत्प्रेक्षे। (अन्योऽपि जनः स्थैर्यप्राप्त्यै रहसि स्थित्वा ध्यानं करोति ततो घटत एव कपेरपि प्रभुचरणगुहानिवसनं) -यतः पौद्गलिकसुखं सुखाभासं परमार्थेण तु दुःखमेव ततः सांवरं-कर्मक्षयोपशमजं अध्यात्मसुखं प्रेप्सितं विद्वत्प्रेक्षावतां सम्यग्दृशाम्।

**वृत्तवैशिष्ट्यम् :-** अत्र प्रथम-द्वितीयपादयो अन्त्यानुप्रासशब्दालङ्कारः अंतिम-पादेऽव्यपेत-चरमयमकालङ्कारः उत्प्रेक्षालङ्कारश्च। एतदेकादशा-क्षरीय-त्रिष्टूब्जातौ **'लयग्राहि'** नाम समवृत्तं तल्लक्षणं सिद्धहैमछन्दो-ऽनुशासने द्वितीयेऽध्याये १२९ तमे सूत्रे इत्थं 'तिर्गौ लयग्राही' इति।

## (५) श्री सुमतिजिनस्तुतिः

**(राग-हृदयने अशांतिमां...)**

(एकादशाक्षरीय-त्रिष्टूब्जातौ **'श्री'**नामक समवृत्तम् ।)

**वर्णन्यास :-** ऽ।। ऽऽ। ।।। ऽऽ - पञ्चाक्षरेभ्यः यतिः विरामः ।

**श्लोकः :-** **सद्गतिगन्त्रीं, कुगतिनिहन्त्रीं ।**

**निर्वृतिनेत्रीं कुमतिविजेत्रीम्,**

**त्वं सुमते! माऽऽशु मतिमदीश ! ।**

**यच्छ वरिष्ठां सुमतिमधीश !।।५।।**

**अन्वयः :-** हे अधीश! मतिमदीश! सुमते! त्वं सद्गतिगन्त्रीं, कुगतिनिहन्त्रीं निर्वृतिनेत्रीं कुमतिविजेत्रीं वरिष्ठां सुमतिं मा आशु यच्छ।

**विवरणं :-** **सद्गतिगन्त्रीं**....। हे **अधीश**-नायक !

**मतिमदीश**-मतिमतां-विमलमतीनां नाथ! **सुमते**-सुमतिनाथ! **त्वं**-भवान्, **मा**-मां. **सुमतिं**-सन्मतिं-सम्यग्दर्शनेन पवित्रां-मतिं। **आशु**-सद्यः, **यच्छ**-देही-**वितर**। कीदृशीं सुमतिं। **सद्गतिगन्त्रीं**-शुभगतिप्रापणाय यानसमानां। पुनः कीदृशीं? कुगतिनिहन्त्रीं-दुर्गतिमार्गावरोधनी। पुनः कीदृशीं? **निर्वृतिनेत्रीं**-मुक्तिपुरप्रापणीं। पुनःकीदृशीं? **कुमतिविजेत्रीं**-दुष्टमतिजयिनीं-दुर्मतिदूरीकरणे क्षमां-समर्थां। पुनः कीदृशीं? **वरिष्ठां** - प्रचुरां (यतो येन सम्यग्दर्शनपूता सन्मति प्राप्ता तेन कुगते र्द्वारं पिहितं सद्गतिगमनं निर्णीतं, कुविकल्पाः दूरे विकीर्णा-प्रक्षिप्ताः, मुक्तिश्च क्रोडीकृता, यदाहुः परमर्षयः- **'सम्मत्तंमि उ लद्धे विमाणवज्जं न बंधए आउं।'** इति सन्मते र्गुणाः परिभाव्य सुमतिदानाय प्रार्थितः प्रभुः।

**वृत्तवैशिष्ट्यम्:-** अत्र-अन्त्यानुप्रास-तृतीयपादगत-मध्ययमकालङ्कारश्च। एतदेकादशाक्षरीयत्रिष्टूब्जातौ **'श्री'-नामकं** समवृत्तम्। तल्लक्षणं च सिद्धहैमछन्दोनुशासनस्य द्वितीयेऽध्याये '१३२' तमे सूत्रे इत्थं-''भत्ना गौ श्रीर्डै'' इति। डैरिति पञ्चभिर्यतिः।

# श्रीमदृषभदेवस्तवः

**डॉ. राम किशोर मिश्रा**
२९४/१४ पट्टीरामपुरम्, खेकड़ा (बागपत) उ.प्र.

* वन्दे जिनं जैनसमाजपूज्यम्,
तीर्थङ्करेषु ऋषभं जिनधर्मदूतम् ।
यं ***जैनधर्मजनकं** मनसा स्मरामि;
तं जैनदेवमृषभं हृदये भजामि ।।१।।

* श्वेताम्बरः प्रथम आदिगृहस्थभोगी,
पश्चादयं स्वतपसाऽत्र दिगम्बरोऽभूत् ।
यं जैनदेवमधुना मनसा स्मरामि;
तं ***जैनधर्मजनकम्** ऋषभं नमामि ।।२।।

* ***प्राध्यापका यमवदन् हि कुशाग्रबुद्धिम्,**
***विद्यार्थिजीवनदिनेषु च सर्वमुख्यम् ।**
यः साधनासमयकष्टसहस्रभोगी;
तस्मै नमो भगवते ऋषभाय लोके ।।३।।

* भाषोपदेशकवराय समत्वदाय,
साधारणादिजनशर्मसमीक्षकाय ।
***विप्रादिशूद्रजनतासमताप्रदाय;**
तस्मै नमो भगवते ऋषभाय लोके ।।४।।

* सत्यं त्वसङ्ग्रहमहिंसकतां च विश्वे,

*** लेखकस्याऽभिप्रेतमिदम् ।

कल्याणहेतव इतीदमुपादिशद् यः ।
यश्चाऽब्रवीदिह सदाचरणं विधातुम्;
तं जैनधर्मजनकम् ऋषभं नमामि ।।५।।

* यः स्वीचकार जडचेतनमूलरुपम्,
तस्मिन् कदाचन न यो विकृतिं चकार ।
यं सत्यवादिनमहं हृदये भजामि;
तं जैनदेवमृषभं मनसा नमामि ।।६।।

* **रामकिशोरमिश्रेण** शूकरक्षेत्रवासिना ।
कृतो जनाऽवबोधार्थम् ऋषभदेवस्य स्तवः ।।

## विवेकदृष्टिः

* नयनदृष्ट्या साकं हि, विवेकदृष्टिः स्यादिह ।
नेत्रदृष्टिर्महती न, विवेकदृष्ट्यपेक्षया ।।१।।

* सदसज्ज्ञान-विवेकं, प्राप्तो जनः सदा सुखी ।
तेन हीनोऽत्र मनुष्यो, दुःखं प्राप्नोति सर्वथा ।।२।।

* विवेकी जनः सर्वत्र, प्राप्नोति सम्मानं सदा ।
अविवेकिनोऽशुभाऽन्तो, भवत्येतन्मतं सताम् ।।३।।

* एको धर्मप्रचारार्थं, याति स्म क्वापि सज्जनः ।
मार्गे सोऽपश्यत्पश्यन्तं, युवतिं युवानं नरम् ।।४।।

* स उवाच तं युवानं, पापं युवतिदर्शनम् ।
युवा स नतशीर्षोऽभूत्तत्सज्जनचरणयोः ।।५।।

* स महात्मा प्रोक्तो यूना, विनम्रेण च सादरम् ।
भगवन् ! स्वाऽऽशीर्वादेन, विवेकदृष्टिं देहि मे ।।६।।

* संयमो धर्ममार्गोऽस्ति, ह्युपदिष्टो महात्मना ।
परनारी न दृष्टव्या, पत्नीं त्यक्त्वा कदाचन ।।७।।

* सत्कार्यं सदा कर्तव्यम्, असत्कार्यं कदापि न ।
अयं मार्गो विवेकस्य, तत्र तव दृष्टिर्भवेत् ।।८।।

* एषैव विवेकदृष्टिः शूकरक्षेत्रवासिना ।

# प्रार्थना

**(प्रातःकालीना)**

**-शान्तप्रकाशः सत्यदासः**

* सत्येश! भगवत्यहिंसे!,
भूयास्म धर्मरता वयम् ।
*सत्यारपटमुद्घटेद्धुना
दर्शनं भवतोर्भवेत् ॥१॥

* करवाणि कृत्यं भवन्तौ,
प्रत्यक्षमिव पश्यन्नहम् ।
किञ्चिन्न पापं येन स्या-
न्मनसा भवेच्छरणागतिः ॥२॥

* जगती भवद्रङ्गस्थलीव,
भवेयमभिनेता त्वहम् ।
निर्देशवृन्दं पालयन्,
स्यामत्र कर्त्तव्योद्भटः ॥३॥

* कर्त्तव्यमार्गापदि भवन्नाम,
स्मरेयं सर्वदा ।
कार्याणि कुशलतया प्रकुर्वन्
मा पलायै खेलनात् ॥४॥

* सर्वस्वमवगच्छानि भवदीयं,
प्रभुत्वमदोऽस्तु मा ।
भवदीयमेवाऽस्ति चेत्सर्वम्,
मनसि चिन्ता का तदा? ॥५॥

* ?



* यौ हानिलाभौ स्तां भवेताम्,
तौ भवद्भ्यामर्पितौ ।
यस्मिंस्तु कार्ये मद्धितम्
तत्सर्वहितकार्यपि भवेत् ॥६॥

**प्रार्थना (सायङ्कालीना)**

* सत्येश! भगवत्यहिंसे!,
नो वितरतां चाऽनलसताम् ।
विश्रान्तिमचिराद् यया,
नूतनशक्तिसृष्टि: सम्भवेत् ॥१॥

* विश्रान्त्यवस्थायामपि स्या-
न्मे मनो भगवन्मयम्
सत्यारपटमावृतं किन्तु,
निवसेतां हृद्धाम्नि मे ॥२॥

* हृद्धाम्नि भवतो: स्थितिश्चेत् ।
काचिदपि चिन्ता नो भवेत्
दु:स्वप्नदर्शनमस्तु मा,
निद्रां तथाऽनुभवान्यहम् ॥३॥

* दिनमस्मदीयं स्वर्गव-
च्चैषा निशा वैकुण्ठवत्;
वैकुण्ठतोऽवरतणमिवा-
स्माकं सदा प्रातर्भवेत् ॥४॥

* दिवसे कृता या: [१]कृती-
स्तासां चिन्तयाम हिताहितम्;
निर्णीय सत्यं निर्मलम्,
करवाम तस्य सुपालनम् ॥५॥

* एषाऽद्य निपतति यवनिका,
सम्प्रति समाप्नोत्वभिनय:;
श्व: पुनस्तस्योपक्रमे,
प्राप्तो भवतु भवतोर्वर: ॥६॥

१ * कृतय:' इति स्यात् 'कृती: तु द्वितीया बहुवचनान्तम्



# गुजराती स्तवनः
## प्रथम जिनेश्वर प्रणमीये...

(संस्कृत-भावानुवादः)

**-भावानुवादकारः विद्वान्-पूज्यापाद**
**मुनिप्रवरश्रीधुरंधरविजयाः**



* प्रणमत प्रथमजिनेश्वरं, देहे सुरभिवति ।
कल्पतराविव यस्य, शचीनयनद्वयं भृङ्ग इवापतति ॥१॥

* अमृतरसमास्वादिनं, रोगोरगजातः।
नोपद्रवते त्वां हत इव, सुधया खलु दुरे सञ्जातः ॥२॥

* कायाऽधौतशुचिस्तव, काञ्चनकान्तिकलाः।
स्वेदेनोज्झित! तारयसे तान् ये सदा, ध्याने तेऽविचलाः ॥३॥

* तव मनसो रागो गतः, तस्मिन् किं नव्यं ।
गतरागं रुधिरामिषमप्ययि! देव! ते, क्षीरसमं भव्यं ॥४॥

* श्वासः कमलसुगन्धवान्, तव लोकोत्तरितं।
दृश्यौ नैवाहारनीहारौ मानवै-र्दिव्यमहोचरितं ॥५॥

* चतुरोऽतिशयाः मूलतः, सौरा निधिविधवः ।
कर्मक्षयतो रुद्रमिताः युग-भुविमितः, सर्वेऽतिशयाः वः ॥६॥

*   जिन**पोत्तम**गुणगानतः, सगुणं निजमङ्गम् ।
**पद्म**पदार्पय देव! **धुरन्धर**!, ते पदमक्षयमविभङ्गम्   ॥७॥

## सुणो! चंदाजी!

(संस्कृत-भावानुवादः)

*   श्रृणु शशधरजी! सीमन्धरपरमेश्वरपार्श्वे गम्यताम्
रजनीश्वरजी! तस्मै मम विज्ञप्तिं प्रीत्या कथ्यताम्
यस्त्रिभुवननायकतां दधति,
यस्याग्रे धावति शक्रततिः;
यः क्षायिकदर्शनज्ञानपतिः ।   ...१

* यः काञ्चनकान्तिकलितकायः,
वृषभाङ्कितपादो निरपायः;
पुण्डरिकिणी महानगरीनायः ।   ...२

*   द्वादशपर्षत्सु यो वसति,
चतुरनलातिशयैरुल्लसति;
वाणी व्रत-तत्त्वगुणैर्लसति।   ...३

* भविलोकान् यः प्रतिबोधयति,
यत्समता शीतलता जयति;
भव्या यं वीक्ष्य विमुह्यन्ति।   ...४

*   तव सेवायामहमुत्सुकितः,
अपि दूरे भरते संवसितः;
हत-मोह-राज-कर-सम्पतितः ।   ...५

* त्वं देवो मनसि मया धरितः,
आज्ञाखड्गस्तव करवरितः;
तेनायं किञ्चिद् दरदरितः। ...६

* मम पूरय जिन**पोत्तम**! वीर्यं,
हृदि **पद्मे** येन लभे शौर्यं,
वर्द्धेत यथा तेजो वर्यं । ...७

* प्रेमामृतरामरमां वरता
भव्याङ्गिजने **भद्रङ्**करता
धार्योऽहं धर्म**धुरन्धरता** ...८

## श्री सामान्यजिनस्तवनम्

(बन्धन बन्धन झंखे...)

* जिनचन्द्रवदन! शिवशर्मसदन! भगवन्नायातस्तव निकटे...
भ्रान्तं मां पालय पालय रे, संसारेऽसमसङ्कटविकटे...
* तव दर्शनमद्य सुधामधुरं, कृतसुकृतशतेन विभो! जातं,
भ्रान्त्या श्रान्त्या मथितं श्लथितं, स्वस्थं मम चेतः सञ्जातं;
अयि! नाथ! मया रमितं मन्ये, पीयूषपूर्णकासारतटे... १
* ग्रसितुं मां विषमयफूत्कारैः, स्फुटितानन-लोल-लुलद्रसनाः,
धावन्ति कषायादिकसर्पाः, क्षिप सदयद्रष्टिपाताः रसनाः;
सत्वरमुद्धर मां करुणाकर!, पतितं निम्ने भवनाम्न्यवटे...२
* नीरन्ध्रैः रुद्धद्रष्टिप्रसरा-नन्तैः, शाखैरतिविस्तीर्णैः,
भ्रमता भ्रमताऽनन्तं कालं, योऽद्यापि मया नहि निस्तीर्णः;
नेत्रज्योतिज्वलितानलतोऽर्पय, दाहं तत्र संसारवटे... ३

# नर्मकथा

**-मुनिप्रवरश्रीन्यायरत्नविजयाः**

*** शिक्षकेन कथितम्:**

सन्तासिंह! यदाऽहं वयसा तव सदृशोऽभवत्तदा प्रतिवर्षं मम पाठशालायां प्रथमं पारितोषिकमभवत्। केन कारणेन भवताऽद्याऽवधौ कदाऽपि पारितोषिकं न प्राप्तम्।

**सन्तासिंहेन कथितम्** भवत: पाठने कोऽपि कुशलो विदग्धश्च शिक्षक आसीत् अस्माकं तु न तथा।

* सन्तासिंहस्यपुत्रेण प्रस्तरेण प्रातिवेश्मिकगृहपते: गवाक्षस्थितकाचस्य हानिरुत्पादिता। ज्ञात्वा च तत्कार्यं प्रातिवेश्मिकगृहपतिना तत्पितु: कथितम्। यत्तव पुत्रेण ज्ञात्वैव मम हानि: कृता। अत: स शिक्षाऽर्ह:। **सन्तासिंहेन कथितम्**-भवता तत्कृत्यमवधीरणीयम्, यत: स अर्धमूर्खोऽस्ति।

**प्रातिवेश्मिकेनोदितम्-** यद्येवं तर्हि कथं भवत: गृहं प्रति स ईदृशमाचरणं न करोति? **सन्तासिंहेनोदितम्** यत: स अर्धपण्डितोऽपि अस्त्येव।

# सिरिमंतो अद्दयकुमार समणो

**-पंडितवर्य अमृतपटेल**

सिरिमंतो अद्दयकुमारसमणो जदा समणभगवं महावीरसामिं वंदणत्थं समोसरणे गच्छन्तो आसी। तदा रायगिहनयरपरिसरम्मि मग्गमज्झे मंखलीपुत्तगोसालेण सद्धिं, हत्थितापसेहिं च सद्धिं बुद्धभिक्खुणा समं तिदंडिणा च सद्धिं वादो संभूओ-जहुत्तं-

**अज्ज्ञऽद्दऐण गोसाल-भिक्खु-बंभवती-तिदंडीणं।**

**जह हत्थितापसाणं कहिअं इणमो तहा वुच्छं।।** (सूयगडंगं नि.-१९०) तस्स मेहाविणो समणवसहस्स अद्दयकुमारस्स कहाणयं सिरिसूयगडांगसुत्तस्स बीइज्जसुयक्खंधस्स अद्दज्झयणे सिरिसीलंकायरिएण सक्कयभासाए स-वायं वण्णिअं तं पाइअभासाए पाइअभासस्स पहावणत्थं बहुमाणत्थं अहं किंचि सरसं कहामि...तत्त्थ अद्दयकुमारस्स पुव्वभवो कहिज्जइ-

अत्थि अस्सिं जंबुद्दीवे दीवे भारहऽद्धवासे मज्झखंडे मगहा नाम जणवओ। तस्सिं वसंतउरनामं गामो गामप्पवरो, सो धम्मियजणवय-(व्रजं) सोहिओ धम्मिरवरवसहिसोहिल्लो, णेगारामुज्जाणसोहामणो वर-वावी-तडाग-कूवसीय-सलिलसंबद्धसमीरसीयलभूतलो!

तत्त्थ य धम्मियजणवयसेहरो सामाइओ नाम सड्ढो परम-समणोवासो वसइ, निच्चं धम्मकम्मपरायणो सुहगुरुसुस्सुसा-समल्लीणो वट्टइ, सोऽण्णया संसारभयुव्विग्गो संतो धम्मघोस-सूरिपुरंदरस्संऽतिए वेरग्गजणयं

देसणं सोऊण परमसंवेगमावण्णो भज्जाए समं पव्वज्जं पडिवन्नो। सो य समणो सामइओ समुज्जलसीलेण विमलचित्तो संविग्ग-गीयत्थसमणवग्गेण समं विहरइ। तस्स भज्जा वि जा तेण समं पव्वजिता संती निग्गंथीहिं समणीहिं सह गामाणुगामं विहरइ...एवं संजमाराहणाए दोण्हं पि समओ समतिवयति (समतिव्रजति)

अहऽन्नया कयावि सो सामाइओ समणवरो कम्मि नगरम्मि गुरुहिं सह विहंरतो समागओ। तत्थ य तस्स पुव्वावत्थाभज्जा सा साहुणी वि नियगुरुणी-समणीहिं समेया समागया, दिण-मज्जवेलाए भिक्खं अडमाणी सा गाममज्झे निहरइ, तया सो सामइओ समणो तं पासेइ, तहाविहकम्मुदयवसत्तो संजातो कामवसट्टो पुव्वकीलियसंभरंतो तं कामंतो तीए अज्झुववण्णो, अहो केरिसी कम्मस्स गई! अहो केरिसी बलवत्तया य कामस्स! जेणं पुव्वाचरियं चरियं आमघड व्व जलेण विलुंपिज्जइ सो नियमं कामसंकप्पवसणं अण्णस्स समणस्स निवेयइ, तेणावि साहुणा तीसे साहुणीए पवत्तणीए, तं निसामित्ता पव्वत्तिणी परं चिंतमावण्णा-किं करिज्जइ संपयं, जं संजमरक्खणत्थं संपयं सिया। तया ताए निम्मलचित्ताए आराहणा-बलपत्तसुद्धप्पाए पवत्तणिं जणावियं जं न जुज्जए ममं देसंतरं वि विहरिउं जओ न एसो जणो सामण्णजण व्व नियवियारिल्लचित्ततं चयइ चइस्सइ वा। भट्ठाणं चरणत्तो विसमसरबाणविद्धाणं न कयावि कहिंचि वि चरणमग्गे चरण-थिरत्तं, चित्तनिस्सलत्तं वा, अओ अस्सिं वइअरे मम भत्तपच्चक्खाणं करिऊं वरं, जेण निरुवसग्गं मरणं संपज्जेज्ज, न य वयविलोवणं समावज्जेज्ज। एवं निच्छयं विहेऊणं तया संजय-सील-वयसंरक्खणट्ठा भत्तं पच्चक्खाइयं। अखंडसीलव्वया सा कालं किच्चा देवलोए उववण्णा।

इमं च पसंगं सुणिऊण सामाइओ मुणी परं संवेगमुवगओ लज्जावगयचित्तेण चिंतिउं समाढत्तो-'अहो कुलीणया तीसे, जम्मो वि सुद्धयरो सहलो जीए वयभंगभयत्तो मरणमंगीकयं। सीलं च

रक्खिअमक्खंडियं।

मम तु पामरस्स पापरयस्स पावरयमग्गस्स सीलं तु मणसा वि भग्गं, तन्निमित्तं च सा निरवज्जा मरणं पावीअ, अओ मम वि अणसणमेव नियय़ं कायव्वं च्चिय अत्थि।

एवं वियारं करीअ सो सामयिओ चिंतेइ-न मम एयं मणोगयं सीलव्वयभंजणं आयरियस्स णायं, अओ न जाणाविज्जऊ-जओ मम माणभंगो न हविज्ज एवं माणभंगभया मायाए विमंसीऊण, आयरियं मणगयं कामवियारदूषणत्तं वियारसंकप्पं अजणाविऊण, अणसणं, कयं कालं च किच्चा देवभूयं च पत्तो। तओ चुओ समाणो इहेव अणारिज्जे अद्दयविसए अद्दयपुरनयरे अद्दयनिवस्स अद्दयनामेणं सुओ संजाओ। तत्थ देसे सव्वेवि रायाणो रायपुत्ता वि अद्दय'ति देसनामेण विक्खाया। सा वि साहुणी-जीवो देवलोगत्तो चवित्ता वसंतपुरे नयरे वसंतसेणस्स सेट्ठिस्स वासंतीया नामेणं दारिया समुववण्णा।

इओ अ रायगिहे रिद्धसमिद्धे पुरवरे सेणिओ राया, महयाबलेण संजुत्तो, अभयकुमारपहाणपवरपुत्त-मंतिमंतबलनिक्कंटियसत्तिमंतो रज्जं परिपालंतो, भत्तिभरनिब्भरचित्तेणं जिणवरवीरं सेवंतो, समणगणे मणं निओजंतो पयायणं परमवच्छलताए परिपालंतो रज्जं करेइ। रज्जसुहमणुभवइ...

सो अद्दयदेसाहिवो अद्दयनिवो सेणियरायस्स परममित्तभूओ आसी, अओ अेगया एवं महंतं पहाणं सचिवं महत्तमं महंताणि महग्घाणि पाहुडाणि समप्पिअ रायगिहे नयरे सेणितं राजं समप्पेतुं पेसीतो, एवं सेणियरायं पइ अप्पणो मित्तीजुतिं पगडीकरइ।

अह सो अद्दओ रायसुओ तं महंतमं पुच्छइ कस्स कए मम पिउणेमाणि महंति उग्गाणि पाहुडाणि पेसिज्जंति, को ममस्स पिउस्स परमो सोहद्दभायणत्तसंपत्तो राया अत्थि, जस्स पइ सिणेहो एवं पयडी करिज्जइ। तया तं रायसुयं विणएण नमिउं सो महंतमो जंपइ-जहा

कुमर! भवन्तस्स जणयस्स वरवयंसो सेणियो नाम राया मगहाविसए रायगिहस्साहिवई अत्थि। तस्स इमाणि सादरं ससिणेहं समपिज्जंति, एवं नेहवड्ढणो ववहारो परोप्परं पवत्तइ।

तया कोइ मणप्पसायजणओ मित्तप्पवरो मम वि होज्ज 'त्ति अद्दयकुमारेण महंतमो पुच्छिओ-अत्थि को वि वयजुत्तो सेणियरायस्स पुत्तो?जो मम वि मित्तीजुत्तो हवेउ। अत्थि'त्ति महंतेण वुत्तं, अभय नाम-महाधीनिहाणो सेणियस्स रायस्स पढमो पुत्तो, जो पढमो परमो पहाणो मंती वि। जस्स महाधीबलेणं राया सेणिओ सत्तुविग्घं विणा रज्जं पयं च सुहंसुहेणं पालइ। तयाणिं अभयकुमारं मित्तं काउं मणसि करिउं अद्दयकुमारेण महंतमस्स भासियं-मम वि अभयकुमारस्स पाहुडाणि समप्पितव्वाणि संति। एवं वइऊण, अद्दयकुमारेण महग्घाइं पाहुडाइं समप्पिआइं, वुत्तं च-अभयकुमारं एवं कहिज्जासु-जं अद्दयदेसे अद्दओ नाम अद्दयरायसुओ अभयस्स कुमारस्स सिणेहइ, जहा अम्हाणं राया भवन्ताणं पिउणो वयंसो-तह च्चिय अम्हाणं रायसुओ भवन्तस्स वयंसो होउ'त्ति।

अह अद्दयरायस्स अद्दयरायसुयस्स य पाहुडाइं गहिऊण सो महंतमो अज्जदेसे मगहाविसए रायगिहम्मि नयरे सपरिवारो समागओ, इओ सेणियनिवो रायसहामज्झे सुवण्ण-सीहासणंसि समुविट्ठो आसी। सहाए य समन्ता सामन्त-मंति-सेट्ठि-नागरजणवग्गेहिं संपरिवूढो तारागणमज्झे पुण्णिमिंदु व्व राजइ, तयाणिं रायसहाए दुवारवालगो वरवरंगणाविधूयमाणेसु विंजणेसु रायवरं चरणे नमंसिय विन्नवइ-देव! देवस्स परमवयंस-अद्दयरायस्स महंतमो दुवारे चिट्ठइ। सिग्घं सहाए तं समाणय' त्ति सेणियरायणा आणत्तं। विणयावणयतणुलयं सेणियमाणं सिरसा पंजलिपुडेण पडिवज्जिऊण दारपालो निग्गओ। खणंतरेण समागओ य महंतमसहिओ।

महंतमो सेणियनिववरं णमीय णिवेयइ जहा-महाराय। अम्ह राया अद्दओ भवन्ताणं परमो वयंसो परमसिणेहजुत्तचित्तेण किंचि वि पाहुडाणि



पाहुडीकरेइ, इति जंपिउं सेणियस्स पाहुडाणि ढोइयाणि। सेणिएण राएण ताणि करपरामुसियाइं करीय गहीयाइं। तहा जहारिह आसणे-तंबोलदाणाइणा सिणेहजुत्तपडिवत्तीइ महंतमो संमाणिओ, जहावसरं च सहा विसज्जिया। महंतमो वि रायदत्तपाहुणयभवणे समागओ।

अहावरे वासरे, सूरो नहंगणं उज्जोएअंतो दिणारंभकज्जाणि जणं जणावंतो उग्गओ, ण्हाणादिकयपाहाइयकिच्चवग्गो अवग्गो महंतमो अभयकुमारस्स मिलीओ, अभयकुमारेण वि अभिवाइओ, महंतमेण अभयं पणमिऊणं अद्दयरायकुमार-पेसियाणि पाहुडाणि सम्मं अप्पियाणि, वुत्तं च अद्दएण कुमारेण एवं कहाविअं अत्थि-जं 'अहं अद्दओ अभयकुमारस्य सिणेहेमि, अहं पि भवओ वयंसो भविउं झंखामि तहा अम्हाणं पिऊणमिव निउणो नेहो अम्हाण वि सम्पज्जउ'त्ति।



ताला अभयकुमारेण पारिणामीईह मईए विमंसिअं-'जहेसो अद्दओ रायकुमारो अणज्जदेसे संभूओ वि मम मित्तिं झंखेइ सो अवस्सं भव्वो समासन्नमुक्खो वा होज्ज। नऽन्नहा-मम मित्तं भविउं कहं झंखेज्ज इति विमंसित्ता अद्दयकुमारपेसियाणि पाहुडाणि पणय-पुव्वयं अंगीकयाणि, सम्माण-पुव्वयं च विसज्जिओ महंतमो।

एवं सेणिय-अभयकयसक्कारसम्माण-सिणेहपुव्वयं काणिचि दिणाणि गमित्ता महंतमो अवरम्मि दिणम्मि सेणियं रायवरं नमित्ता अद्दयदेसे गमणाय आणं मग्गेइ-

तया सेणिऐण पडिपाहुडाणि देइऊण अद्दयरायं पडि सिणेहसंदेसो वि पाठिओ।

अह अभयकुमारेण तस्सऽद्दयकुमारस्स अणुग्गहत्थं आदिजिणस्स रयणपडिमा सुवण्णमंजूसाए ठविय अण्णं च महरिह पाहुडजायं संचिणीअ-सव्वं महंतमस्स दत्तं, उत्तं च 'मम पाहुडाणि कुमारो अद्दओ एगंते च्चिअ दरिसउ' त्ति।

तं सव्वं गहित्ता महंतमो अद्दयपुरं पत्तो, अद्दयरायं च सेणियराय

पेसियाइं ढोकणाइं दिन्नाइं, बिइज्जे य दिणे अद्दयकुमारस्स अभयकुमार-पेसियाइं' उत्तं च अद्दयरायकुमारं जहा एगंतमेव एयाणि निरुवणीयव्वाणि'त्ति अभयकुमारेण कहाविअमत्थि। अद्दयकुमारो वि पाहुडणमज्झत्तो सुवण्णमंजूसं गहाय भवणस्स एगंतभागमहिगओ। भवणदाराणि पिहित्ताणि, मंजूसा उग्घाडिया, निहालिया य तत्थ नाहिनरेसरवंसविहूसण-रिसहनाहस्स रयणपडिमा पुणो पुणो य निउणं निउणं निरुवइउं लग्गो...निरुवमाणस्स तस्स ऊहावोहं करन्तस्स जाई संभरिया, दिट्ठो य अप्पणो पुव्वभवो-जहा देवलोए देवो-तहा तहिंतो वि पुव्वं सामायिओ साहू हं अत्थि'त्ति। चिंतिअं च चेयणाए चेयंसि 'अहो अभएण महानुभावेण मह महोवकारो करीओ, जेण महं पडिमा पेसीया, जओ पुव्वभवो जाणिओ-अहो मे मूढत्तं जं तारिसं जच्चरयणसमाणं समणत्तं संपावित्ता वि भोगेसु आसत्तो जाओ। जे भोगा पुव्वं पुव्वेसु णंतभवेसु भुत्ता। देवलोए दिव्वा वि भोगा भुत्ता, न तहवि तेहिं संतुट्ठी जाया। अन्नं च सा अणग्घा मे पुव्वभवभज्जा मम सद्धिं पव्वज्जिया संती। ममत्तो पावं आसंकमाणा भत्तं पच्चक्खाइय-आहारं चइत्ता मरणमावण्णा धिरत्थु मं। जं मए वि अणसणं आदरियं परं मायावित्तेण आयरियसमीवे निस्सल्लो न हूओ, जेणा हं अज्ज अज्ज अणज्जदेसे अणज्जकुले समुववण्णो। अत्थु! अहुणावि न किंचि नट्ठं, न य पावं बहुयरं वड्ढिअं जं मम मिलिओ एसो अभयकुमारो, परमकल्लाणो कल्लाणमित्तो। जेण इमीणा पडिमापेसणकज्जेण अणज्जो हं पडिबोहिओ। सधम्मो समराविओ य अह न जुत्तं मह संसारवासे वसितुं-ति अलं मेऽज्ज तुच्छेहिं भोगेहिं-एवं सचिंतित्ता कामभोगेहिंतो परंमुहो संवुत्तो। पडिदिणं च परमवेरग्गभावणाए रायकुमारोचियकीडणं कीलइ, न य मित्तजणेण सह परिहसइ, न य पवराणि भोज्झाणि भुंजइ, न य खेलइ, कीलइ-रमइ। किंतु एगंतमेव अवक्कमिय आदिजिणपडिमं दरिसइ। तस्स च्चिय झाणं झायइ-एवं अद्दयकुमारं विगयरायमिव निरिक्खिय अद्दयराओ

सचिंतो भूतो-मा कहिं पि अद्दओ पलायउ'ति तस्सेव रक्खणट्ठं निरिक्खणट्ठं पंचसयाइं रायकुमाराणं निदिट्ठाइ। जहा पइदिणं पइवेलं पइथलं तुब्भे अद्दयस्स पस्सं न छड्डेज्जा, न य अद्दओ एक्कल्लो मुंचेज्जा-एवं पंचसयरायकुमार परिक्खित्तो पंजरक्खित्त पक्खि व्व अद्दओ तेंहितो अप्पाणं मुंचेउं झुरइ एवं कालो अतिवहइ। अद्दएण एको उवायो उवलद्धो 'अस्सवाहिणीए एए वंचियव्वा' एवं निण्णेइत्ता अस्सवाहिणी कीडा पारद्धा अस्सं वाहिउं पच्चागओ-सव्वे कुमारा वि अस्सवाहिणीए लग्गा। एवं कइवयदिणेसु सव्वे पच्चाइया, एगम्मि दिणे अद्दओ एकल्लो आसवाहिणीए निग्गओ। सव्वे वि रायकुमारे पवंचिय पहाणस्सेण पलाइओ, रायकुमारा तं बहुकालं अवेक्खंता तयणुमग्गं निस्सरिया अस्सपायचिंधेण तमणुगच्छिउं संपलग्गा न य दिट्ठो अद्दयकुमारो तओ रायभयत्तो ते अडविं गंतूण चोरवित्तीए आजीवियं करिउं लग्गाइओ अ अद्दअकुमारो पव्वज्जमिच्छंतो संतो देवयाए निवारिओ। तव अणुकूलो उवसग्गो होस्सति'त्ति। किंतु अद्दयकुमारो दढनिच्छएण सयमो पव्वजिओ विहरिउमाढत्तो इओ अ वसंतपुरे सा वासंतिया सेट्ठिदारिया सहीहिं सहं 'भत्ता-भत्ता' कीडं कीडइ। जा जं किंचि थंभं वा, अन्नं वा परामुसइ, सो 'तीसे भत्ता' इति तया वत्तव्वं सिया, तयंतराले अद्दओ मुणी काउसग्गं ट्ठिओ, ताए सेट्ठीदारिआए 'भत्ता' इति वदित्ता छूढो, तओ पासवत्तिणीए देवयाए 'सोहणं वरियं ति भणियं, अट्ढतेरसं च कोडीहिरण्णं वुट्ठं, तं सुणित्तूण नरवई तं घेत्तुमागओ, देवयाइ निवारिओ, जंपियं च-''एयं हिरण्णजायं इमीए दारियाए, नऽन्नस्स'' ततो सेट्ठिणा, तं सव्वं हिरण्णं संगोवियं, अद्दयकुमार-मुणी वि तं 'अणुलोमो उवसग्गो'त्ति काउमन्नत्थ निहरिओ-विवाहोचियसमए दारियाए वरगा समागया। तया तीए माइ-पिउणं पुच्छिअं-किं हेऊ एए समागया, तेहिं कहिअं-दिक्करि! तुज्झस्स वरगा एए धणावह-सत्थवाहस्स धणयकुमारस्स कए तुमं पत्थिया, तयाणिं सा भणइ ताअ! कण्णगाओ सइं च्चिय

दिज्जंति, न पुणो पुणो, हं तु तस्स च्चिय मुणिस्स दिण्णा, जस्स संबंधेणमेयं हिरण्णं तुमेहिं गहीअं, पिउणा जंपियं-सो मुणी विहरिउमन्नत्थ गओ कहं जाणिज्जइ? दारिया बोल्लइ-तस्स अहं जा पाए वलग्गा, ता तस्स चिंधं मे दिट्ठं, अओ पादचिन्धेण तं जाणिस्सं।

अओ ताअ! सत्तसाला करिवउ, तत्थ सव्वे भिक्खुणो समुविंति, अहं चलणेसु नमण-मिसेण सव्वे परिक्खिस्सामि चरणचिंधेण तं अहिजाणिस्सं, तीसे सिणेहवसा पिउणा एगा सत्तसाला निम्मविआ तत्थ य सा दारिया संठाविया-एवं कालो गच्छइ पइदिणं सा पायवंदणकज्जेण मुणिं तं निरुवइ, अन्नया कम्मजोगेण बारसमे वासे अद्दओ मुणी विहरंतो तत्थ समागओ, चलणे निवडंतीए तीए चिंधं दट्ठूण पच्चहिण्णाओ, ततो मुणी निक्खंतो, सा वि परिवारसंजुत्ता तमणुगच्छीअ, पाणिग्गहणाय विन्नवइ-तयाणि अद्दयकुमारो अणगारो दिक्खावसरे देवयाए जं वुत्तं तं संभरित्ता, तहाविह कम्मुदया अवस्सं भवितव्वयाए भवितव्वं'त्ति संजमा पडिभग्गो, तीसे पाणिग्गहणं कयं, अणुकमेणमेक्को पुत्तो जाओ। एकया अद्दयकुमारो- तं भज्जं तं वुत्तवंतो-जं सुहगे! एसो पुत्तो तुमस्स सहायगो संपन्नो अहुणा अहं निजं संजमकज्जं साहामि। तदा मतिमंतीआ सुतं वुग्गाहितुं कप्पासकत्तणं आरंभइ, बालो सुतो तं पुच्छइ-अंबा किमेयं भवइ करति इयरपाइअजणसमुचिअं। ततो सा सुतं वयइ-जह तव पिया पव्वजिउकामो वट्टइ। तं य संपइ बालो सि नाऽलमत्थो-ववज्जणत्थं, तओ अणाहा अहं, अप्पाणं तुमं च पालइतुं इत्थीजणसाहारणमणवज्जमेयं कज्जं करिस्स'ति मणिऊण मए इममारद्धं, ततो पडिभावंतेण बालेण वि तेहि कत्तियतंतूहिं अद्दयं चलणेसु परिवेढऊणमुच्चयर-मुच्चारियं-अंबा मए बंधिओ एसो, कहिं जाहिइ'त्ति। तया कम्मं तहाविहं मन्नंतो मुणी वि निच्छयं करइ जावंति तंतुवेढणाणि संति, तावंति वरिसाणि अहं पुणरवि गिहम्मि ठाइस्सामि-निरुवंतेण तेन मुणिणा 'बारसवरिसाणि' इति निण्णीतं, अह बारसवरिसाणि गिहम्मि

वसिओ, पुण्णे य बारिसम्मि वरिसम्मि सव्वे आणाविऊण पुणो पव्वइओ-समणभयवं य वद्धमाणं वंदिउं निग्गओ।

तयाणिं वट्टम्मि ते वि अद्दयरायविउत्ता पंचसयरायकुमारा जे चोरा संजाता-ते मिलिआ। अद्दयं च मुणिं पच्चहिऊण, तं संपलग्गा मुणिणा वि धम्मदेसणया संबोहिया, संवेगमावन्ना ते सव्वेवि दिक्खिया। अणुकमसो रायगिहनयरं पवेसंतो अद्दयअणगारो-मंखलीसुतं गोसालं, हत्थितावसे, माहणे, तिदंडी य वादे विजिणिया, हत्थितावसाइणो अद्दयकुमारमुणिणा भणिअं धम्मकहं सुणिऊण वीरसामिणो समोसरणे निक्खंता, तया अद्दयकुमारदंसणत्तो मत्तो वि गयवरो बंधणत्तो मुत्तो-तं च मुत्तं सुणित्ता सेणिओ राया महया कोउहल्लेण अद्दयं पुच्छियवंतो-महामुणी! महंतो भवन्तस्स अनुभावो-जं मत्तो इमो इहो अग्गलाविमुत्तो संवुत्तो, तयाणिं अद्दओ अणगारो अब्बवी रायं! न दुक्करमेयं करिबंधनमोचनं, किंतु चलणतंतुवलयमोयणं तु दुक्करतरं सिणेह-तंतूणं वुच्छेदो हि जंतूणं दुक्करं सुदुक्करं दुक्करतरं...जहुत्तं-

**न दुक्करं वा नरपासमोयणं, गयस्स मत्तस्स वणम्मि रायं।**

**जहा उवत्तावलिएण तंतुणा, सुदुक्करं मे पडिहाइ मोयणं।।**

सू.नि.२००।।



# श्री निःश्रेयसम्

संस्कृत–पत्रम्
४

खण्ड - ३
यशोप्रज्ञा-
दर्शनम्

# भावभक्त्या प्रणमामि सादरम्...

महामहोपाध्याय-श्री यशोविजयजी म.
गुणगौरवगानम्

**-गणिवर्यश्री सम्यग्दर्शनविजया:**

(राग-ऋषभ जिनराज मुज...)

* श्री यशोविजयवाचकं सद्गुरुवरं,
भावभक्त्या प्रणमामि सादरम्।
यस्य प्रज्ञा नवनवोन्मेषशालिनी,
भाति चित्ते सुरगुरुसहोदरम् श्री यशोविजय...॥१॥

* यो मुदा मोहगदतानवायाऽकरोत्,
सम्यग्ज्ञानपीयूषपानम्।
स्वसमयसुरसरित् समवगाहनच्छलात्,
यश्चकार श्रीजिनवचनगानम् श्री यशोविजय...॥२॥

* लघुवयोऽपि गुणै गंभीरो यो गुरुः,
स्व-पर-समय-सार-पारगामी।
कुमतमतभञ्जक: श्रमणसङ्घरञ्जक:,
साम्यनिधि: सदा स्वात्मरामी श्री यशोविजय...॥३॥

* व्याकरण-काव्य-न्याया ऽलङ्कृति:-
स्तोत्र-छन्द: षड्दर्शनादय:।
गुरुकृपादृष्टितोऽधीत्य प्रीत्या मुनि:,
वादिगजभञ्जनेऽभवदजय्य: श्री यशोविजय...॥४॥

* श्री विबुध**नयविजय**शिष्यशिरोमणि:,
गुणखनि: सिद्धशारदो महाशय:
''**श्रेय:दर्शनं**'' गुणं हे गुरो! अर्पय,
येन कुर्वेऽन्तरारि-पराजयम् श्री यशोविजय...॥५॥



## ।। लक्षणस्य निरूपणम् ।।

न्यायाचार्य-न्यायविशारद-महामहोपाध्याय-श्रीमद् **यशोविजय**वाचकवर्याणां श्री सिद्धाद्रिपादुकाप्रतिष्ठायाः संपादत्रिंशत्वर्षशतपूर्णतानिमित्तं तपागच्छताज परमाराध्यपादाचार्य-प्रवरश्रीमद्**रामचन्द्रसूरीश्वराणां** साम्राज्यवर्ती प्रसिद्धप्रवचनकार-पूज्यपादाचार्यप्रवरश्रीमद्विजय **श्रेयांसप्रभसूरीश्वराणां** शुभनिश्रायां कर्णाटक-राणेबेन्नूरमध्ये विद्वत्सङ्गोष्ठीप्रसङ्गे विद्वत्सभायां प.पू.मुनिप्रवरश्री सम्यग्दर्शनविजयैः (अधुनागणिवरः) संस्कृतभाषायां कृतं वक्तव्य अत्र प्रस्तूयते ।

**-श्रीसम्यग्दर्शनविजयाः**



**अर्हमित्यक्षरं यस्य, चित्ते स्फुरति सर्वदा।**
**परं ब्रह्म ततः शब्द-ब्रह्मणः सोऽधिगच्छति ।।१।।**

ऐन्द्रपूजित-परार्थव्यसनी-परमतारक-तीर्थङ्करपूज्यैः अर्थतो देशितं बीजबुद्धिधारक-श्री गणधरभगवद्भिः सूत्रेण ग्रथितं, सर्वनयसमूहात्मकं प्रवचनं नैकश्रुतधरमहर्षिपरम्परया अस्मद् यावत् प्राप्तमद्यापि जगति विजयतेतराम् ।

श्रुतधरमहर्षिपरंपरायां श्रुतकेवलिभद्रबाहुस्वामी, समर्थश्रुतधर-हरिभद्रसूरि,-कलिकालसर्वज्ञहेमचन्द्रसूरि-प्रमुखाः नैकप्रवचनधुरन्धराः सञ्जा-तास्तत्र सपादत्रिशताब्दीपूर्वं न्यायाचार्य-न्यायविशारद-महामहोपाध्यायाः **श्रीयशोविजय**-वाचक-पुङ्गवाः सञ्जातास्तैः स्वाप्रतिम-प्रतिभया स्व-परशास्त्रप्रावीण्यं प्राप्य नानाविषयाननुलक्ष्य शतशो ग्रन्थाः सन्दृब्धाः, नव्यन्यायविषयकग्रंथरचनायां तेषां प्रतिभा नद्यां तरीव सहजमवगाहितवती, काव्यविषयकग्रन्थप्रणयने तेषां प्रज्ञा प्रज्ञावतां परमप्रीति-प्रोल्लासिनी, आगमग्रन्थविवरणसर्जने तेषां मतिः सहृदयहृदयाह्लादिनी, आसीत्।

तेषां केषाञ्चिद् ग्रन्थेषु वादप्ररुपणं कृतमस्ति (वादबत्रीशी-वादमालादिषु...) तै प्रोक्तं यत्-वादास्त्रिविधाः (१) शुष्कवादः (२) विवादः (३) धर्मवादश्च ।

(१) तत्र दुष्टजनेन सह वादः **शुष्कवादः** कथ्यते शुष्कवादो निरर्थकः यस्माद् दुष्टेन सह शुष्कवादे यदि जयः स्यात्, तर्हि तेन जनिताः मरण-चित्तनाश-वैरानुबन्ध-संसारपरिभ्रमणादयो नैकविपत्तय आपतेयुः। यदि पराजयः (स्यात्) तर्हि प्रवचनाऽपभ्राजनाफलं, ततः शुष्कवादो निष्फल एव न, प्रत्युतानर्थकः स्यात्।

(२) द्वितीयो वादः **विवादः** - स च धनलाभ-प्रसिद्धिलिप्सुनिर्धनेन सह छल-जाति-प्रधानतया यो वादः स विवाद-नाम्ना उच्यते। विवादे विजयस्य संशयः यद्यप्रमत्तेन विजयो स्यादपि प्रतिवादिनो लाभ-प्रसिद्धिव्याघातात्-सज्जनशिरोमणि-मुनिजनस्य चित्तं दुनोति-सद्गतिं च रुणद्धि, तेन विवादेऽपि जयपराजययोः उभयोः अपि किमपि फलं नास्ति।

(३) तृतीय वादः **धर्मवादः** - स्वशास्त्र-तत्त्वज्ञेन, मध्यस्थेन, पापभीरुणा महात्मना सह तत्त्वार्थसिद्धिबुद्धया या तत्त्वचर्चा स धर्मवादः कथ्यते। धर्मवादः करणीयो, यतो धर्मवादे यदि विजयो भवेत् तर्हि प्रतिवादिनो धर्मबोधो भवेत् यदि स्व-पराजयोऽपि स्यात् तदा स्वस्य अतत्त्वादौ तत्त्वबुद्ध्यात्मकमोहस्य नाशो भवेत् एवमुभयथा प्रकटं महत्फलम् प्राप्नुयात् एवं धर्मवादो महाफलवान् इति स्थितम्। यतो-

**वादे वादे जायते तत्त्वबोधः। बोधे बोधे ब्रह्मतत्त्वानुवादः।**

तेन तत्त्वज्ञेन धर्मवादः कर्त्तव्यः वयं सर्वे तत्त्वज्ञास्ततः सर्वैरपि अस्माभिः संगोष्ठीरुपेण धर्मवादः कर्त्तव्य एव।

धर्मवादस्य विषयः स्व-स्व शास्त्रनिर्णितधर्मस्य साधनमिति तेन च असद्ग्रहस्य व्ययः, मार्गाभिमुखभावेन मोक्षलाभश्च भवेत्।

धर्मश्च स्व-परसमयेषु पञ्चमहाव्रत-धर्म-यम-कुशल-व्रतादि भिन्न-भिन्न

नामभि: जैन-भागवत-पाशुपतादिभि: प्रोच्यते।

(२)

महाशया:! अस्माभि: पूर्वं वादप्रकारा: दृष्टा: तच्छ्रुत्वा जिज्ञासुशिष्य: गुरुं पृच्छति। 'ननु! स्वसंमतदर्शनतात्पर्यज्ञेन तत्त्वनिर्णयार्थं धर्मवाद: कर्त्तव्य इति ज्ञातम् किन्तु तत्त्वनिर्णयस्तु प्रमाणज्ञानेन भवति, प्रमाणज्ञानं च प्रमाण लक्षणस्य ज्ञानं विना न संभवति, यदुक्तं-**'मानादिना मेयसिद्धि: मेयसिद्धिश्च लक्षणात्'** इति। प्रमाणस्य लक्षणं विचारयता सम्यग्लक्षणं, लक्षणाभासश्च अवश्यं विचारणीयौ भवत:, लक्षणस्य लक्षणाभासस्य च चर्चा परदर्शनचिन्तां विना न भवति। तथा च परदर्शनचिन्तायामेव समयसमाप्त्या कदा तत्त्वनिर्णयो भवेत्?' इति चेन्न, अत्राऽस्मिाभि: पृच्छयते तत्त्वनिर्णयोपयोगि-प्रमाणनिश्चायकं लक्षणं निश्चितं, अनिश्चितं वा भवतामभिमतम्।

यदि निश्चितमिति आद्यपक्षस्तर्हि तल्लक्षणस्य निश्चय: अधिकृतप्रमाणेन कर्त्तव्य:? प्रमाणान्तरेण वा कर्त्तव्य:? यदि अधिकृतप्रमाणेन लक्षणनिश्चय: क्रियते तर्हि **'अधिकृत-प्रमाणेन लक्षणनिश्चय:, लक्षणनिश्चयेन च प्रमाणनिश्चय:'** इति अन्योन्याश्रयो दोष:।

अथ यदि प्रमाणलक्षणं अनिश्चितं ग्राह्यमिति द्वितीयपक्ष:? तर्हि यथाऽनिश्चितात् लक्षणात् प्रमाणज्ञानं तथा अनिश्चितेन प्रमाणेनापि तत्त्वनिर्णय: स्यादिति मन्तव्यम् अर्थात् अनिश्चितप्रमाणेनापि तत्त्वनिर्णयो भविष्यति ततस्तत्त्वनिर्णयार्थं प्रमाणस्य लक्षणकरणं अनुपयोगि भवेत् एवं च परसमयविचाराविरामवार्त्ता सुदुरुपास्ता।

यदाहु: तार्किकशिरोमणय: श्री सिद्धसेनदिवाकरसूरिपुङ्गवा:-

**प्रसिद्धानि प्रमाणानि, व्यवहारश्च तत्कृत: ।**

**प्रमाणलक्षणस्योक्तौ, ज्ञायते न प्रयोजनम् ।।**

तथा च नैकान्तेन **''मानसिद्धिश्च लक्षणात्''** इत्यत्राभिनिवेष्टव्यम् तत्त्वस्य सामान्यतो प्रमीति: सामान्यत एव प्रमीतात् प्रमाणात् सम्भवति, इतरभिन्नत्वेन

तज्ज्ञानार्थं तु लक्षणस्यावश्यकत्वमप्यभ्युपगम्यते एव।

ननु तत्पक्षे पूर्वोक्तानवस्था कथङ्कारं वारणीया? यथाहि लोके वैद्यकादौ सम्मुग्धव्यवहारसिद्धरोगादिलक्षणप्रतीतिः, तथैव सामान्यतो व्युत्पन्नस्य तत् तत् शास्त्राद् अधिकृत-विशेष-प्रतीत्यानवस्थानवकाशात्। तथा च स्यादस्ति लक्षणस्योपयोगित्वं स्याच्च न, इत्येवं स्याद्वादो विजयतेतराम्.

तथा च **'निन्दामि च पिबामि च'** इति न्यायेन किरणावल्यां यद् उदयनेन उपालब्धम् तस्य नास्ति अत्रावकाश इति ध्येयम्। (इति) न च, वाच्यम् यत् ज्ञानप्रमाण्यसंशये अर्थसंशयात् कथं सामान्यतोऽपि अर्थनिश्चयो लक्षणं विना भवेत्।

स्वारसिकी-अप्रामाण्यशङ्का तु प्रमाण-लक्षणेऽपि न निराकर्त्तुं शक्या। कारणिकी अपि उभयत्र सति कारणे सद्भावः, असति चाऽसद्भावः, इति दुरुत्तरा प्रतिबन्दी।

अपि च संशयो न सर्वत्र प्रतिबन्धकः किन्तु अनुमितौ पक्षताया इव संशयस्य जिज्ञासाद्वारा विचाराङ्गत्वम्। तेन च शुद्धतत्त्वप्रमिति इति अनाविलो मार्गः।

सामान्यतः ज्ञानार्थं लक्षणस्य न आवश्यकता इतरभिन्नत्वेन ज्ञानार्थं तु अस्ति आवश्यकता। इति द्वितीयो विरामः।

## (३)

इतरभिन्नत्वेन ज्ञानाङ्ग-लक्षणलक्षणं तु न केवलव्यतिरेकीहेतुविशेषत्वं प्रमितिविषयत्वं पदार्थसामान्यलक्षणं इत्याचार्योक्तलक्षणेऽव्याप्तेः।

किन्तु असाधारणधर्मो लक्षणं तस्य वचनं च लक्षणशास्त्रं, असाधारणत्वं च सकलतद्वृत्तित्वे सति तदितरावृत्तित्वं, अत्र पदार्थलक्षणे वस्तुलक्षणे वा तदितर-अवृत्तित्वाप्रसिद्धिः नैयायिकमतेन भेदसामान्ये लक्ष्यप्रतियोगिकत्व भेदाधिकरणानु-योगिकत्व-उभयाभावं लक्ष्यप्रतियोगिकत्व-सामान्ये, लक्ष्यनिष्ठस्वसमानाधिकरण-भेदवृत्तिताभावं वा निवेश्य उपाध्यायप्रवरैर्निरस्ता।

तद्वृति-अभाव-अप्रतियोगित्वे सति स्वसंबन्धिवृत्ति-भेद-अप्रतियोगि-तत्कत्वं इति लक्षणलक्षणस्य पर्यवसानं च कृतम्। लक्ष्यवृत्ति अभाव अप्रतियोगित्वे

सति (लक्षण) स्वसंबन्धिवृत्तिभेदअप्रतियोगिलक्ष्यसंबन्धित्वं लक्षणस्य लक्षणम्।

लक्षणलक्षणस्य लक्ष्यवृत्तिअभावअप्रतियोगित्वरुपो **प्रथमांशो**, लक्ष्य-तावच्छेदकव्यापकत्वे पर्यवसति, स्वसंबन्धिवृत्तिभेदअप्रतियोगितत्कत्वमिति **द्वितीयांश:** स्वव्यापकतत्कत्वरुप-व्याप्यत्वे पर्यवसति अत्र लक्ष्यं=वस्तु-तद्वृत्ति अभाव:= सामान्यात्मकत्वाभाव:, विशेषात्मकत्वाभाव:, व्यधिकरणधर्मा-वच्छिन्नाभावादय: तत्प्रतियोगिता सामान्यात्मकत्वे, विशेषात्मकत्वे, तत्प्रतियोगिनि, न तु लक्षणे=उभयात्मकत्वे-तेन अप्रतियोगित्वं-उभयात्मकत्वे।

(१=अत एव वस्तुवृत्तिसामान्यात्मकत्वाभावादि-अप्रतियोगि उभयात्मकत्वे सति)

स्वं=सामान्यविशेषोभयात्मकत्वं तत्संबन्धि=उभय-तद्वृत्तिभेद= 'वस्तु न' इत्याकारकभेदो न लप्स्यते किन्तु 'एक देशो न' 'सामान्यात्मको न' 'विशेषात्मको न' इत्याकारकाभेदा: प्राप्स्यन्ते तेषां अप्रतियोगी-वस्तु तस्य संबन्धित्वं-उभयात्मकत्वे इति लक्षणसमन्वय:।

(२=सामान्यविशेषोभयात्मकसंबन्धि उभयवृत्तिभेद-अप्रतियोगिवस्तुन: उभयात्मकत्वं)

तथा च तादात्म्येन लक्ष्यव्यापकत्वे सति तादात्म्येन (लक्षण) स्वव्यापक-तत्कत्वरुपं व्याप्यत्वं इति फलितम्।

ननु असाधारणधर्म इति अत्र धर्मपदं निरर्थकम्, यत्र असाधारणत्वम् तत्र धर्मत्वं इति व्याप्ते:? तन्न, **'व्यर्थं सत् किञ्चिद् द्योतयति'** इति न्यायाद् धर्मपदं लक्षणतावच्छेदकसंबन्धेन व्याप्यता-व्यापकादिलाभार्थं, तेन कालिकसंबन्धेन पृथ्वीत्व-व्याप्यजलादे र्न पृथ्वीलक्षणत्वम्।

न च 'पृथ्वी', 'पृथिव्या: गन्धवत्त्वं संभवति न वा इत्यादि उद्देश-लक्षणवाक्यादिषु अतिव्याप्ति:, लक्ष्यतावच्छेदकधर्मावच्छिन्नउद्देश्यताक लक्ष्यतावच्छेदकसमनियतधर्मविधेयकशाब्दबोधजनकं वाक्यम्, तत्र तस्य लक्षणवाक्यमित्यत्र तात्पर्यात्। अत्र च लक्ष्यतावच्छेदकधर्मावच्छिन्नत्वनिवेशादेव च

'द्रव्यत्त्वेन पृथ्वीमुद्दिश्य गन्धवद् द्रव्यम्' (पृथ्वी) इति प्रयोगे न पृथ्वीलक्षणशास्त्रत्वं किन्तु पृथ्वीत्वेन पृथ्वीमुद्दिश्य 'गन्धवती पृथ्वी' इति प्रयोगे लक्षणशास्त्रत्वं इति गौरीकान्तः तदपि न युक्तम्, 'पृथिव्याः गन्धो लक्षणम्' इत्यादि लक्षणशास्त्रेऽव्याप्तेः। नहि अत्र पृथिवीमुद्दिश्य गन्धो विधीयते किन्तु गन्धमुद्दिश्य लक्षणत्वं विधीयते तस्मान्नायं पन्थाः किन्तु लक्ष्यतावच्छेदकधर्मावाच्छिन्न-लक्ष्यनिष्ठविषयतानिरुपकत्वे सति लक्ष्यतावच्छेदकसमनियतधर्मनिष्ठविषयताकं शाब्दबोधजनकं वाक्यम् लक्षणशास्त्रस्य लक्षणम् ततो नाऽव्यातिः। तथापि 'पृथिवी गन्धवती गन्धवत्त्वप्रकारकप्रमाविशेष्यकत्त्वात्'। इत्यादि पञ्चावयवैकदेशप्रतिज्ञायां अलक्ष्यभूतायां अतिव्याप्तेः । तत इदृग्लक्षणं न कर्तव्यं किन्तु **''तत्र लक्ष्यधर्मस्य लक्ष्यतावच्छेदकसमनियतत्वेन प्रतिपादकं वचनं लक्षणवाक्यम्''** इति तात्पर्यं लक्षणता-बोधश्च लक्षणादिपदसमभिव्याहारात् प्रकारविधया, (तदभावे) लक्षणशास्त्रीय-व्युत्पत्तिमतां-सद्व्युत्पन्नानां लक्ष्यतावच्छेदकसमनियतत्वसंसर्गेण लक्षणबोधो भवति इत्याकारकज्ञानरुपव्युत्पत्त्या लक्षणत्वं संसर्गतया भासते तथा च यत्र लक्षणशब्दः प्रयोगे नास्ति तत्र लक्ष्यतावच्छेदकसमनियतत्त्व-संबन्धावच्छिन्न-लक्ष्यधर्मनिष्ठप्रकारताक-शाब्दबोधजनकं वाक्यम् तत्र तल्लक्षणवाक्यम् तेन च न कश्चिद्दोषः इत्येवं लक्षणशास्त्रलक्षणम्।

(४)

बहुनि लक्षणानि नव्यन्यायपरिष्कृतानि तत्र तत्र उपाध्यायप्रवरै र्निदिष्टानि। समेषां तेषां विचारणायाः नास्त्यवकाशः तथापि **'स्थालिपुलाकन्यायेन'** केवलं नव्यन्यायपरिष्कृतं अस्मदीयवस्तुसामान्यलक्षणं विविच्यते। **सामान्य-विशेषात्मकं वस्तु।** तत्र अनुवृत्तिप्रत्ययाऽसाधारणहेतुः वस्त्वंशः **सामान्यम्।** भवति हि विषयता संबन्धावच्छिन्न-भिन्नप्रदेशक-नानाव्यक्तिनिष्ठविशेष्यतानिरुपित-एकत्वनिष्ठ-प्रकारता-निरुपक-प्रतीतित्वावाच्छिन्नकार्यतानिरुपित-तादात्म्यसंबन्धावच्छिन्न-कारणताश्रयत्वं **तिर्यक् सामान्यं।**

विषयतासंबन्धावच्छिन्न-एकप्रदेशकनानापर्यायव्यक्तिनिष्ठविशेष्यता-

निरुपित-एकत्वनिष्ठप्रकारतानिरुपक-प्रतीतित्वावच्छिन्न-कार्यता-निरुपित-तादात्म्यसंबन्धावच्छिन्न-कारणताश्रयत्वं **उर्ध्वता सामान्यम्**।

एतद् द्विविधं सामान्यं अनुवृत्तिप्रत्ययाऽसाधारणकारणमिति।

**विशेष**स्तु व्यावृत्तिप्रत्ययाऽसाधारणहेतु र्वस्त्वंशः।

एकव्यक्तिनिष्ठ विशेष्यतानिरुपित-अनेकत्वनिष्ठप्रकारतानिरुपक-प्रतीतित्वावच्छिन्नकार्यतानिरुपित तादात्म्येन कारणताश्रयः **विशेषः**।

न च 'घटा अनेके इति प्रतीतिः अनेकव्यक्तिनिष्ठविशेष्यता-निरुपिका अनुभूयते अतः असङ्गतमेतदिति वाच्यम्।'

विशेषग्रहणाभिमुखक्षयोपशमसामर्थ्येन एक विशेष्यनिष्ठ अनेकत्वनिष्ठ प्रकारता-निरुपकबोधे सत्यपि तथाभिलापसंभवादेकघटत्वतादाम्यापन्नघटानां कथञ्चिदेकत्वस्यापि अविरोधाद् इति। उभयात्मकत्वं च सामान्य-विशेषोभयत्वं तच्च भेदाभेद संबन्धेनैकविशिष्टापरत्वम् अतिरिक्तद्वित्वे मानाभावात्।

यत्तु अविशिष्टयोरपि गोत्व-अश्वत्त्वयोरुभयत्व-प्रत्ययाद् अतिरिक्तमेव द्वित्वमिति दीधितिकृता उपदर्शितं, तन्न तत्राप्येकज्ञानविषयतादिसंबन्धेन वैशिष्ट्यस्य संभवाद्। एतेन विरोधभ्रमेऽपि उभयत्वप्रतीते र्भूतत्व-मूर्त्तत्वाद्योरपि न विशिष्टत्वरुपं उभयत्वमिति, जयरामभट्टाचार्येण दीधितिविद्योतने लिखितमपि अपास्तम्। समवायसंबन्धेन विरोधभ्रमेऽपि स्वविषयकज्ञानविषयतासंबन्धेन वैशिष्ट्य-बुद्धेरप्रत्यूहत्वात्।

ननु यदि सामान्यविशेषोभयस्य वस्तुत्त्वं तदा केवलसामान्ये केवले च विशेषे वस्तुत्वं न स्यादिति चेत्? न, केवलस्य तस्याऽप्रसिद्धेः। तथापि 'एको न द्वौ' इतिवत् सामान्यं विशेषो वा न वस्तु नापि अवस्तु किन्तु वस्त्वेकदेशः इति सिद्धान्तः वस्तु-एकदेशत्वं च वस्तुतादात्म्ये सति वस्तुत्वपर्याप्ति-अनधिकरणत्वं यथा हस्तितादात्म्ये सति हस्तित्वपर्याप्ति-अनधिकरणत्वात् हस्त-पदादिषु हस्ति-एकदेशत्वव्यवहारः। यथा च पटरुपवस्तुतादात्म्ये सति पटत्वपर्याप्ति-अनधिकरणत्वात् तन्तुषु

पटैकदेशत्व-व्यवहारः। न च पटसमवायिकारणता-मात्रेणैव तदुपपादनं शक्यं तन्तुसहस्रे सहस्रसङ्ख्यावच्छेदेनापि सहस्रतन्तुक-पटैकदेशत्वव्यवहारप्रसङ्गाद् इति विभावनीयम्।

तथैव सामान्ये विशेषे वा प्रत्येकं वस्तु-एकदेशत्वं-स्फुटमेव। नय-तात्पर्यभेदेन तु अत्र वस्तुत्त्वावस्तुत्वोभयत्व-अवक्तव्यतादिप्रकारैः सप्तापि भङ्गाः प्रवर्तेरन्। अनन्तधर्मात्मकवस्तुनयप्रवृत्ति-अपरिज्ञानवतां तु एकत्र द्वित्वाभ्युपगमेऽपि व्याकुलीभाव एव समवायविषयत्वेनैव 'द्वौ' इत्यादि प्रतीति-उपपादने 'एकौ द्वौ' इत्यादि प्रतीतिप्रसङ्गात्। न च पर्याप्तिसंबन्धाभ्युपगमेऽपि निस्तारः तस्य एकत्र असत्त्वे द्वयोरपि अभावप्रसङ्गात् **सिकताकणे तैलवत्** प्रत्येक-अवृत्तिधर्मस्य समुदाये अवृत्तित्वनियमात् इति दिक्। ततः भिन्नं सामान्यं अवस्तु, भिन्नो विशेषः अवस्तु, अभिन्नं सामान्यं वस्तुन एकदेशः, अभिन्नो विशेषः वस्तुन एकदेशः, सामान्यविशेषोभयात्मकं वस्तु शब्दार्थोभयस्य काव्यत्ववद्, व्यासज्यवृत्तिवस्तुत्वं इति प्रमाणमार्गः।

अत्रत्यं तात्पर्यं न्यायाचार्य-महामहोपाध्यायप्रवरैः **तृतीयवादमाला-वादबत्रीशी-अष्टसाहस्रीतात्पर्यविवरण-तत्त्वार्थवृत्त्यादिषु** विस्तरेण उपदर्शितम् जिज्ञासुभिः तस्मात् ज्ञेयमिति अलं प्रसङ्गेन।





# ।। विद्वत्सङ्गोष्ठीवर्णनम् ।।

अद्यावधि-प्रभुवीरशासनेऽगणिता: वाचकवर्या अभवन् तथापि 'महोपाध्यायवर्या' इति वदन्नेव यशोविजयवाचकानां स्मृति र्मानसपटे चित्रिता भवति सैव तेषां वाचकप्रवराणां महती विशेषता। तेषां अप्रतिमप्रतिभास्वामीश्रीमहोपाध्याय भगवतां सपादत्रिशताब्दीं लक्ष्यीकृत्य विदुषां सङ्गोष्ठीनियोजिता राणीबेन्नूर-(कर्णाटक) नगरे। तत्र काशी-बेङ्गलुरु-पुणे-सुरत-धारवाड-शृंगेरी-कांचीपुर-तेलुगु-प्रमुख-नानदेशागता: विद्वांस: पू.न्यायाचार्यस्य ग्रन्थान् समाश्रित्य प.पू.प्रसिद्धप्रवचनकार प.पू.श्रीमद्विजय**श्रेयांसप्रभसूरीश्वराणां** निश्रायां प.पू.मुनिवर्य श्री **सम्यग्दर्शनविजयेन** प्रारब्धायां विद्वसभायां सर्वे स्वमत्यानुसारेण प्रदत्तस्वविषय-ग्रन्थमाश्रित्य सामलोचनामकुर्वन्।



महोपाध्यायप्रवराणां ग्रन्थेषु तिसृणां प्रतिभानां दर्शनं भवति।

वस्तुस्थिते र्यथार्थवर्णनात्मिका-**प्रतिपादनप्रतिभा**।

कुमतखण्डनकटिबद्धतात्मिका-**खण्डनप्रतिभा** ।

अन्यदर्शनस्थमपि सत्यं जैनप्रवचनसमुद्रस्य निर्झरमेव तम् नयदृष्ट्या निदर्श्य तमपि समन्वयेन ग्रहणात्मिका **समन्वयप्रतिभा**।

एवं त्रिधा प्रतिभावतां तेषां गुणानुरागेणाऽऽयोजितेयं सभा ।

नववादने प्रारब्धायां सभायां सर्वप्रथमं पू.मुनिराज श्री **सम्यग्दर्शन** विजयेन रचितं संस्कृतगेयात्मकं वाचकवर्याणां गुणकीर्तन पं.**राजु**महाशयेन श्रोतृसङ्घेन सह मधुरस्वरेण गीतम्। कोल्हापुरनगरादागत **उत्तम**महाशय: प्रसङ्गपिठिकामकरोत्।

ततः पूज्यपाद **सम्यग्दर्शन** मुनिभिः संस्कृतभाषायां विद्वत्सङ्गोष्ठीगोष्ठिः धर्मचर्चाऽस्ति। तत्त्वप्राप्तेः परमोपायरुपा चास्ति-वाचकवर्यैः वादमाला-वादबत्रीशी-प्रमुखग्रन्थेषु शुष्क१-विवाद२-धर्मभेदात्३ त्रिविधाः वादाः गुम्फिता इति मुनिभिः वर्णितम्। तथेयं सभा वाचकपुङ्गवानाः ग्रन्थान् समाश्रित्य कर्तव्या इत्यादि संभाष्य सभायाः शुभारम्भः कृतः।

ततः वाराणस्याः समागतैः **आञ्जनेय**शास्त्रीमहोदयैः, पू.मुनिपुङ्गव-श्री **विरतीन्द्र** विजयै मङ्गलवादवर्णनं कृतम्। ततः काञ्चीपुरात् समागताऽरैयर-**रामशर्मा**, तमिलनाडु-काश्चीपुरादागत-जय**माणिक्यशास्त्री उमाकान्त**भट्ट-**नवीनजी**-महाशयैः ततः कर्णाटक-धारवाडनगरात् समागत **वाचस्पति**मिश्रैः, शृङ्गेरीनगरात् समागत-**शुभराम**भट्टैः स्वनिर्णित-विषये वक्तव्यं कृतम् । ततो-विद्वद्वर्य पू.मु.श्री **कीर्तीन्द्र**विजयैः मधुररस-शैल्या महोपाध्यायकथितो विभागपदार्थः। ततस्तेलगुराज्याद् समागतैः **नरेन्द्र**पण्डितवर्यैस्ततः शृङ्गेरीनगरात् समागत-**सन्दीप**महोदयैः, काशीनगर्याः समागतैः डॉ. **विश्वनाथ**पण्डितवर्यैः निर्णत-स्व-स्व विषयेषु प्राविण्यं प्रकाशितम्। एवं दिनद्वयं यावत् प्रत्यूषाऽपराह्नसमये विद्वत्सभा प्राचलत्।

दिनद्वयेऽपि प्रसिद्धप्रवचनकार-परमाराध्यपादाचार्यपुङ्गवाः प्रथमचरम-प्रवचनयोः महामहोपाध्याय-जीवनवृन्तान्ते प्रकाशनं कृतवन्तः। विद्वत्सभासमापना-वसरे सर्वपण्डितमहाभागैः स्वहृदयभावः प्रकटीकृतः यदत्र समागत्याऽस्माकं महान् प्रमोदो जातः।

ईदृशी विद्वत्सभा पुनः पुनः समायोजनीया। वयश्च निमन्त्रणीया। राणीबेन्नुरनगरविश्वस्ताऽशोकमहोदय प्रमुखैः, विद्वद्भिश्च-स्याद्वादपद्मनीतिनाम गन्थसमर्पणविधिः विहिता।

# लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''-पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीया-अक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्।

* स्वच्छाक्षरै-र्लिखिता एव लेखाः प्रेषणीयाः अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते।

* नव्यसृष्टलेखेषु व्याकरण-छन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यकी।

* ये लेखाः निर्णितप्रकाशनदिनात् मासत्रय-पूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते,

* तदनन्तरं प्राप्तलेखाः यदि यथोक्तपूर्वा भविष्यन्ति तर्हि आगामिन्यङ्के प्रकाशिष्यन्ते इति समवधेयम्।

लेखप्रकाशनेऽप्रकाशने च सम्पादक-प्रवराणामेवाधिकारः भविष्यति।

**-प्रकाशकः**

# *Notes*

# *Notes*




प्रकाशकम्
जगद्गुरु पू.आ.श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अहमदाबाद

Matiksha
M.: 9820715236